Title: बृहत्कथा।

Author: क्षेमेन्द्रः

Extent: ५१ तः २९५ Age

Subject: काव्यम्

नं०; २-६१-घ

बृहत्कथा

(अपूर्ण)

पत्राणि १६५

२१५

215
50
165
51
215

३८०

नं॰: २६१ – घ

बृहत्कथा

(अपूर्ण)

पत्राणि १६५

२१५

25/9/15

स्वकृतैरेव सुकृतैरीदृशी प्राप्यते स्थितिः। शापदुःखभयक्लेशोः सह्यंतेऽद्य विपर्यये॥ पुरा मार्जाररूपेण प्रियं शक्रेण धर्षि-
तां। अहल्यां गौतमो ज्ञात्वा प्रोवाच ज्ञानलोचनः। आश्रमं कः प्रविष्टो मे श्रुत्वेति प्राह तद्वधूः। मार्जार इत्यपभ्रंशगिरा जं-
लारिरागिणी। इत्युक्ति कुपितस्याथ तस्य शापेन वृत्रहा। अभूत्तस्य सहस्राक्षः शिला च मुनिकामिनी॥ तिलोत्तमांसह-
स्राक्षो दृष्ट्वाहल्या च राघवं। अवाप्स्यतः शापशांतिमित्याह मुनिपुंगवः। इत्यापदो भवंत्येव महतामपि दुःकृतैः। वसंतकस्ये-
ति वचः श्रुत्वा देव्यो ननंदतुः। अहल्याख्यायिका। पद्मावती सुखं भोजमधुपो न्वपतिस्ततः। ललासावंतितनया वदनेंदु-
सुधांबुधिः। इत्थं विरहसंतापतापितां गामसुञ्जनुञः। इदं मया कृतमिति प्रायावंतिसुता स्थितिं। ततनये प्रेयसः प्रेमप्रौढमा-
लंवनं रतेः। आवंत्यमागधो ज्ञात्वा दूने निर्दिति मापतुः। कदाचिद्दष्टराजानं सर्वास्थानसलागतं। व्यजिज्ञपद्विजोभ्येत्य प्र-

५१ नीहारेण सूचित। एकपुत्रस्य पुत्रो मे देवगोपैर्मदोद्धतैः। अटव्यां निगृहीतोयमद्भुताकृदितोजनैः। राजास्मीत्याहितक्रीडः सदास्मा-
51 भिः प्रणम्यते। वयमाज्ञाकरास्तस्य स्वयं प्रभुपदे स्थितः। अयं यदृच्छया यातः प्रणामनतं द्विजः। ततोस्माभिस्तदादिष्टैर्निकृत्त-
चरणः कृतः। इति वाक्यान्महीपाले किंचिदाकुंचितभ्रुवि। योगंधरायणः प्राह विमृश्य क्षणविस्मितः। महताकारणेना-
त्र भवितव्यं नरेश्वर। स्वयं तत्रैव गच्छामो यत्र गोपनृपः स्थितः। इति मंत्रिगिरा राजा तुरगारूढसैनिकः। गत्वा ससाद विपु-
लामटवीं गोपदर्शितां। योगंधरायणस्तत्र भुवमाघ्राय मंत्रवान्। खातं विधाय खनकैर्महानिधिमदर्शयत्। यक्षं नील-
शिलाकारं सूजयित्वा खनिस्थितं। यौधिष्ठिरं धनचयं प्राप सिंहासनं च सः। दृष्टुरत्नासनं प्राप्य निधानं च नरेश्वरः। स्वयं राम०
प्रविश्य कौशांबीमादिदेश महोत्सवं। युधिष्ठिरस्य साम्राज्यविजयावाप्तमासनं। विलोकयन्नरपतिः प्राह योगंधराय- ५१

णां इदं दिग्विजयावाप्तराज्यस्यास्य भूपतेः। अनिर्जितदिगंतेन लंघ्यते कथमासनं। तोषघोतमहासेनो त्वयाद्य जैववं
चितौ। वशीकृतो यत्र बलान्न दद्यात्पिडुनोति मां। यत्तु राजवचः श्रुत्वा महामात्यो वदन्मुदा। यदात्थ देव निखिलं सत्य
मेतदसंशयं। देव पूर्वं दिशं पूर्वां जेतुमाया हि संभ्रतः। दिशमेतां समाक्रम्य सर्वाशाभरणो रविः। हस्तिनापुरमादाय
भव सर्वेजयी नृप। जितायि ककुभः सर्वास्तत्रत्यैस्त्वयितामहैः। निशम्येति नृपः प्राह किं क्रमेणादिशां जये। विजयः
सत्त्वसाराणामुत्साहे न हि कल्पते। श्रूयतां सत्त्वसारस्य कथेत्याभाष्य मंत्रिणं। देवी गोपालसेनानीस्तु हृदा मब्रवीत्तु
रः। आदित्यसेन इत्यासीत्सार्वभौमो महीपतिः। विभाति भुवनोद्याने फुल्लाय त्कीर्तिमालती। नानादिगंतभूपालमौ
लिलालितशासनः। स्फुटस्फटिकसौधायामुज्जयिन्यामुवास सः। कुलीनसत्कुलोपांतनिलयो भ्येत्य तं स्वयं। कदा

५२ चिह्नुणावर्मोरव्यः सभासीनं व्यजिज्ञपत्। कन्यारत्नं मम गृहे विद्यते नयनामृतं। पात्रं त्वं देव रत्नानां प्रमाणमधुना नृपः। उक्त्वे
52 त्यदर्शयत्कन्यां देहबद्धामिव द्युतिं। विवाहेनाथ तां भेजे राजा राजीवलोचनः। सापि तेजोवती नाम समासाद्य नरेश्वरं। ज
हार कांतिं रोहिण्यास्तारापतिसमागमे। तदाननसुधापानमदमंथरमानसः। नराञ्जिनदिवं मेने सत्यसंत्यक्तनृपक्रियाः
आक्रंदितेन पौराणां मंत्रिणां वचनेन च। भेजे संमुखतां किंचित्प्रजानां प्रत्यवेक्षणे। ततः कदाचिदुद्यानयात्रायां तुर
गोत्तमं। आरुरोह स वेगत्वाद्भ्रष्टं रविरथादिव। स हयः पार्ष्णिसंस्पर्शरोषाद्व्योम पतन्निव। जवाज्जहार राजानमाप्रोथ
प्रसारत्खुरः। सहृतोऽश्वेन सहसा व्यसनेनेव विप्लुतः। निशि विश्रमठोपांतमवापोद्भ्रांतमानसः। तत्र प्रतिश्रयाकांक्षी राम०
संनिषिद्धो मठद्विजैः। राज्ञो श्मसानरक्षोयमिति वेदजडात्मभिः। तेषामेको महासत्त्वः शूरोभिजनभूषणः। विहू ५२

षकाभिषेको वह्निवराज्ञाशास्तिदुःसहः। रत्नश्चाजिष्णुकटकं राजानं दीप्तकुंडलं। तं सिषेवे निशि स्वैरं स्नानसन्मानभो
जनैः। तस्योपचारमाचारनिधिः सोमन्यताद्भुतं। अल्पाप्युपकृतिर्याति विस्तारं विषमस्थिते। ततः प्रभाते भूपालः
प्रणम्यारुह्य वाजिनं। जातिस्मरं राजधानीं ययौ वेगध्रुतोत्सुकः। तूर्णं प्रत्यागते राज्ञि कल्पिते नगरोत्सवे। देवी तेजो
वती कन्यामसूत कुलचंद्रिकां। अथ सादरमाहूय नरनाथो विदूषकं। प्रीत्या पुरोहितं चक्रे ददौ ग्रामान्नटायच।
शाप्यग्रामान्महीपालाद्दर्पाधास्ते मठद्विजाः। नानामताः स्वयं चक्रुः स्वाम्यं खलविस्रंखलाः। अहं प्रभुरहं स्वामी
ममैवेदं समाखिलं। इति तेषां समालापो बभूव ग्राममल्लुंठने। उत्पादिते मठे तस्मिन्नद्वैतैस्तैरवद्रुषा। एकश्चक्रध
रेनामधिगम्यस्थानं चकंटकारं। पदे पदेम्बुविन्यासकृतानिहितप्तकुंडिकाः। विदूषकप्रसादेन नाभिज्ञा वोद्यविस्मि

५३ नाः।सह्याःकुंभदृष्टताविषोल्वणाहचः।ऊढावरंपन्नगाःकल्लोलाकुललोलनीलसलिलेग्राहास्तथोग्रग्रहाः।नैवैतेभटपुष्टदु
53 ष्टवपुषश्चंडाःस्वयंस्वामिनः।कष्टंनिष्ठुरचेतसोत्कटरटीवाचाटगोष्ठीभराः।स्त्रीनायकंवरंस्थानमथवाबालनायकं
अनायकंवरंयच्चनत्वेवंबहुनायकं।अद्यैवशूलेनिहताःश्मशानेपुरुषास्त्रयः।यस्तेषांनासिकांरात्रौछित्वादाय
समेष्यति।अधुनैवसनःस्वामीत्यर्द्धोहिभटनाशिनी।इतिक्रुद्धद्विजगिरातेनतथेत्याज्ञरग्रहोज्ञाः।श्मशानगमनंध्या
त्वातेषुभीतेषुसंभ्रमः।विदूषकोययौखङ्गीकरवीरोन्मुखोनिशि।सोपश्यद्दारुणोद्दाममारीफत्कारभीषणं।उ
द्दंडतांडवोच्चंडभूतमंडलमंडितं।कपालकुहरभ्रांतिक्षिप्तडंकारमाहतं।कंकालकलितोन्नालवेतालवलयाकु राम०
लं।हूत्कारिदारुविचटच्चितानलचयाचितं।निशीथमिवतारास्थितारमंगारमेचकं।विंध्याचलमिवालोलपल्ला ५३

शिशातसंकुलं। बहुपुण्यजनावासंमहापथमिवायतं। संग्राममिव निःसत्वजनजीवितखंडनं। वेश्याचित्तमिवानेकनि
रसंहारदारुणं। दारिद्र्यमिव दुःखानां प्रत्ययाणां निकेतनं। श्मशानं तच्च दृष्ट्वा सो न चकंपे निराकुलः। तेषांमूलनिवि
ष्टानां त्रासकारिविकारिणां। आदाय नामिकास्कंधे परिव्राजं ददर्श सः। तं घोरमटकासीनं ध्याननिमीलितलोचनं। प
श्यन्सकौतुकं तस्थौ तच्छायायामलक्षितः। परिव्राट् स पार्श्वेन नाभिमध्यात्समुद्धृतात्। आदाय मटकारूढो ययौ
शून्यसुरालयं। प्रणम्य चंडिकां तत्र तदाज्ञां प्राप देहिमे। आदित्यसेनतनयामुपहारमिति स्फुटं। छायेवानुगतस्त
स्य सर्वं दृष्ट्वा विदूषकः। यद्ध्योस्वामितनया परित्राणकृते क्षणः। साधकोपि क्षणेनैव तां कन्यां राजमंदिरात्।
आनिनाय महामायः क्रंदंतीं खेन वाहनः। तां हंतुमुद्यतं दृष्ट्वा कृपाकोपकरंबितः। जहारास्य शिरश्छित्वा त्रस्तां

५४ पतिपुत्रकां। पितुः पुरोहितं दृष्ट्वा किंचिदुन्मीलितेक्षणा। गाढं जग्राह कंठे सा कंपतरलाकृतिः। आगतव्यं पुनरिति सस्तुश्चावाशरी
54 रिणी। वाणीसमुद्यतो गंतुं निशि व्याकोशलोचनः। तान्सिद्धसर्षिपान्प्राप्य राजपुत्री विहायसा। नीत्वा विदूषकः क्षिप्रं विक्षेपां
तःपुरांतरे। जनालोकनभीत्या तं गंतुमभ्युद्यतं निशि। नृपात्मजा न तत्याज बिभेमि सुतरामिति। तन्मंदिरे स्थिते तस्मिन्श्र
मान्निद्रावशंगते। सौविदल्लाः प्रविविशुः प्रातः कंचुकिभिः सह। ते शयानं समालोक्य कोपादेत्य व्यजिज्ञपुः। आदित्यसे
नं सोप्याश्रुतमाहूयाब्रवीत्क्रुधा। किमेतदिति दृष्टोथ तद्वृत्तांतं निवेद्य सः। अदर्शयन्नरपते साधकं सत्त्वमस्तकं। राजाप्र
त्ययमासाद्य हृष्टस्तस्मै ददौ सुतां। श्रियं चोपकृतिप्रीत्या किमदेयं महात्मनां। सतपासगतोनंगसागीकरणविद्यया। रा राम०
जपुत्र्या नृपोद्याने रराम रतिलालसः। ततः कदाचित्कालेन स्मारितः प्रियया रहः। तामाकाशगिरिं मोहात्सा याच्चंडी ५४

विदूषकः। भद्रां नाम ततः शापपूर्वं विरचितसंविदां। विद्याधरीं ययानीतः स्मरो निःशंकमल्लतां। संतापंचेषुविजयद्विप
कुंलोपमस्तनी। उद्भूतयौवनसरः सरोजललितेक्षणां। फुल्लकांतिलतासक्तभ्रमराकारकुंतलां। श्लाघहेतुरतास
क्तो विसस्मार नृपात्मजी। यातेकालेपि तु भीतामन्यसंगापराधतः। तमामंत्र्योदयगिरिं सा ययौ सिद्धरक्षितं। तस्यां
गतायामुन्मत्तस्त्यक्त्वा भूमिपतेः सुतां। हा भद्रेत्यसकृत्तारं विलपस्तनुतामगात्। व्रजन्नथ दिशं प्राचीं निश्वासस
ग्लापिताधरः। स पांडुवर्द्धनं नाम पुरं प्राप स्मरातुरः। तत्र विप्रगृहे वृद्धा तमाह ब्राह्मणी ततः। पुत्र सर्वं ममधनं गृ
हाणाभिमतोसि मे। यतः स्वपुत्रविरहाक्षियंत्यत्स्वामिजीवितं। दुःखलब्धाभिधा पुत्री देवसेनस्य भूपतेः। इहास्ति ये

५५ 55 नयेनासौहृतायातिसपंचतांचौरैर्गृहान्महान्तस्यसैवनीयतेपुरुषः सदा। इयंयातेष्वनेकेषुममपुत्रोद्यनीयते। तद्विनाशेविनंक्ष्या
मिसर्वेतुभ्यंप्रदास्यतः। इतितद्वाक्यमाकर्ण्यकरुणार्द्रोविदूषकः। अहंतत्रगमिष्यामिनंनंक्ष्यामीत्युवाचतां। तयादिष्टश्चेरा
मुक्तोथप्राप्यभूपालमंदिरं। रत्नशय्यासनस्मेरंकन्यांतःपुरमाविशत्। अथाययौराजपुत्रीतारहारांशुराशिनी। राज्ञय
स्मस्यशशिनः स्वस्लेवश्रीः सतारका। सतांकेनापिनस्पृष्टांदृष्ट्वायौवनशालिनी। राज्ञयस्मस्यशशिनः स्वस्लेवश्रीः सता
रका। सतांकेनापिनस्पृष्टांदृष्ट्वायौवनशालिनी। उद्दामसौरभमरांस्वयंजातांलतामिव। अनासादितपल्याणांकांबोज
तुरगीमिव। कौतुकाकुलितस्तस्थौलस्थौद्वारांतर्निभृतोनिशि। ततः करिकराकारकपिशंघोररक्षसः। भुजंगविष्टद्वा राम०
रेणददर्शोद्घाटमंतिके। दृष्ट्वाप्रदीप्तनेत्रः सदृष्ट्वाजगरसन्निभं। आग्नेयेनासिकावाऊंतस्यदीर्घंचकर्त्तसः। मृणालना ५५

लनिर्लूने पतिते दोष्णि भूतले । उड्डीय विस्रवद्रक्तस्रस्तो निशि निशाचरः । प्रातस्तत्कर्म तुष्टोथ देवसेनो नृपः स्तुतं । विदूष
कायप्रददौ लक्ष्मीं चाद्भुततेजसे । दिव्यवापीमिवानन्यगजयुक्तां सुरद्विपः । स तां नेत्रोत्पलां प्राप्य विललास सुखी वुजं ।
कंचित्कालं मम गृहे स्थित्वा राजसुता श्रियः । प्रययौ संस्मरन्भद्रामनिद्रो विदुताशयः । स मुद्रतीरमासाद्य तरंग
गणभीषणं । स्कंददासेन वणिजा प्राप्य सख्यं प्रियंवदः । आरुरोह प्रवहणं तस्योन्नतपताकिनः । तस्मिन्महांबु
धेर्मध्ये विचचाल न चेटटः । कर्णधारेणारचितः प्रस्तावस्तु गतागतः । तस्मिन्स्थिहांबुधेर्मध्ये विचचालन्निरुद्धेव
णिजामाक्रंदे व्योमसर्पिणं । स्कंददासोवदत्तत्र शोचन्स विपुलां श्रियं । बलेन यः प्रवहणं प्रेरयेदुर्विणादहं ॥
अर्द्धं तस्मै प्रदास्यामि कन्यां चायतलोचनां । विदूषकोथ कारुण्याद्विहस धनलोभितः । मम स्कुरज्जुयष्ठितोम

५६ 56

करालयवारिणी। निमज्य प्राणिसंघातान्ग्रासाद्रुतममोचयत्। तस्मिन्विमुक्ते सर्वाणाकृच्छिन्वाऽऽजलतायययौ। वणिजा
धनलुब्धेन सच्छिन्नालंबनो ययौ। निकृत्तप्राणिसंघातस्समारूढोंबुधेस्तटं। समीपविषयं प्राप्य पथिस्सुस्राव भूपतेः
नित्यं हतैकपुरुषां तनयां मार्यवर्मणः। प्रविश्य पूर्वं वन्नत्रणहृ सं हंतुमुद्यतः। सख्यं तेनार्थितः प्राप ध्यानोप
स्थानसंविदा। आर्यवर्मा ददौ तस्मै पुत्रीं तां सह संपदां। स्थित्वा तत्सुरतासक्तः कंचित्कालं पुनर्ययौ। स्मरन्विद्या
धरस्तु तां सोमवत्यं नृपात्मजां। पारिजातलताभृंगो नहि जातीषु सादरः। अगम्यां भूमिमासाद्य प्रध्यातस्तेन राक्ष
सः। स्तुहत्समं दं दंष्ट्रा स्वयत्समुवाच महाजवः। अथोदयाद्रिपर्यंते तटे सिद्धिनिषेविते। त्यक्तः सरक्षसा तस्थौ न रा.म० ५६
नतोरक्षसांगतिः। तत्र पुष्करिणीतीरे स्थितो दिव्यांगनाजनं। ददर्श रत्नकलशैर्जलाहरणतत्परं। ताः पृष्टाः को

तुक्तं तेन प्राङ्विद्याधरात्मजा। भद्रा नामपि तद्भीता तिष्ठतीह सुलोचना। मर्त्येषसक्ता पुरा साभून्नदासमोदनिवारणे।
जलाहृतिरियं नित्यमस्माकं कमलेक्षणा। इति श्रुत्वामृतेनेव सिक्तो रत्नांगुलीयकं। भद्रायै व पुरा दत्तं चिक्षेपक
लशे लघु। तद्वाप्य ततः स्नाता विज्ञाय सहसादरात्। भद्रा ताभिस्समानाय्य तत्याज विरहव्यथां। अथ तत्सु
रतारंभपरा विद्याधरी कृपणात्। विसस्मार निजां विद्यां भद्रा मर्त्यानुरागिणी। ततो वाहनमादाय राक्षसं सहि
तस्तया। व्रजञ्च गृहीत्वा तनयां नृपतेरार्यवर्मणः। स्कंददासस्य वणिजो हृत्वा सह धनैः सुतां। दुःखलब्धां स
मादाय देवसेनसुतामपि। अवाप्योज्जयिनीं हृष्टः सत्वसारो विदूषकः। आदित्यसेनतनयां भेजे लक्ष्मीं च पुष्क
लां॥ ॥श्रीविदूषकाख्यायिका॥ ॥ इत्येवं सत्वमहतां शूराणां विजयः करे। इति वत्सेश्वरवचः श्रुत्वा सर्वे

५७ मुर्दयसुः। सगृहीतजयोद्योगस्तपसा त्रिपुरान्तकं। अतोषयद्दुःसाध्यं हि किं शिवस्मरणान्नृणां। विद्याधरेश्वरो भावी तनये विजयस्तु ते। इति
57 शर्वाद्वरं प्राप त्रिरात्रोपोषितो नृपः। नृपव्रतानुव्रते च देव्यौ दक्षापतिव्रते। हृष्टो वसन्तकः प्राह प्रशंसंस्तद्विचेष्टितं। पुरा शर्याति
तनया सुकन्या च्यवनं मुनिं। लोपामुद्रा तथागस्त्यं तपसैवमतोषयत्। इति गोपालकादीनां पुरः शंसन्वसन्तकः। पद्मावती
व्रतक्षामां नर्मोक्तिभिरहासयत्। अन्येद्युरथ भूपालं जयोद्योगकथान्तरे। पौरुषं देव सफलं प्राह यौगन्धरायणः। अवश्यं पृथिवीपालभूभु
जां विजयश्रियः। भवन्त्युत्साहसिद्धानामिहामुत्र च सिद्धये। अवाप्यते शुभफलं सुकृतैः पूर्वसंचितैः। पश्चाच्चिंतितमेवाप्तं त्वया यौ
धिष्ठिरं धनं। बभूव पाटलिपुरे देवदासाभिधो वणिक्। महाधनकुले जातो द्यूताद्दुर्गतिमागतः। सश्वस्तवदनच्छायो नगरे पुण्ड्रव रा॰म॰
र्द्धने। श्वशुरस्य गृहं प्रायात्स्कंधालंबिपटांवरः। श्वश्रुरावसथोपातमवाप्याचिंतयत्क्षणं। कथं दीनो गतच्छायः प्रविश्यामीति ल ५७

जितः। धन्यः शवो निरुच्छ्वासो दीर्घनिद्रोऽतिशीतलः। सावज्ञः करुणापात्रं वधूनां न तु दुर्गतः। दवाग्निमुद्रणं तस्य विषपानं महोत्सवः
विश्रान्तिर्मरणं चास्य स्वजनो येन याच्यते। शूरो विदग्धः स्वजनोऽभिमानी विद्वान्कुलीनः कुशलः कलावान्। तावद्यशस्वी ह विभा
ति देही यावन्न देहीति वचो ब्रवीति। देवदासो विचिन्त्येति निशि प्राप प्रतिश्रयं। केनापि वणिजा दिष्टां भाण्डशालां पुरस्थितां। अपश्य
त्तत्र वणिजं ललनां स्वैरमागतां। निजजायां परिज्ञाय तामेवाभूत्तु दुःखितः। रतान्ते साप्युपपतिं प्राह मद्भर्तृमन्दिरे। तत्पूर्वपुरु
षन्यस्तं निधानं विद्यते प्रिय। स्नुषाणामेव तत्कोणे पारं पर्येकमास्थितं। देवदासः स मे भर्ता नष्टो द्यूतेन दुर्भगः। तद्गृहात्तद्ध
नं सर्वं गत्वा तूर्णं समानय। इति गूढस्थितः श्रुत्वा देवदासो मनोजवः। रात्रौ चैव ययौ गेहं गत्वा च प्राप तद्धनं। तेन स्वपदवी
प्राप्ते तस्मिंस्तत्र सुखस्थिते। आगत्योपपतिस्तस्मात्तन्मन्दिरमयाचत। निधानोत्साटनमनाः क्रीत्वा मूल्येन तद्गृहं। दत्त्वा स्व

५८
५४

न्यं महारत्नं तन्मूल्यमेवोन्वयाचत। विवादे भूपतिपुरो देवदासो यथाश्रुतं। निवेद्य निजहस्तांतं नामाहूय सतीं वधूं। परदाररते राज्ञा निगृही
ते सतामपि। कर्णनासाविरहितां कृत्वान्यामानवान्वधूं। इत्थंपि नाम ह धनैर्देवदासो भवत्सुखी। इति पुण्यवतां देवात्त्वयमायांति सं
पदः॥ ॥देवदासाख्यायिका॥ ॥श्रुत्वेति मंत्रिवचनं राजा विजयलालसः। विदेशादिग्जयोद्योगे सेनान्यमपि तद्युतिः। ततो
भ्रातरमाहूय पश्चावन्त्यानरेश्वरः। विदधे सिंहवर्माणं चेदिराज्ये वलाधिकं। गोपालकं च विदिशाराज्ये ह्यत्वाजयोत्सुकः। ज्ञात्वा
मंत्रिगिरा दत्तं कारागारस्थां महीपतिं। ब्रह्मदत्तं समाकृष्ट सर्वसामंतमंडलं। जेतुं सज्जगजानीकस्तुरगोत्खातभूतलः। ययौ हृभ
टसंमर्दव्यालोलितदिगंतरः। पांडुरेणातपत्रेण याजायां विवभौ विभुः। क्षीरसोमसमुन्थेन शशांकेनेव मंदरः। पार्श्ववंश्य राम०
स्यतस्याग्रे गुरुगर्जी गजावभुः। सेवाव्रतमिवापन्ना मेघाः खांडवनिर्जिताः। तस्य सैन्यमभूता विवभौ खङ्गमंडली। पाताल ५८

वासवधांत्येव संप्राप्ताभुजगावली। कापालिभिः प्रणिधिभिर्दैवज्ञव्यंजनैरपि॥ आचकर्ष रिपोर्मैत्रं गूढं यौगंधरायणः। ब्रह्मदत्तस्य सचि
वो धीमान्योगकरंडकः। अधाद्वत्सेश्वरस्यांभोघासं च विषदूषितं। उल्कासदर्शनं घोरं मायास्तास्ताश्च डुःसहाः। योगंधरायणस्त
स्य प्रतीकारपरायणः। व्यर्थं चकार सकलं मायानिर्माणडंवरं। ततोवद्धांजलिर्द्धीमान्रत्नोपायनसंयुतः। ब्रह्मदत्तं विजित्यै
वं सर्वाशाविजयो नृपः। न्यवेशयत्सूर्य इव प्रतापं मूर्ध्नि भूभृतां। ततः समस्तसामंतमस्तकन्यस्तशासनः। पूजितोवंतिराजे
न मागधेन च सानुगः। देवीभ्यां सहितः श्रीमाल्लावानकपुरं ययौ। पौरनारीमुखांभोजविकासनवभास्करः। दिग्विजयः
चक्रवर्त्तिश्रियं शाप्य हेमरत्नांवरप्रदः। भेजे शृंगारसाम्राज्यं कांताकेलिकथो नृपः। ततः कदाचित्सचिवं प्राह वत्सेश्वरो ज
यी। भवन्मतिप्रभावोयं महोमद्विजयश्रियः। पश्यमे भ्रूलताजालहेपैरत्नखातरोपिताः। जातानानराधिपाः पादच्चुंविचूडा

५९ मणित्विषः। मन्येहं ब्रह्मदत्तोसौ नितांतकुटिलाशयः। वशं नीतोपि यत्नेन दर्पाधो विचलिष्यति। इति राज्ञो वचः श्रुत्वा प्राह यौ
५८ गंधरायणः। संमानितस्त्वया देव स राजा न चलिष्यति। त्वच्छासनं हि विषमस्तस्य श्रुवं श्रीन भविष्यति। शुभं शुभकृतां देव विपरी
ताद्धि पर्ययः। अग्निदत्तो भवद्विप्रः पद्माख्ये विषये पुरा। सोमदत्तो भवत्तस्य पुत्रः शास्त्रविवर्जितः। वैश्वानराभिधो ज्यायान्यः श्रु
तिस्मृतिविदां वरः। अग्निदत्तस्तयोः कृत्वा विवाहं प्रययौ दिवं। सोमदत्तस्ततो मौर्ख्यात्सदाचारविवर्जितः। राज्ञो विनिग्र
हपदं प्राप्तो दुर्जनचेष्टितैः। भ्रातृसंरक्षितोभ्येत्य विदुषा नृपशासनात्। त्यक्त्वाग्रहारसभयो जग्राह कृषिजीविकां। वटद्रु
हं पृथुच्छायं प्रजयन्सततं व्यधात्। क्षेत्रकर्मरते तस्य महद्भाः सस्यसंपदः। हलभूतिरिति प्राप संज्ञां स कृषितत्परः। ततः राम०
परबलापातैः कृषो नास्य विनाशिता। सासस्यश्रीर्विधौ वामे पौरुषं हि कदर्थना। स शोकव्याकुलो राज्ञो नष्टनिज्ञो वटांतिके ५९

श्रुत्वाथ वाकाशवचनं सभार्यः साश्रुलोचनः। मिहिरो नाम यक्षोऽहं प्रसन्नस्ते सदार्चनात्। वेदानाम्बुहि महाक्याहि पुलां श्रियं
माप्स्यसि। आदित्यप्रभमासाद्य श्रीकंठविषये नृपं। ब्रूहि गत्वा सदा कार्यै ष्टष्टः एष एव वा। शुभं शुभकृतादेव विपरीता
द्विपर्ययः। इत्याकर्ण्य स स्फूर्जद्वाक्यं तस्य राजो दिष्टः स यक्षेणोवाचादित्यप्रभं गतः। शुभं शुभकृतादेव विपरीताद्विप
र्ययः। इत्याकर्ण्य सक्षद्वाक्यं तस्य राज्ञाक्षतश्रियः। ददौ स विपुलां लक्ष्मीं तस्मै विस्मयकारिणीं। ततः कदाचिद्भूपालस्ते
न विस्रंभकारिणा। पर्योऽङ्गव्यां पोरष्ट्री कटाक्षोत्पलमालितः। चिरप्रभृति निहितो यकां तां कुवलयावलिं। हृष्टां हृ
ष्टो विशदिष्टुमेक एव नरेश्वरः। रुद्धप्रवेशो नृपतिर्दयितां ततः पुरे ततः। गवाक्षान्तरितो पश्यद्यागमंडलपंकजां। दि
गंबरां भुक्तकेशीं रक्तचंदनचर्चितां। मांसाशानी सदयिताम भिचारो चितस्थितिं। प्रविष्टे विस्मयक्रोधशंकाकुलित

६० मानसः। ततस्तया नरपतिर्दृष्टः स्मितनेत्रया। साचासत्तरलाकारा कंपमानघनस्तनी। अभयं दीयतां देव कथयामीत्यभाषत। द-
60 त्ताभया नृपतिना कथामकथयन्निजां। आसं देव पितुर्गेहे पुराहं कन्यकासती। नानादेशसमायातसखीमंडलमंडिता
मध्ये मधुरसंलापकोकिले कालिकाकुले। मलयानिललोलालिकुलाकुलितचंपके। उद्याने गमं लीलानिलयं पु-
ष्पधन्वनः। तत्र मामवदत्सख्यः सखि देवः प्रणम्यतां। अदूरसंनिधिः श्रीमानिह विद्याधिपो विभुः। विवाहविजयोद्यो-
द्योगे स्वयं लोकैः प्रपूज्यते। श्रुत्वेति ता मया पृष्टास्तत्प्रभावं बभाषिरे। ऊर्ध्वरेतसि चंडीशे गौरी पुत्रार्थिनी पुरा। प्रद-
ध्यौ तच्च विज्ञाय हृष्टो भूत्पाकशासनः। एवं देव्याः सुतोस्माकं भविष्यति जयश्रिये। ध्यात्वेति शक्रः पंचेषुं दिदेश म- र॰ म॰
धुना सह। स गत्वा शंकरमनः क्षोभायोद्यतसायकः। चक्रे तपोवनं शंभोरकालमधुमंडितं। सहसोत्फुल्लकमलाशो- ६०

ककेसरकिंशुके। तत्र त्रिलोचनं कामो विव्याधोन्मादनेषुणा। विरं मनसो दृष्ट्वा कुपितस्त्रिपुरांतकः। स्मृतिशेषं स्मरं चक्रे भा
ललोचनतडः खासाक्षनयनां देवी पुत्रार्थिनी हरः। उवाच देवि विघ्नेशः पुत्रार्थं निर्मितस्त्वया। इत्युक्त्वा भगवाद्देवैरर्थ्य
मानो मनोभवं। चकार मानसावासं द्विगुणोत्साहदीपिणं। अथ तारकविध्वस्तत्रिदशत्राणमात्मजं। स्रष्टुं सती रति
क्रीडां भेजे शीतांशुशेखरः। सहस्रं दिव्यवर्षाणां शंकरे रतितत्परे। लुठद्गिरिचरोद्धूतसागरा विचचाल भूः। ततो भी
तैः सुरैः सर्वैः परमेष्ठिगिरानलः। त्रिनेत्ररतिविघ्नार्थमन्विष्टो न व्यदृश्यत। शुकभेकगजेन्द्रोत्वा प्रच्छन्नोऽग्निर्निवेदितः
सदाजिह्वापराहति शापं तेभ्यो ददौ तदा। याचितोथ हरोंद्रेणा शर्वस्य सुरतोत्सवे। विवेश भिक्षुवेषोऽग्निर्विरराम ततः शिवः। वि
रतो रेतसो वेगं चिक्षेपाग्निमुखे हरः। को हि माहेश्वरं तेजो विनाग्निं धर्त्तुमीश्वरः। ततो गिरिसुता कोपाच्छशाप सुरमंडलं। मा

६१ 61 वः सहस्रशः संगर्भजन्मा कश्चित्त्वद्गतोस्त्विति । पुत्रार्थं नत्वया देरि दूर्जितो विघ्ननायकः । इति पत्युर्गिरा गौर्या शापे विघ्नैर्विचितो थसः
ततो वर्षसहस्रान्ते श्रमार्त्तो हव्यवाहनः । तत्याज गर्भं गंगायां साप्यधत्त न मुत्कटं । जाह्नवी नारकत्रस्मात्तं शंभोर्वे च सात्य
जत् । सुमेरोर्दक्षिणे पार्श्वे सहस्रांशुसमद्युतिं । कृत्तिकावर्द्धितः श्रीमान्रक्षितो हरकिंकरैः । षण्मुखस्तेजसा चक्रे
सज्वालाजटिलादिशः । नारदस्य गिरा ज्ञात्वा दृष्ट्वा च तमतिप्रभं । सहस्राक्षो मुमोचाशु वज्रं तस्मै पुनः पुनः । वज्रप्र
हारैस्तनयावभूवुस्तस्य दुर्मदाः । शाखो विशाखः सुमुखश्चेति शक्रदवानलाः । अथोत्थिते कार्त्तिकेये डिंभे समरदु
र्मदे । त्राससंकोचितकरो बभूवैरावणो रणे । ततस्त्रिलोचनेनैत्य सुरेंद्रकृपया शिशुः । सांत्वितः सह पार्वत्या शक्रप्री राम०
तिं च लंभितः । ततोभिषेके पृतनापत्ये तस्याशुकल्पिते । हरेः सकलशोकाङ्कस्तब्धतां विघ्नतो ययौ । अथ शर्वस्य वच ६१

सापूजिते गणनायके। विघ्नप्रशान्त्याशक्रस्य वाङ्गलंभाद्मुच्यता हेरंबेनाभिषिक्तोथ स्त्वयं सेनामवाप्य सः। दिव्यशक्त्या
महासेनोन्यवधीत्तारकासुरं। एवं महाप्रभावोयं प्रणम्यो विघ्ननायकः। सखीनामित्यहं वाक्यान्नंतुं तमगमं मुदा। ग
रोंऽहमश्वत्थतले पूजयित्वाहमीश्वरं। सखीनां सहसा पश्यमाकाशेन गतागतं। तद्दृष्ट्वा विस्मितात्यंतमपृच्छं को तु
केन ताः। सख्यः कथं वो नभसा गतिरित्यूचिरे च ताः। महाकालप्रसादाच्च पूजनाच्च गणप्रभोः। महामांसाशनाच्चैव
मस्माकं सिद्धिरुत्तमा। छन्ना वयं हि डाकिन्यः कापुपाध्यायिनी च नः। अस्त्यसो कालरात्रीति सा चाहूता समेष्यति।
ततो मदुपदेशाय समाहूता समाययौ। कालरात्रिः सखीभिर्मे कुंभलंबोदरस्तनी। अहं तद्दीक्षया क्षिप्रं महामांसा
शनेन च। दृष्ट्वा देवं महाकालमभवं योगिनी ततः। मायारूपपरावृत्ति दृष्टिवंधाभिचारिके। मारणोच्चाटनाकर्षे जाता

६२ हंतद्गुणाधिका। तस्याः प्रच्छन्नडाकिन्याः कालरात्र्याः पतिर्द्विजः। विष्णुस्वामीत्युपाध्यायः श्रोत्रियोस्ति वङ्कृतः। तस्य सुं
62 दरको नाम शिष्यो रूपेण सुंदरः। कालरात्र्या पुवास्तेवं याचितो रतिदक्षिणां। जननी गुरुभार्या मे त्वं पुत्रोहं तवानघे। इ
ति सुंदरकः प्राह प्रार्थ्यमानस्तया सकृत्। ततः क्लिष्टं स्वनखैः सा विदार्य निजं वपुः। कृतं सुंदरकेणेदमित्याह कुपि
ता पतिं। उपाध्यायस्ततः क्रुद्धस्तं शिष्यं शिष्यसेनया। लकुटैर्जर्जरं तं विधाय बहिरत्यजत्। स रात्रौ निर्जने त्यक्तश्चि
रेणाप्तजीवितः। उत्थाय शून्यगोवाटमविशच्छंकिताशयः। ततोर्द्धरात्रे निर्यातामपश्यद्योगिनीवृतां। कालरा
त्रिमुपाध्यायदयितां भीषणारवां। तदुत्पतनमंत्रेण दिवमुत्पतिते गृहे। स गोवाटे सजयाहृतं मंत्रं धीमतां वरः। श्रां एम०
त्वाश्रतिनिहृत्तायां पुनस्तस्यां कृपाकृये। स त्रशालाश्रितः सोथ पुनरेत्यार्थितस्तया। अद्यापि मन्मथरुचे भजमां त्व ६२

स्त्वयमागतां। उपाध्यायवधूं पाहि देहि जीवितदक्षिणां। इत्युपाध्यायिनीवाक्यं श्रुत्वा करुणोत्सुधायसः। जगाम धर्ममर्यादां लंघयं
ति न साधवः। प्रत्याख्याता नरुषाभ्येत्य विस्तुत्वा मीपुनस्तया। त्वच्छिष्येण हतास्मीति गिरा कोलाकुलः कृतः। उपाध्यायो
पि तत्कोपाद्विज्ञाततदाशयः। तस्य भोजनमभ्येत्य सत्रशालानवारयत्। स चोन्मत्तनमंत्रज्ञः पातमंत्रार्थमाययौ। पुन
स्तमेव गोवाटं तत्रापश्यच्च तां निशि। तासामुत्पतितानां च स्थितः प्रच्छन्नवाटके। अलंकारान्स्वयं प्राप महार्घ्यान्दूर
देशगः। तद्विक्रयी प्रभातेथ स तदाहृद्दिसंगतैः। नरैर्विवादे नृपतेः पुरस्तादवदच्च सः। प्रासादमधिरुह्यैव मंत्रैरेवं विज्ञा
पयाम्यहं। इति प्रसादमारुह्य मंत्रेणायं तदूरगं। द्वितीयं नृपमभ्येत्य प्राहाहं धूर्जटेर्गणः। दीयतां रत्नाहेमादि महत्त्वं मा
हेश्वरो ह्यसि। इत्युक्त्वा विपुले स्वर्णे नस्मादादाय हर्म्यगः। यदृच्छोपगतात्सिद्धात्प्राप्य मंत्रं निपातने। कालरात्रिकथां

६३ 63 राज्ञे सर्वमेतन्न्यवेदयत्। राजा तत्त्वं परिज्ञाय तस्या निग्रहमभ्यधात्। सा तद्दयात्यक्ता यत्र तिष्ठति तेहान्तःपुरे मम। इत्येतत्कथितं तुभ्यं यथारत्तं मया
विभो। एहि सिद्धिं भज क्षिप्रं यागेस्मिन्तन्मयीभव। मुक्त्वा वीर महामांसनिर्विकल्पपदाश्रयः। इति देव्या गिरा राजा घृणाकृशितमानसः। तथे
ति चक्रे हठच्छेणावज्ञशोवोधितस्तया। तथाक्रुष्टप्रभुः कोत्र दृष्टेति जगतीभुजा। हलभूतिरिति प्राह स्वैरं कुवलयावली। उद्विग्नस्तत्स
माकर्ण्य देव्या च भृशमर्थितः। राजा दोलायितमना श्चिरेण प्राय निश्चयं। ततः साहसिकं नाम सूदमाहूय दंपती। तमूचतुः समभे
त्ययो वक्ष्यति महामतिः। राजयोग्यां रसवतीं कुरु षेति त्वमेव तं। हत्वा तन्मांसम्भूयिष्ठं तूर्णं भोजनमानय। इति संविदमाद्रा
यस सभामंडपे पुरः। हलभूतिं नृपः प्राह भोज्यं मे क्रियतामिति। तूर्णं तदाज्ञया गंतुं प्रवृत्तं तं महानसं। ऊचे चंद्रप्रभो भ्येत्य राजसूनुस्त्व ए म०
नातुरः। मत्कुंडलाहृतौ गच्छ श्वस्त्वेत्याह स च द्विजः। राजभोजनमादिश्य सूदमेष्याम्यहं क्षणात्। इति राजस्तुतः श्रुत्वा हलभूतिमभा ६३

षत। अहं महानसं गत्वा सूदं वक्ष्यामि तं वचः। अजमत्स्यं उलार्थं त्वमित्युक्त्वा जग्मतुः पृथक्। राजपुत्रमथायातं दृष्ट्वा श्रुत्वा च तद्वचः।
हत्वा यथोक्तमकरोत्सूदः समययन्त्रितः। तन्मांसभोजनं राजा कृत्वा स्वैरं वधूसखः। प्रातर्विदितवृत्तान्तः पपात विलपन्भुवि।
स्वपुत्रं निहतं ज्ञात्वा हलभूतिं विलोक्य च। शुभं शुभकृतां दैवं सस्मारेति स तद्गिरः। हलभूतिं नृपपदे दत्त्वानुशयतापितः। ब्रा
ह्मणेभ्यो महादानं वितीर्य यमुनातटे। निकृत्तनिजमांसेन हुत्वा वह्निं ससंभ्रमः। सभार्यः प्रययौ स्वर्गं सत्वनिर्हूतकल्मषः। शु
भं शुभकृतां दैवं हलभूतिरवाप्तवान्। नहि कश्चिच्छुभकृतस्तव राजा चलिष्यति॥ ॥हलभूत्याख्यायिका॥ ॥ यौगंधराय
णवचो निशम्येति जनाधिपः। एवमेतदिति प्राह विस्मयाविष्टचेतनः। ततः प्रियतमाकेलिविलासरसिको नृपः। परित्य
क्तभियां भेजे स राजविजयश्रिया। कौशांबीमध्यसौधसंगितहरिणीनेत्रांशुनीलोत्पलस्रग्दामाभरणां विवेशाहुभगः कांता

६४ 64 सखे सोऽसौ नृप। आकर्णाचितकार्मुकलताक्रेंकारतारैर्भुजः प्रत्यर्थिक्ष्मपलोलपौरललनाकांचीरवैः पूरितं॥ ॥इति क्षेमेंद्रविरचिता
यां बृहत्कथायां लावानको नाम तृतीयो लंबकः॥ ॥अतः परं नरवाहनजन्म भविष्यति। ललाटलोचनं पायात्सदीप्तं पुरद्विषः
कुमाररक्षासिंदूरं वितरन्किरणैरिव। स सार्वभौमविभवं प्राप्य भूमिपुरंदरः। बभार वल्लभाकांतिनलिनीराजहंसतां। सभास्था
नसमासीनमभ्येत्यावाप्य सत्कृतिं। जगाद नारदो दंतद्योतैर्धवलयन्दिशः। अपि राजेंद्र कार्येषु प्राप्तलक्ष्मीर्न मुह्यसि। ऐश्वर्यम
दमत्ता हि न पश्यंति नृपद्विपाः। अपि संकोचमायाति न श्रीर्व्यसनवारिदैः। जडीकृतप्रतापस्य हेमंते नलिनीव ते। स पांडुः पृथि
वीपालस्तव पूर्वपितामहः। मृगयाव्यसनासक्तो मुनिं हरिणरूपिणं। कर्दमं नाम बाणेन जघान रतिमोहितं। तस्मात्स रति एम०
पर्यंते जीवितं शापमाप्तवान्। इति राज्ञां विनाशाय व्यसनं महतामपि। कुलाधिकपदं वीर संज्ञाज्ञोसि किमुच्यते। सर्वे वि ६४

द्याधराधीशो भविष्यति तवात्मजः। कुमारं जनकं देवं माराध्य शशिशेखरं। देवी वासवदत्तेयं जनयिष्यति ते सुतं। त्रिपुरारा
ति विसृष्टः स्मरः सोवतरिष्यति। रतिस्तुतिप्रसन्नेन शंकरेण विनिर्मितः। उक्त्वेति नारदमुनौ क्षिप्रमेव तिरोहिते। यत्स राज्ञो
भवत्स्वैरमनंदानंदमेदुरः। ततः कदाचिद्दारिद्र्यविध्वस्तावयमंजौ सुतौ। आदाय शरणं प्राया ब्राह्मणी वत्सभूपतिं। विसृष्टां
तःपुरं राज्ञा सा कृपापूर्णचेतसा। न्यस्ता च संपदामंगीकृता वासवदत्तया। पुत्रिणीव तन धन्यासि निजां कथय मे कथां। देव्या पृ
ष्टेति सा स्वैरं ब्राह्मणी प्राह निर्वृता। पत्या विहीनयां देवि चारित्र्यं रक्षितं मया। न हि धर्तुं समर्थो हि शीलं प्रोषितयोषितः।
उत्तरस्यां दिशि पुरा देवदत्तो भवन्नृपः। जयदत्ताभिधस्तस्य पुत्रोभूद्दर्पितः कुले। स राज्ञापवनालोलकदलीदलचंचलां
विचिंत्य संपदं राज्ञां वणिजं चारुयांश्रियं। महाधनवणिक्पुत्र्या पुत्रस्योद्वाहमादधे। येन कांचनरत्नाद्यैः प्रापद्याकोश

६५ कोशतां ॥ ततः कालेन भूपाले दिवं याते तदात्मजः । सगोत्रशत्रुविजितो जीवशेषो ययौ निशि ॥ समात्रा प्रेरितो दुःखाद्गच्छन् स्वश्वशुरमं
65 दिरं । महाधनः सह वणिक् कृत्वां ध्रुवं पूरयिष्यति ॥ इति मातुर्गिरा गत्वा पुरं पाटलिपुत्रकं । श्वशुरस्य सदं प्राप्य न विवेश ह्रि
या ततः । स पांथः सत्रशालायां शयानस्तद्गृहांतिके । निजजायां ददर्शाथ रात्रौ केनापि संगतां । तां चौर्ये हरता कं पक्वणान्मु
खरमेखलां । दृष्ट्वापि दुर्गतिं ध्यायन्न चकंपे ह्यकोपनः ॥ ततः स्फुरत्नसंमोहमर्घ्यं हेमविभूषितं । नाज्ञासीन्मणिताटंकं रा
गांधः को हि पश्यति । तद्वज्रमणिसंछन्नं प्राप्य कर्णविभूषणं । ययौ लक्ष्मीकृतालंबो राजपुत्रोप्यलक्षितः । वंध्ये निधा
य वकुञ्ज धाडविरोन तदुत्तमं । क्रीडातुरंगराजानं परमेश्वरमभ्ययात् । तमुपाश्रित्य बलिनं हत्वा शत्रुगणान् युधि । पित्र राम॰
पैतामहं राज्यमवाप विपुलद्युतिः । ततो न्यां राजतनयां परिणीय कुलोचितां । वणिजः शाहिणो तत्र ताटंकं दुहितुःस्थितं ६५

नदालोके सेवसा भर्त्रा प्रहितं रत्नभूषणं। स्मृत्वा दुर्विनयं भीता सह सा पंचतां ययौ। इति विशेषितस्त्रीभिः शीलं दुःखेन रक्ष्य

ते॥ ॥जयदत्ताख्यायिका। अहं शंकरदत्तस्य जायादेवद्विजन्मनः। ब्राह्मणी पिंगला नाम देवाद्देशमुपागता। हते कुला

ग्रहारे मे गोत्रजैर्बलवत्तरैः। देवरे च विदेशस्थे चिरं शांतिकराभिधे। पुत्रा विमोसमादाय याताऽस्मि शरणं नृपं। भर्त्रा रंत

वसंतमनजनताद्रुरपादपं। श्रुत्वैव राजमहिषी तद्वृत्तांतं कृपावती। पुरोहितं शांतिकरं तस्या विज्ञाय देवरं। सन्मानमधिकं

चक्रे हेमरत्नांबरप्रदा। सापि तं देवरं प्राप्य भर्तेऽदुःखं शशांस तत्। संपूजिता देवरेण राज्ञा देव्या च सादरं। सा तस्थौ ब्राह्मणी तत्र

बालसंवर्द्धनव्रता॥ ॥ब्राह्मणीसमागमकथा। कदाचिद्दग्धदेहेव देवी वातायनस्थिता। कुंभकार्योः सुतान्पंच प्रदध्यौ

दुःखिता कृशं। अपि यामरनारीभ्यो विधिः पुत्रान्प्रयच्छति। न तु मे मंदभाग्याया स्तनयावाप्तिसंकथां। इत्थं दक्षसुखीदे

६६ वीत्रिलोक्यप्राहपिंगला। सुतनयश्रीरिवस्तुरवं हे विपुत्रमवाप्स्यसि। रथ्यासूकरतुल्यानां पापिनां बहलो व्ययः। दैवातिसत्व
66 महतां जन्मपुण्यवतां क्वचित्। ब्राह्मणीवचसा किंचिद्वाप्तांशोकतानवं। स्वयं वत्सेश्वरोऽभ्येत्य देवीचक्रेऽर्चितेः पदं। सा
थ उग्रार्थिनीं दिवमाराध्य तपसा शिवं। स्मरावतारं तनयं प्राप्स्यसीत्यापतद्वरं। स्वप्ने च शुभ्रमहसा जटामंडलधारिणा
दत्तं दिव्यफलं प्राप्य राज्ञे सर्वं न्यवेदयत्। अथाधत्त प्रसुचिह्ना यागर्भं भूपालवल्लभा। चंद्रं क्षीरोदवेलेव जाह्नवीव ष
डाननं। सा व्यक्तदोहदा पांडुमुखाब्जं भालसंस्थितिः। बभार नम्रत्रिवलीलेखाभंगितरं वपुः। तस्या दोहदसंकल्पो
वक्ष्ये वोन्नतिसूचकः। आकाशगमनोत्साहे तस्यामन्यत भूपतिः। विधाय यत्र रचितं विमानं पर्वने हितं। व्यधाद्दास राम०
वदत्तायानभः क्रीडागतिं नृपः। विद्याधरकथाश्चर्ये श्रवणे जातकौतुकां। यौगंधरायणोऽभ्येत्य तां शाहन्नृपसन्निधौ ६६

अवश्यममिताचारसत्त्वं स्तुतमवाप्स्यसि। कुतोऽन्यथा व्योमगतो शुभाख्याने च ते रतिः। शृणु विद्याधरकथां हर्षपीयूष
वर्षिणीं। भाविकल्याणजनये फलितं त्वन्मनोरथैः। अस्ति सानु मनः स्वच्छस्फटिको हिमभूभृतः। विद्याधराणां व
सतिः कैलाशो रम्यशेखरः। जीमूतकेतुरभवत्तत्र विद्याधरेश्वरः। वंशे कल्पतरुर्यस्य संपूरितमनोरथः। जीमूत
वाहनस्तस्य पुत्रोऽभूत्सत्त्वसागरः। यद्यशश्चंद्रिकाधौतमद्यापि भुवनत्रयं। पित्रादत्ताभिषेकोऽसौ विततार स्वर
द्रुमं। हेमवर्षिणमर्थिभ्यः करुणापूर्णमानसः। दत्तकल्पतरोस्तस्य पापा राज्यं जिहीर्षवः। विद्याधराधिपास्तस्थुः
संहताः पापनिश्चयाः। जीमूतवाहनो ज्ञात्वा तेषां कुटिलचेष्टितं। स्वयं शक्तोऽपि तत्याज राज्यं वैरपराङ्मुखः। सपित्रा
सहितः प्रायादिरक्तो मलयाचलं। महत्ताडविनोद्दंडश्रीखंडतरुमंडलं। तत्र निर्झरझंकारिरमणीयशिलातले।

६७ आसीनं स ददर्शाग्र्यभव्यं सिद्धकुमारकं।विलोक्य कौतुकाविष्टस्तं पप्रच्छ महाद्युतिः।कस्त्वं कस्य कुतो वेति संस्पृष्टः सोभ्य
67 भाषत।विश्वावसोः सिद्धपतेरहं।मित्रावसुः सुतः।स्वसा मलयवत्यस्ति मम लावण्यकौमुदी।जाने विद्याधरेंद्रं त्वां
देवजीमूतवाहनं।योग्यां तवैतां मन्येहं रतिं रतिपतेरिव।इति प्रियं वचः श्रुत्वा प्राह जीमूतवाहनः।स्मरामि पूर्वभा
र्या सोदयिता मे तव स्वसा।स्मृत्वा जन्मांतरकथां मम शुश्रूष्यतामागमे।निमील्य लंघ्य बाह्वं भोः सुरामानुषतां गतः।म
हाधनस्य वणिजः संजातः पुत्रनामहं।वसुदत्ताभिधोहं विसृष्टो द्विविराजेने।पित्रा विंध्याटवीं घोरामविशं श
वरं शवराकुलां।तत्र दस्युगणैर्बध्वा नीतोहं चंडिकालयं।दृष्टः शवरराजेन तद्वधान्नु विमोचितः।ततः प्रति राम०
निवृत्तोहं पित्रे सर्वं निवेद्य तत्।स्थितस्तत्र तत्सुपकृतिध्याननस्तिमितलोचनः।ततः कदाचिद्बलिनो राजस्तव ६७

शमागतं। कृतोपकारं शबरं क्षणेनाहममोचयं। स च धाम्नो चितोयत्ना त्कृततः शबरो मया। कन्यां दृष्ट्वा तुषाराद्रौ प्रति कर्तुं ममोद्यतः
ततस्तेनाह मुत्तालतमाहर्तुं लाक्रूलं। नीतः शालेयशैलेंद्रं किन्नरीकेलिमंदिरं। तत्र मामाह शबरः पुरो दृष्टेह कन्यका। मया मदन
मांगल्य मालिका लोचनामृतं। सिंहा विरूढा गौरी व हरारा धनसंगता। सोन्तुकाहरमभ्येत्य मया त्वत्कथया कृता॥ ॥इत्थ
न्मानलिनी खंडमंडितो पांत मादरात्। सो दर्शयन्त दा चाहमम शंभु निकेतनं। कृवं शिवार्चनरतानचिराद्रेक्ष्यतीत्यहं। ध्यात्वा चि
रं स्थितस्तत्र कृतस्नानहरार्चनः। अथ पंचाननारूढा मागतां तत्र कन्यकां। दर्शितां शबरेणाराद पश्यं नम्रमथोत्सवं। शीतां शुशु
भ्रवसनां तारहारकरोज्वलां। तुषारशिखरी ऽस्य प्रत्य क्षामिव देवतां। अयाचं तामहं कांतां पूर्वं रंचितसंविदं। शवरेण कुरंगा
क्षीमचिरेण मनोवतीं। तामादाय ततः कांतां गत्वा निजपुरीं शनैः। अमजं शबरो पेतः काममं विभ्रम वान्श्रियं। ततः स सिंहः

६८ सहसाभूत्वा विद्याधराकृतिः ।उवाच नष्टः शापो मे दिष्ट्या युष्मत्समागमात् ।अहं चित्रांगदो नाम जवाडुल्लंघ्य नारदं ।तच्छापात्सिं
हतां यातः पुरा विद्याधराधिपः ।इयं मनोवती नाम तनया मम सुंदरी ।तव भार्या चिरं सृष्टा हृतां केसरिणा मया ।यदा तव सुतां
कश्चित्परिणेष्यति मानुषः ।तदा विमोक्ष्यसे शापात्त्वमुवाचेति नारदः ।तदेतन्मुक्तशापोहं गच्छामीत्यभिधाय सः ।प्रययौ
स्वपरामणिच्छायाशबलितांबरः ।ततोहमपि कालेन भुक्त्वा लोकसुखश्रियं ।हिरण्यदत्तमासाद्य पुत्रं वंशविवर्द्धनं ।मनो
वतीसखो गत्वा पुण्यं कालंजरं गिरिं ।शवरानुगतो ध्यायन् शंकरं तनुमत्यजं ।जीमूतवाहनः सोहं कन्या मलयवत्यपि ॥
शिया मनोवती सैव शवरस्त्वं स मे सुहृत् ।इति मित्रावसुः श्रुत्वा विद्याधरपतेर्वचः ।पित्रे निवेद्य हृष्टात्मा तं विवाहं विदधे स्व राम०
सुः ।अवाप्य सिद्धतनयां मानसोल्लासचंद्रिकां ।लावण्यविभ्रममहीं मनोरथशतोर्जितां ।स्मरसंभोगसुभगस्तद्विला ६८

सरसाकुलः । अमंदानंदसंदोहं भेजे जीमूतवाहनः । ततः कदाचिद्विहरन्समित्रावसुना सह । ददर्श दुःखनिभृतध्यानं फणि
कुमारकं । स तेन शंखचूडाख्यः पृष्टः शोकभयाकुलः । कद्रूश्च विनता चेति कश्यपस्य प्रिये पुरा । बालधी भास्कराश्वानां सि
तासितविवादतः । पणं दास्याय च क्राते प्रतिज्ञाकृतनिश्चये । कृष्णवालान्विधायाश्वान् कद्रूः पुत्रैर्भुजंगमैः । दास्यं निनाय
विनतां व्याजाद्गरुडमातरं । तस्मान्निशम्य दास्यं तत्पीयूषाहरणावधि । वैनतेयो वहन्नागान्मातुर्दास्यं निवारयन् । जवान्पी
यूषमाहृत्य जित्वा शक्रं खगेश्वरः । प्रदाय काद्रवेयेभ्यो दासभावादमुच्यत । हृतं पीयूषकलशं कुशेष्वभ्येत्य वासवः । ज
हार तत्क्षणात्ताश्च लिलिहुः पन्नगाः कुशान् । ततो द्विजिह्वतां याताः खरदर्भावलेहनैः । विरोधो वैरात्तु परीत्य भक्ष्यतां
भुजगाय प्रभुः । ततः कुलक्षयभयान्नित्यमेवारेण कल्पितः । नागो वासुकिना नित्यं वारोऽद्य तु मम क्रमात् । इत्याकर्ण्यैव करु

६९ णा हर्षेणाजीमूतवाहनः। अहं तार्क्ष्यभवद्धे यो गच्छामीत्यभ्यभाषत। निर्वैरता विनयिता प्रियवादिता च मारौरपि प्रणयिनां प्रियप्र
रणं वा। इत्यत्र मोहमदमानविषोल्वणस्य संसारघोरजलधेरमृतच्छटेयं। मित्रावसुं विसृज्याथ अपदेशेन सत्वरः। शंख
65 चूडं च सत्वस्थो वैनतेयशिलां ययौ। तत्र नागास्थिसंघाते निर्यद्भूरिवसाकुले। गरुडागमनाकांक्षी तस्थौ विगतसं
भ्रम। ततः प्रलयसंभ्रांतकल्पांतपवनाकुलं। अकंपत जगत्तुंगतरंगोत्तुंगसागरं। अथादृश्यत मार्तंडमंडलोच्चंडतेज
सा। गरुत्मान्स्वकांचनमयीः कुर्वन्निव दिशो दश। स चंडचंचुचरणाघातविश्लिष्टविग्रहं। जीमूतवाहनं चक्रे सहसा
पतगेश्वर। अभ्रष्टवदनच्छायं तमालोक्य निराकुलं। धुर्यः सत्ववतां कोयमिति तार्क्ष्योप्यचिंतयत्। दृष्टः कोसीति ए म०
ष्टं तं स्वयं तस्मै न्यवेदयत्। तुष्टस्य वरदोस्मीति तमाह भुजगांतकः। हतानामस्थिभूतानां जीवनं फणिनां त ६९

ततः । नागाशननिवृत्तिं च सोऽयाचत वरं वरं । पतगेंद्रे तथेत्युक्त्वा गते स्वस्थः सुधारसैः । पित्रा मलयवत्या च संगतो बांधवैर
पि । विद्याधरैः समभ्येत्य प्रार्थितस्तुहिनाचले । चक्रवर्त्तिपदं भेजे निजं जीमूतवाहनः । श्रुत्वेति राजमहिषी विद्याध
रकथाद्भुतं । आनंदसुंदरमुखी बभौ प्रातरिवाब्जिनी ॥ ॥जीमूतवाहनाख्यायिका॥ ॥ ततः कदाचित्प्रत्यूषे देवी
संसदि भूपतिं । यौगंधरायणयुतं प्रोवाच श्रवणामृतं । देव मामवदत्स्वप्ने भस्मस्मेरो जटाधरः । गजेंद्रकृत्तिवसनः श्यावकंठ
स्त्रिशूलभृत् । सर्वविद्याधराधीशं स्मरजन्मांतरागतं । जनयिष्यसि लोलाक्षि पुत्रं वंशविभूषणं । प्रातर्वत्सेश्वरस्तुरेदं
पत्योऽभवितामिषः । विवादललपुरुषो निष्पापो न तु तद्वधूः । उक्त्वेत्यदर्शनं याते तस्मिन्हर्षवशादहं । प्रबुद्धा मागध
वधूवृंदमंगलगीतिभिः । इत्युक्तवत्यां भूपालवल्लभायां नरेश्वरं । प्रविश्य प्रणतोऽभ्येत्य प्रतीहारो व्यजिज्ञपत् । देव

७० द्वारिस्थिता कापि योषिद्बंधुजनाहता। मद्ग्रे विवादं मद्ग्रे मया ज्ञायां समुपागता। सपुत्रया तया कष्टस्तद्बंधुजनताडितः। सव
न्ति पुरुषः सर्वं दत्तमस्यै मया धनं। न किंचिदिति योषिच्च प्रमाणमधुना नृप। इति प्रतीहारवचः श्रुत्वा मंत्रिवरो वदत्।
साक्ष्यं साक्ष्याद्विनेत्रेण देव्याः स्वप्नेत्र भाषितं। निःपापपुरुषस्यापि तथाप्यन्विष्यतां पुनः। तस्येदत्तं न दत्तं वा ज्ञातव्यमि
ति साक्षिभिः। लोकप्रत्ययसारा हि महतां प्रतिविश्रुताः। इत्युक्ते त्यमात्ये विरते तयोर्विवदमानयोः। स्वयं श्रुत्वा नृपश्च
क्रे साक्षिशेषं विनिर्णयं। ततो वसंतकः प्राह तत्कथावसरे हसन्। अन्यासक्तैव योषेषा सत्यं द्वेष्टि निजं पतिं। वारा
णस्यां पुरा धीरो बभूव नृपसेवकः। रूपाभिजनसंपन्नो नाम्ना सिंहपराक्रमः। भार्या कलहकार्याख्यातस्यासीत्परु राम० ७०
षस्वरा। धनप्रदोपि सतया शोषितः कलहाग्निना। स विंध्यवासिनीं गत्वा तपसा प्रापतद्वरान्। निधानं देहमसंपूर्णो हे

मपात्रं च निर्मलं । चक्षुस्तस्मिन्समाधाय पात्रे योयः प्रतीक्षते । लोकेस्मिंस्तस्य तद्द्वारात्स्पूर्वजाति विलोक्यते । इति देवी
गिरा स्नात्वा पात्रे कृत्वा स लोचने । प्राग्जातो सिंहमात्मानं जायामृक्षीं च दृष्टवान् । रत्नगर्भस्य वणिजो भेजे सिंहव
नी सुतां । निरस्य योषितो नानाप्राणिजातिविरोधिनीः । इत्येवं पूर्वसाजात्यविरोधात्कर्मतोपि वा । दृष्टानां भार्या
सुहृत्सु वैर्जायते कलहानलः ॥ ॥सिंहपराक्रमाख्यायिका॥ ॥वसंतरवकस्येति गिरं श्रुत्वाभूद्विस्मितो नृ
पः । साह्रिवाद्जितां तां च निरास क्रुधं पुरात् । अत्रांतरे सुतं प्रापहुल्पं यौगंधरायणः । मरुभूतिकनामानं नि
धानमिव संपदां । पुत्रं हरिशिखाख्यं च रुमण्वान्समवाप्तवान् । नित्योदयनप्रतीहारो लेभे पुत्रं च गोमुखं । एते
सहायावत्सेशसूनोर्विद्याधरप्रभोः । भविष्यंतीति जातेषु शब्दो जज्ञे नभोंवरात् । अथ पुण्यवतां योग्ये सुहृ

७१ नैऋशुभे दैवते। असूत तनयं देवी पुरारिमिव देवकी। सा तेन स्फारमहसा द्यौरिवामृतरोचिषा। बभौ देवी कुमारेण कार्त्तिकेनेव
71 पार्वती। ततो महोत्सवोत्साहप्रमोदाकुलितांगनं। बभूव नगरं हर्षादालिंगितमिव श्रिया। अथोच्चचार गगनात्पुष्पवर्ष
पुरःसरा। दिव्यवाणी नृपस्याग्रे पीयूषादिव निर्गता। अयं विद्याधरेंद्रपश्चक्रवर्ती तयात्मजः। नरवानरदत्ताख्यो जातः
कामो महीपते। इति शंखस्वनाविद्धं दिव्यदुंदुभिसंभृतं। श्रुत्वा सरोगीतत्सुतं ननंद वसुधाधिपः। मरुभूतिप्रभृति
भिर्मंत्रिसेनाधिपात्मजैः। सेव्यमानः स ववृधे सह लोकमनोरथैः। जातेनोदयभूभृदच्छमहसा तेन प्रवृद्धश्रिया ह
र्षोल्लासिकलाकलापनिधिना तेनामृतस्यंदिना। आनंदस्फुटचंद्रिकामृतसुधाकांतेन बालेंदुना। सर्वाशापरि राम०
वेषभूषणतुलामासाद्य वंशोऽभवत्॥ ॥नरवाहनजन्म॥ ॥इति क्षेमेंद्रविरचितायां बृहत्कथायां नरवाहनजन्म ७१

नामचतुर्थोलंवकः। अतःपरंचतुर्दारिकालंवकोभविष्यति। त्वंगद्गंगमुदंचदिंदुशकलंवेल्लत्कपालाकुलंपा
पादस्यसदंगदोरुभुजगंचंडीपतेस्तांडवं। यस्योद्भ्रांतभुजप्रवंधवलनावातोत्सरन्सागरस्फारांभःपटलंपुरःपट
इवास्तंकंसमातन्वते। अथहृष्टोमहीपालंप्राहयौगंधरायणः। सुरोचिनसुतावाप्त्यादेवदिष्ट्याविवर्धसे। रक्षायै
तवपुत्रस्यस्वयमेवपिनाकिना। नियुक्तस्तंभकोनामदुरितस्तंभकोगणः। अवतीर्णंप्रभुंज्ञात्वासर्वेविद्याध
राधिपाः। वंदंतेभवतःसूनोरभिषेकप्रतीक्षिणः। इतिनारदनिर्दिष्टंनिवेद्यामात्यपुंगवः। विदधेराजपुत्रस्य
विद्याविनयसंपदं। प्रकृष्टानंतसामंतमौलिभास्वत्प्रभांसभां। अध्यासीनेथनृपतौहेमपिंगमभून्नभः। ततो
वतीर्यनभसःसभांविद्याधरोवसत्। शक्रचापांकिताःकुर्वन्भूषणानांशुभैर्दिशः। मंडतांडवितानीलरत्न

७१ कुंडलकांतयः। सुरेखं दोश्चक्रिरे यस्य लक्ष्मलेखा शृंगभ्रमं। श्यामव्याकोशखड्गांशुभूषितः सवभोभुजः। शरदभ्रमिव विभ्राणो नी
लोत्पलदलस्रजं। तमागतमभिप्रेक्ष्य विस्मयानिमिषो नृपः। लोलहारः ससुन्नस्तोसं रंभारणितांगदः। प्राप्तं पूजासने
तस्मिंश्च राज्ञा सह सभासदः। तन्मुखन्यस्तनयनाः वभूवुर्लिखिता इव। पृष्टः कोसीति स प्राह सुप्रदं तां सुसंचयैः। कै
लासवासश्रीस्तैवरचयन्स्फाटिकीं सभां। नेत्रोत्सवं स्फूर्ति सुधां कल्याणानां च संपदं। किरं त्रिदशनालापसंगता
निभवादृशां। शक्तिवेगाभिधोनोहं देवविद्याधरेश्वरः। कैलासवासस्त्वत्सुतं स्वामिनं द्रष्टुमागतः। सर्वविद्याभृतां ना रा॰म॰
मेष चक्रवर्ती भविष्यति। हरप्रसादादाकल्पं स्मरः साक्षात्तवात्मजः। इत्याकर्ण्य सुधासारसिक्तांग इव भूपतिः। ७१
अदर्शयत्सुतं तस्मै देव्योरुत्संगभूषणं। ततः पृष्टो निजकथां भूपालेनाभ्यभाषत। प्रणम्य राजतनयं शक्तिवेगः

कृतांजलिः॥ ॥शक्तिदेवसमागमकथा॥ ॥राजापरोपकारीतिवर्द्धमानेपुरेभवत्।तस्यहेमप्रभानामवल्लभाभू
द्नंगभूः।कन्याकनकलेखाख्यातस्यांतेनमहीभुजा।उदपादिजगज्जैत्रयशालक्ष्मीर्मनोभुवः।कनकाख्यावरपु
रीदृष्टायेनसमेपतिः।इत्यकस्माद्विधौचक्रेव्रतंसादृढनिश्चया।पुत्र्याःप्रतिज्ञांविज्ञायप्रौढयौवनसंपदः।अज्ञा
तांचपुरींमत्वानृपःशोकाकुलोभवत्।दृष्टाकनकपुर्याख्यायेनलक्ष्मीस्तुतांचमे।सप्राप्स्यतीतिविदधेनृपःपट
हघोषणं।नदृष्टानश्रुतावापिसापुरीतिमकीतले।वचोनिशम्यलोकानांराजाभूद्भृशदुःखितः।अत्रांतरेशक्ति
देवोद्विजन्माद्यूतकृन्मृषा।भूपालमब्रवीदेत्यमयादृष्टैवसापुरी।इतिब्रुवाणंतंराजानीत्वास्वतनयांतिकं।अ
नेनपुत्रिसादृष्टापुरीतिप्राहसादरं।क्ववाकथंवादृष्टेतिपृष्टःकनकलेखया।पुरीमकथयन्मिथ्यावर्णनानि

७३ पुरोऽथ सः। असकृद्दृग्जल्पोऽयमिति मिथ्यावचः क्रुधा। सतया भ्रुकुटिभ्रान्त्या चेटिकाभिस्तिरस्कृतः। स निरस्तोऽवमानाग्निप्लुष्टोदु
गतिपीडितः। कनकाख्यां पुरीं द्रष्टुं प्रययौ कृतनिश्चयः। ततस्तु त्सारितं ज्ञात्वा चिंतासंतापितो नृपः। सुशोच तनयां पश्यन्फुल्ल
73 यौवनमंजरीं। अवाप्नकृतकं रत्नं पारिजातमनुष्ठितं। निर्जने रत्नमालेव कथं दुःखायमेस्तुता। किं निरस्तस्त्वया पुत्रि सदृशो येन सापु
री। पितुः श्रुत्वेति सा प्राह कन्या कमललोचना। धूर्तैः सकितवोद्देवनन्तत्वं किंचिदुक्तवान्। साधुर्भ्रान्त्या हि मुक्तं ति धूर्तौः सरलवं
चकाः। पुरा रत्नपुरे धूर्तावभूतां शिवमाधवौ। यत्कौशलेन नगरे धनवान्को न वंचितः। ततो महाधनं ज्ञात्वा भूमिपालपुरोहितं
उज्जयिन्यां रथ्यवेषौ जग्मतुर्वंचनोद्यतौ। पूर्वं शिवः समभ्येत्य स्वैरं दंभकृतव्रतः। शिप्रातीरे व्रतपरस्तस्थौ विश्वासयन्जनं॥ एम०
विप्रराजवेषोऽथ धूर्तैश्च सह माधवः। तत्पुरोहितमभ्येत्य दत्त्वोपायनमभ्यधात्। अहं स्वराज्यविभ्रष्टो राजपुत्रो महाधनः ७३

त्वयासौहार्दमाधायसेवेराजानमुत्तमं। इतिशंकरदत्ताख्यःश्रुत्वावाचंपुरोहितः। तथेत्युक्त्वास्यविदधेराजसिंहे
नसंगमं। सेवमानोनृपतिंपुरोहितगृहेस्थितः। सकदाचिद्निर्देश्यरोगाग्निभ्यातुरोऽभवत्। अस्तस्वस्थमथविज्ञा
यदुःखाक्रांतःपुरोहितः। पुनःपुनःसमभ्येत्यतमपृच्छद्नामयं। सोब्रवीद्राजयोग्यंमेविद्यतेरत्नभूषणं। पात्रमानय
यस्मैतद्दत्वायास्यामिसद्गतिं। पिपासोःपंचतांप्रसःतुहृदांभिषजांपुरः। दीर्घांधकारेपततोदानमेवपरागतिः। इत्या
कर्ण्यवचस्तस्यसरलालापुरोहितः। आनिनाययवद्यून्विप्रान्सचतान्नाभ्यमन्यत। ततःशिप्रातटस्थंतंजपव्रतपराय
णं। पुरोहितःशिवंगत्वाप्राहमित्रमनोगतं। पुरोहितेर्थितःप्राहशिवःकपटनिस्पृहः। किंधनैरगृहस्थस्यममेत्यामीलिते
क्षणः। अथोपपत्तिवचनैस्तमभ्यर्थ्यपुरोहितः। स्वीयांपुत्रींप्रदायास्मैप्रतिग्रहमदापयत्। माधवस्तन्निरातस्मैकाचकृत्रिमभूषणं।।

७४ 74 प्रतिपाद्याभवत्तस्योर्मूर्त्तौ मायामिवात्मनः। विक्रीणानस्ततो ज्ञात्वा प्राह जामातरं शिवं। पुरोहितो न काले स्मिन्योग्यस्ते रत्नविक्रयः॥
गृहाण मे सर्वधनं मप्येवार्पय भूषणं। तथेत्युक्त्वापराहन्निधनेलेख्येन चक्रतुः। शिवस्तद्धनमादाय माधवेन सहानिशं। प्रमोदं प्रा
पसंभोगसुधासंसिक्तमानसः। पुरोहितोपि काले न ज्ञात्वा कृत्रिमभूषणाः। जितः स्वहस्तलेख्येन विवादे भूपतेः पुरः। त्वयाख्या
जारिदं दत्तमिति प्रष्टः सभाधिपैः। माधवोप्याह दत्तं यत्तत्फलं मासुपेष्यति। इति श्रमं ति कूटेन धूर्त्तौ वंचयितुं जनं। कलौ षां व
चने धीमान्विश्वासं याति मायिनां॥ ॥शिवमाधवाख्यायिका॥ ॥श्रुत्वेति वचनं पुत्र्याः प्राह शोकाकुलो नृपः। पुत्रि त्वया प्र
ति ज्ञाय संशये पतिता वयं। त्वं यौवनवती गेहे कन्यकेव सुमध्यमे। अप्रत्ययस्य लोको यं न जाने किं भविष्यति। अल्पमंत रा म०
रमासाद्य कल्पिताश्चर्यवादिनः। नरास्वल्पक्रस्वकर्माणो मोदंते साधुनिंदया। परापवादसंहृष्टा गुणलेशासहिष्णवः। ली ७४

लयोत्पाद पर्यंत्येवमिथ्यादोषं सतां खलाः। कुसुमाख्ये पुरे पूर्वं तपस्वी नियतेंद्रियः। उवास ब्राह्मणवरो हरस्वामी गुणाधि-
कः। ततः कदाचिद्दुर्जनतामध्ये तद्गुणसंस्तवे। उवाच दुर्जनः कश्चिद्युष्माभिः किं तु न श्रुतं। बालाद्गुणात्मना तेन भक्षिता
निखिलाः पुरे। इति तस्य श्रुत्वैव वाक्यमेव द्विजश्चित्तः क्रमात्। हा हरस्वामिना कष्टं भक्षिता बालकाः पुरे। प्रवाद इति सर्वत्र
बभूव निरवग्रहः। ब्रह्मोत्तरे जनपदे तद्द्विवासन संगमो। निजापवादनिर्विण्णो हरस्वामी समाययौ। तमागतमभिप्रेक्ष्य
सामर्षभयविह्वला। चकंपे भद्गणामयात्कृतांतालोकनादिव। ततोव्यजिज्ञपत्सर्वान्हरस्वामी कृतांजलिः। दारका भक्षिता
स्तेभ्यः किं यं तस्येति गण्यतां। श्रुत्वेति तस्य वचनं गणयित्वा निजान्सुतां च। निर्विचारा वयमिति प्रययुर्लज्जिता द्विजाः। इ-
त्यनालोच्य सद्भावं वदंत्येके तथापरे। पश्चूनामिव स्पर्धायां गतानुगतिको जनः॥ ॥ हरस्वाम्याख्यायिका॥ ॥ पितुः श्रुत्वेति

७५ वचनं न चचाल समीहितात् । वज्रले पाद ऽपि दृढो मानिनीनां हि निश्चयः । अत्रांतरे शक्तिदेवः प्रययौ दक्षिणां दिशं । दृष्ट्वा कांचनपु
75 रीमन्वेष्यं वतिसंविद्गा । ततो विंध्याटवीं प्राप्य तालहिंतालमालितां । ददर्श सूर्यसंकाशं मुनिं मुनितपोवने । पृष्टः क्व प्रस्थितोसी
ति मुनिना विगतक्लमः । गच्छामि कांचनपुरीं वक्तुमाली भ्यभाषत । प्रयासि न च जानामि विवि चित्रं नवचेष्टितं । अहं तावन्न जाना
मि चिरायुरपि तां पुरीं । इतो विदूरे भ्राता मे स्थितो दीर्घतपा मुनिः । अपि जाने स जानाति न चेदन्यो न विद्यते । इति तस्य गिरा
मत्वा कांपिल्ये मुनिसत्तमं । पप्रच्छ तं स च प्राह न जानामीति तां पुरीं । दासराज्यो स्तिजलधावुत्पलद्वीपसंश्रयः । मन्येस
त्यव्रतारव्यो सो वृद्धो जानाति तां पुरीं । श्रुत्वेति दीर्घतपसः शक्तिदेवो मुनेर्वचः । गंतुमुत्पलकद्वीपं प्रतस्थे कृतनिश्च राम०
यः । स गच्छन्नाससादाशु वणिजं द्वीपगामिनं । समुद्रमत्स्यनामानं निधिनाथमिवापरं । आरुह्य तत्प्रवहणं सो हार्दैन नि ७५

षेव्यतां। ददर्श पयसां राशिं गभीरावर्त्तभीषणं। ब्रह्मांडमंडपस्फारस्फटिकस्तंभविभ्रमैः। उत्तुंगविपुलाभोगतरंगैर्लंघि
तांबरं। घनगर्जितविस्फूर्जन्मुरजध्वनिनोर्जितं। सतांडवितमुद्दंडवीचिदोर्दंडमंडलैः। आसेव्यमानमभितः पृष्ठपर्ज
न्यसंचयैः। मैनाकरक्षासंजातप्रणयैरिव भूधरैः। संसारमिव निःसारमायासमिव दुःसहं। मायाजालमिवानंतं मूर्खखलमि
वोद्धतं। तत्र प्रवहणारूढः सोपश्यन्निखिला दिशः। स्फारकल्लोलपटलीडुह्मलवलिता इव। अथोदनिष्टत्व्योमश्रीका
लागरुचिशेषकः। मेघस्तमालमलिनो वालहूकरविभ्रमः। यातः सहर्द्धिं सहसा उर्जनव्यसनोपमः। चक्रे लोकं निरालो
कं विमोह इव मानसं। ततस्तत्र सरोद्भूतवात्यावलयसंप्लवैः। ययौ जलधितां व्योम व्योमतां च महोदधिः। तस्मिंस्तरंगसं
घट्टस्फोटिताशेषदिक्तटे। उदभूत्स्थलयोद्भ्रांतपुष्करावर्त्तकध्वनिः। ततस्तडित्तिसारोपत्रुटिताशेषवंधनं। अभज्यत प्र

७६ वहणं वणिजां हृदयैः सह। तस्मिन्निमग्ने मत्स्येन विशालवपुषा ततः। शक्तिदेवः परिपतन्निगीर्णस्तूर्णं रंहसा। वणिग्वरः फलहकात्सा
76 गरात्प्राप जीवितं। मत्स्योप्यसावुत्पलकद्वीपे वद्धो निषादकैः। धीवरैर्विनिकृत्तेथ मत्स्योदास्यापतेः पुरः। स विप्रो निर्ययौ जीवन्नु
दैया हि गतिर्विधेः। घोरांधकारनिर्मुक्तः शक्तिदेवोथ विस्मयात्। दृष्टो दासाधिपतिनाशाहागमनकारणं। कनकाख्यां पुरीं
द्रष्टुं भ्रांतोस्मि पृथिवीमिमां। न सा दृष्टा श्रुता वापि ततः दृष्टो मया मुनिः। स मामुवाच दासानामस्ति सत्यव्रतः पतिः। तं पृच्छे
ति निशम्याहं संप्राप्तो मकराकरं। तत्र प्रवहणे भग्ने निगीर्णोहं जलौकसा। दैवाद्भुवमिमां प्राप्तः कर्मवद्धो हि नान्यथा। इत्या
कर्ण्याब्रवीद्दासः कौतुकाकलितो द्विजं। सत्यव्रतो हमेवासौ न दृष्टा नगरी मया। यत्नात्त्विष्य वक्ष्यामि विश्रांतिमज निर्वृतः एम०
इति तस्य गिरा तस्थौ तत्र रात्रिं द्विजाश्रमे। शक्तिदेवप्रवहणभंगकथा॥ ॥ ततः स संगतो दैवाच्चिरं द्वीपनिवासिना। विज्ञा ७६

तो मातुलेयेन भ्रात्रा निजकथान्तरे । स चाह विष्णुदत्ताख्यः शक्तिदेवं मुदान्वितः । काकतालीययोगेन दिष्ट्या मे बंधुसंगमः

इत्युक्त्वा तत्कथां श्रुत्वा वीतनिद्रं स्मरातुरं । तं समाश्वासयन्वीरः कथामकथयन्निशि । गोविंदस्वामिनामाभूद्ब्रा

ह्मणो दक्षिणापथे । विजयाशोकदत्ताख्यौ तस्य पुत्रौ बभूवतुः । दुर्भिक्षोपहतां त्यक्त्वा स कदाचिन्निजां पुरीं । प्रययौ का

शिनगरीं सपुत्रः सहभार्यया । ततः प्रयागमासाद्य पुरस्थं दृष्ट्वा महावटं । कपालमालाभरणं सोपश्यद्व्रतिनं पुरः । स दृष्टो

ब्राह्मणं प्राह वियोगस्ते भविष्यति । किंत्वं विजयदत्तेन भविता च समागमः । श्रुत्वेत्यवासशर्वर्यां शून्यदेवालयान्तरे

सभार्यः ससुतो विप्रः सदूराध्वश्रमाकुलः । अशोकदत्तः सहसा ब्राह्मणी च निरंतरं । निद्रामवापतुः सर्वे दुःखवि

स्मरणौकसं । ततो विजयदत्तोभूद्भृशं शीतज्वरार्दितः । फालोत्फालनतुः क्षिप्रं स्थले मत्स्य इवाहितः । गाढं पित्राव

७७ शूद्रोपि शीतं तत्याज नैव सः। यत्नात्स्नेहगृहीतोपि मात्सर्यमिव दुर्जनः। ययाचे वह्निमेवासौ पितरं दीनया गिरा। मध्ये श्मशानमा
77 लोक्य दूराद्देवचितानलं। पुत्र पित्रा सजनकश्चिताग्निः स्पर्शदूषकः। अमंगलो न सेव्योयमिति प्रोवाच तं पिता। दंतवीणा
स्फुटद्दन्तो रोमाचोद्धूतविग्रहः। शीतज्वरार्त्तस्तद्वह्निं पुनः पुनरयाचत। पुत्रस्नेहाभिभूतेथ समाहर्त्तुं गते सति। गोविं
दस्वामिनि संनते दारकोप्यन्वागाद्द्रुतं। स प्राप्य तापविचटद्विकीर्णास्थिचितां चितां। स्वालिंगन्निव सावेगं शनैर्निर्वृ
तिमाप्तवान्। ततः सोवाच पितरं तातेपदं परिवर्त्तुलं षट्टीप्रनरमाभाति वह्नेर रक्तांबुजोपमं। श्रुत्वेति तनयं प्राह
ब्राह्मणो वीक्ष्य तत्पुरः। एतत्कपालमनलज्वालावलयवर्त्तुलं। द्विजस्य सूनुः श्रुत्वेति काष्ठयेराजघान तत्। ये रा. म०
न तत्स्फुटनोद्गीर्णवसासिक्तमुखोभवत्। आस्वाद्यैव समादाय तत्कपालं समाकुलः। पीत्वा वसां महाकायो बभू ७७

वातिभयंकरः। सोऽभूत्त्र्यक्षकटदंष्ट्राग्रविकटो निशि राक्षसः। यस्माट्टहासेन दिशश्चकंडुः स्फुटिता इव। तस्मिन्नेव गात्त्र
माविक्रम्य पितरं हंतुमुद्यते। मा कृथाः साहसमिति प्रादुरासीद्वचो दिव। तत्काजनकमाकाशमाविश्य प्रययौ ज
वात्। कपालस्फोटनामायं समाहूतः सराक्षसैः। प्रातः स्वं तु वियोगाग्निदह्यमानस्ततो द्विजः। स भार्यो विललापोच्चैः
कारुण्याद्वीक्षितो जनैः। समुद्रदत्तनाम्नाथ वणिजा दुःखकर्षितः। समाश्वास्य गृहं नीत्वा कृतो निजधने विभुः। स्म
रन्महाव्रतिवचः पुत्रसंगमलालसः। स तस्थौ वणिजो गेहे मनोरथशताकुलः। अशोकदत्तः शास्त्रार्थकलाविद्या
विशारदः। द्वितीयोऽथ द्विजसुतः प्रख्यातो नगरेऽभवत्। अत्रांतरे नरपतिः प्रतापमुकुटाभिधः। समायाते महामल्ले
तद्युद्धायाजुहाव तं। अशोकदत्तस्तं भूपपुरो बलवतां वरः। दाक्षिणात्यं महामल्लमपातितमपानयत्। तत्कर्मतुष्टो

७८ यन्नृपत्वं चक्रे भाजनं श्रियः । विचित्रकर्मातिशयैः किमलभ्यं महात्मभिः । सेवाविदग्धः सततं चाटूक्त्यालापो दिवानिशं । छायेव तस्थौ
नृपतेरेव स्थोचितसन्नतिः । अथ कालेन भूपालः शिवाचार्यैर्विनिर्गतः । दूरात्प्रदोषसंध्यायां शुश्राव विजने गिरं । राजन्न
ल्पापराधोहं शत्रुप्रेरणयासकृत् । दंडपालेन निहितः शूले निष्ठुरचेतसा । दिनमद्य चतुर्थं मे शूलस्थस्यैव जीवतः
प्राणाः सुखेन निर्यान्ति न हि दुःकृतकर्मणां । तृषा मां बाधते तस्मात्तां निवारय भूपते । श्रुत्वेति राजा कारुण्यादिदेशा
यस्थितं द्विजं । अशोकदत्तो प्यादिष्टः क्ष्माभुजा दिशि धैर्यभूः । ययौ कलशमादाय श्मशानं भीरुघट्टनं । स तत्र शूलशी
तस्य ददर्शाधः स्थितां वधूं । दिव्याभरणरोचिष्णुप्रभां सिद्धिमिवात्मनः । सा प्राह वल्लभोयं मे राज्ञा शूले समर्पितः । अ एम०
र्थी निवाति कृपणः प्राणान्पश्य न मुंचति । अस्यानुमरणोद्युक्ता स्थिता हं विजने निशि । तृषितो याचिते वारि मामयं ७८

वध्ययन्मुक्तः।शूले प्रोतोद्धतयौवंदैवान्नवमिवेश्वरं।नास्मि पाययितुं शक्ता जलमेनमधस्थिता।अशोकदत्तः श्रुत्वे
ति करुणाश्चिरुवाच तां।मातर्मे त्वं कथमाहह्य देह्यस्मे शीतलं जलं।श्रुत्वेति तिनस्त्र वपुषसा पद्भ्यामारुरोह तं।प्रत्यग्रं
निपतद्भूमौ रुधिरं च ददर्श सः।उन्नानवदनो दृष्ट्वा भक्ष्यमाणं तयैव तं।अशोकदत्तो जग्राह तस्याः पादं सनूपुरं।सा
त्यक्त्वा नूपुरं शायाद्धद्धरत्तं विहायसा।द्विजात्मजस्तदादाय प्रययौ च नृपांतिकं।तद्वीरचरितं ज्ञात्वा ददौ तस्मै मही
पतिः।सुतां मदनलेखाख्यां मनालेख्यामिव श्रियं।कदाचिद्दयितं दिव्यनूपुरं वीक्ष्य भूपतिः।तुल्योऽस्यान्यः कु
तः प्राप्य इत्याहोत्कलिकाकुलः।अभिप्रायं नरपतेर्विज्ञाय कृतनिश्चयः।श्मशानं नूपुरहारी स पुनः प्रययौ
द्विजः।विक्रीणानो महामासं मंत्रात्कष्टमहाशवः।गृहाणेत्यश्रुयावाचाचचारश्चावयन्दिशः।नत्ररा रक्षसक

७९ न्याभिः संगतः सत्वसागरः। कामिनीसमंमासाद्य पत्न्याभिज्ञागवाप्तवान्। ममैवासौ पुरानीतस्त्वयावीरेंद्र नूपुरः। गृहाणरत्नरुचिरं हि ती
यमपि नूपुरं। इत्युक्त्वा नूपुरं तस्मै सा हृतं चददौ प्रियं। यत्पुरः कांतिदारिद्र्याद्दिनिद्रो निशि चंद्रमाः। विलासालंकृतमदांलंकृतविभ्र
79 मं। आकरालंकृतानगोमनंगालंकृताकृतिं। विद्युत्केशीहृतां प्राप्य सतां विद्युत्प्रभाभिधां। हेमाब्जं नूपुरं तत्र पुनः प्रायान्नृपांतिकं।
राजा प्रतापमुकुटो नूपुरप्राप्तिनंदितः। कमलाकेलिकमलाकारं प्रापत्तदंबुजं। राज्ञः शंकरव्रजायै ज्ञात्वान्यकमलार्पितां। अ
शोकदग्नः प्रययौ पुनर्भक्तचंरी प्रति। तं याचमानं हेमाब्जं साश्वश्रूः प्राह राक्षसी। त्रिघंटनाम्नि हिमवच्छिखरे त्रिपतिर्मम। लं
वजिह्व इति ख्यातस्तेन तत्राप्तमंबुजं। प्रभोः कपालविस्फोटनाम्नो राक्षसभूपतेः। इति तद्वाक्यमाकर्ण्य पनयमां राक्षसप्रभोः राम०
तस्य हेमांबुजसरोजगादेति द्विजात्मजः। तयाविहायसानीतस्ततस्त्कांचनं सरः। जघान रक्षो रक्षांसि समारुतिरिवापरः। स्व ७९

यंकपालस्फोटोथ निहताशेषराक्षसं ।तं ददर्श सरस्तीरे शापं दत्त्वेव चात्यजत् ।शापमुक्तः परिज्ञाय भ्रातरं संमदाकुलः ।भ्रातर्वि
जयदत्तोहमित्याह प्रणनाम च।अभवं राक्षसपतेरहं सेनापतिश्चिरं ।गंधर्वैर्निहते तस्मिन्नवापं तत्पदं ततः ।अधुना मुक्तशा
पोहं स्मृत्वेत्यनुजभाषितं।अशोकदत्तः स्वजनैः संगतः प्रापनिर्वृतिं।प्रज्ञप्तिकौशिकाभिख्यो विद्याधरपतिस्ततः ।तौवभाषे
युवां पूर्वं विद्याधरकुमारकौ ।गालवस्य मुनेः कन्यां दृष्ट्वा कामवशंगतौ ।तच्छापान्मर्त्यजन्मेदं युवयोः रूपितं च तत् ।गृ
हीतमधुना विद्यामित्युक्त्वा विततार सः ।ततो विद्याधरपदं प्राप्य तौ सह बांधवैः ।गोविंदकूटनामाद्रिं दिव्यं च व्योमगं पु
रं।ननंदतुस्त्वमप्येवं प्राप्तः शंके प्रियः पदं। अशोकदत्ताख्यायिका॥ ॥श्रुत्वेति मातुलसुतादपरेद्युरुपेत्य तं।सत्यव्रतं
दासपतिं शुश्राव निजवांछिते।चिरकूटाख्ये द्वीपे समुद्रेण प्रतिष्ठितः ।विष्णुस्तद्वादशीयात्रासमाजे बहुसंगमे ।सर्वद्वीपाग

८० नजनैः शंके सा ज्ञायते पुरी। श्रुत्वेति दाससहितः शक्तिदेवोम्बुधिं ययौ। व्रजन्पोतेन जलधौ द्विजं दत्ताभिधोभ्यधात्। इदमा
४० वर्त्तसंघट्टमहावेगतरंगिभिः। वालवाग्नौ प्रवहणं शीघ्रं धिपो वितनो तस्मिन्नमज्जं क्षेपाति तं ते महानिलैः। अयं महावट
तरुर्जले दिव्यस्थलेरुहः। शाखामस्यावलंबस्व नाहं शक्तो जरान्वितः। इत्युक्त्वा विटपालंवितनो तस्मिन्नमज्जत सः
धन्यं पुराप्रवनामेव परार्थे जीवितव्ययः। ततस्तरुलतासक्तो निशि शोकोनलाकुलः। ददर्श तं महावृक्षं महाकायैः
खगैर्वृतं। तेषामेको गिरीन्द्राभो जरठापुरिवजर्जरः। अवदन्मानुषगिरा गत्वा गमकथांतरे। श्वयंपुत्रा नो गंतारः प्रा
तर्वेगाद्दिशो दश। गंतव्या कांचनपुरी दृष्टे न तु मया चिरात्। अपि गंतुं न शक्यासा तद्यूयं यात माचिरं। श्रुत्वेति दा राम०
सनिधनं स शोकोपि जहर्ष सः। पुंसां स्वकर्मवैचित्र्यान्न दुःखं न सुखं सदा। ततः प्रविश्य पतद्वक्तुः पक्षांतविवरोदरे। ८०

तद्वेगपातात्सन्नृपेन्द्रः प्राप सपुरीं हरणात्। ततस्तां कांचनपुरीं कांचनस्तंभमनोरमां। कौतुकानां कुलगृहं निधानं सर्वसंपदां।
मनोरथैरप्यगम्यामप्राप्यां पवनैरपि। प्रमोदनिर्भरो दृष्ट्वा ददर्श ललितांगनाः। नीतः प्रियंवदस्ताभिः संभाष्य म
णिमंदिरं। विद्याधरेंद्रतनया ददर्शानंगमंगलां। लीलाशिखिशिखंडाभनेत्रच्छायावतंसकीं। पुनः श्रीकंठशव
राङ्गतामिव पार्वतीं। तारुण्यकुंजरारूढां विलासकमलाकुलां। मूर्त्तामिव मनोजस्य त्रैलोक्यविजयश्रियं। दि
ङ्मुखमंडलावण्यलुंटाकैरधरांशुभिः। बालातपैरिव स्पृष्टां कामकेलिवनस्थलीं। अदभ्रविभ्रममहीं नेत्रामृततरं
गिणीं। विलोक्य शक्तिदेवस्तां विस्मयादित्यचिंतयत्। विभ्रमाभरणं रूपं लावण्याभरणं वपुः। अहो बालकुरंगा
क्ष्या विलासाभरणस्थितिः। निवेदितात्मवृत्तेन म प्राप्तसत्कारसंपदा। दृष्टा निजकथांते न साबभाषे शुचिस्मिता।

६१ पिता मे शशिखंडाख्यः श्रीमान्विद्याधराधिपः । चतस्रस्तनयास्तस्य ज्येष्ठा तासामहं विभो । अहं चंद्रप्रभा नाम चंद्रलेखा ममानुजा ॥
४१ शशिप्रभा च हुमते शशिलेखा चस्तुप्रभां । शापाद्योग्यतपसो मुनेर्मर्त्यत्वमागताः । जातिस्मरा भगिन्यो मे वभूवुः शोकदाः पितुः
ततः खात्यक्तराज्योथ याते ताते तपोवनं । इहास्थिताहमेकैव भगिनीसंगमाशया । गौरी पुरा मामवदन्मानुषस्ते भविष्यति । प
तिर्विद्याधराधीशपदं प्राप्यानुज्ञास्यते । भवानेवाभिरचितो जनस्यास्य मनोगतः । पित्रे निवेदयाम्येतत्स्वाधीना न हि कन्यका ।
त्वत्संगमे गुरोराज्ञां प्राप्तुं गच्छाम्यहं वनं । विनोदयेथा हृदयं त्वमिहैव क्षणांतरं । उर्ध्वमंदिरपाली च द्रष्टव्यानेव तु त्वया । इत्यु
क्त्वा प्रययौ कांतालिंपती कांतिभिर्नभः । कौतुकाकुलितः सोथ प्रविष्टो मंदिरावली । ददर्श योषितस्तिस्रः शयाना गतजीवि राम०
ताः । दृष्ट्वा गदे शेषु पर्यंकेष्ठच्छचीनपटावृताः । सजीवा इव हारिण्यश्चित्रस्था इव निश्चलाः । सर्वे मंमुकमुद्घाय ददर्शौ कांतम ६१

घमां। जित्वा जगत्स्मृतिभुवा न्यस्तां चापलतामिव। स्वयं कंदर्पगृहिणी प्रतिष्ठां तत्र शंसिनीं। अधिवास इव न्यस्तां शयने कांतिदे
वतां। ततः कांचनलेखां तां परिज्ञाय महीपतेः। परोपकारिणः पुत्रीं प्रदध्यौ विस्मितः क्षणं। विरहीवानलालोल प्रवासव्यस
नांबुधौ। यत्कृतेहं निपतितः सैवेषा मन्मथौषधी। इंद्रजालमिदं किंस्विदथवा स्मरवंचना। ध्यात्वेति शक्तिदेवोथ क्रमेण
न्यां ददर्श च। तां दृष्ट्वा विस्मयाविष्टो मंदिरेभ्यो वहत्यसः। अपश्यद्दिव्यतुरंगं भास्करस्येव विस्मृतं। खुरेणोत्सारितस्तेन प
तितः सरसीजले। वर्धमानपुरोपांतादुन्ममज्ज ससंभ्रमः। स्वप्नदृष्टमिवाश्चर्यं मन्यमानोतिदुःखितः। भ्रांत्वा नगरवीथीषु रा
जद्वारमवाप्नवान्। दृष्टा हेमपुरी येन लक्ष्यते सन्नृपात्मजां। पुनः स्मृत्वेति पटहं प्रतीहारमुवाच सः। सा मया कांचनपुरी दृष्टा
राज्ञे विवेद्यतां। इति तस्य प्रतीहारो वचः क्ष्मापं व्यजिज्ञपत्। न्यस्तः कनकलेखायै शक्तिदेवोथ भूभुजा। मया दृष्टा पुरी

८१ न्याहसत्यात्मशतिप्रबोधिकं । असत्यवादी धूर्त्तोयंपुरस्मामिति तिरस्कृतः । परोपकारितनयाप्राहेतिकृपादुःखिता । शक्तिदेवोवदत्तत्र
82 त्तु दृष्टाचंद्रप्रभाभुजः । तिस्रः कनकपुर्यां त्वं तासांमध्येमपेक्षिता । जातिस्मरानिशम्येतिराजपुत्रीकृतादरा । तस्मात्जमानुषंदेहंनि
र्म्मोकमिवपन्नगी । प्रयातांकांचनपुरीं तांविलोक्यविहायसा । अनुगंतुमशक्तोसौ बभूवभृशदुःखितः । पुनरध्यवसायैकस
हायः पुरसंचयात् । ग्रामारण्यनदीशैलांल्लंघयन्प्रययौशनैः । विटंकपुरमासाद्य तमेववणिजंपुनः । समुद्रमत्स्यनामानंद
दर्शात्यंतविस्मितः । नीरोगः फलहकेनाहंभग्नेपोतेनदांबुधौ । पित्रायदृष्ट्यापश्चेनवीक्षितोद्वीपगामिना । इतितद्वाक्यमाकर्ण्य
कथयित्वानिजांकथां । तत्कल्पितप्रवहणः शक्तिदेवांबुधिंययौ । द्वीपमुत्पलकंप्रापददृशेः सत्यव्रतात्मजैः । अनेननःपि रा म०
तानीतोहतोवेत्यभिभर्त्सितः । तद्वाक्यात्पितरंज्ञात्वा वडवाग्निपतंगतं । यातंतेनस्कुधाविप्रंयाग्येपशुमकल्पयत् । सगा ८२

ढनिगडाबद्धाः स्वप्ने कात्यायनीवरात्। ज्ञात्वा विद्याधरीं गूढां भेजे सत्यव्रतात्मजां। विमुक्तबंधनः प्राप कन्यां विंदुमतीं सुतां। गोमांसभा
रनम्नां स ददर्श स्वप्ने च पथि। दासपुत्री च तं दृष्ट्वा हर्म्यस्था प्राह वल्लभं। गवां गरसलेशीनजातास्म्यनुचिते कुले। गोमांसभक्षणा
त्पापान्नजाने यांति कां गतिं। धेनुस्नायुमयी तंत्री मयाद्य तेन खंडिता। वीणाविनोदे तत्पापादियं मे दाससंगतिः। श्रुत्वेति स्वक
थां दृष्ट्वा शक्तिदेवेन सावदत्। भविष्यत्यपरा भार्या तचांतर्गर्भपाठका। यद्देवास्मत्कथामेतां ध्रुवं ज्ञास्यसि वल्लभा। इति विं
दुमतीवाक्यं श्रुत्वा विप्रः सकौतुकः। वहिः कलकलं श्रुत्वा निर्ययौ सज्जकार्मुकः। ततः पुंजीकृतजनं दंष्ट्रिणं कज्जलछ
विं। सेंदुलेखमिव ध्वांतमपश्यत्सूकरं पुरः। तं जघान हतोनेकजनं तीक्ष्णेन पत्रिणा। स च तच्छरनिर्भिन्नो विवेश विपुलं वि
लं। क्रोडानुसारी सहसा शक्तिदेवो रसातलं। प्रविश्य तस्य नगरीं वापीं कन्यां च दृष्टवान्। न माह कन्यका दैत्यः सूकरोयं त्वया

८३ 83 हृतः। अद्यैवास्मि हृता तेन राजपुत्री जनद्विषा। प्रभो गृहाण मे पाणिं तुल्योसि मम वल्लभः। इत्युक्तवाक्यां तां प्राप्य स जगाम यथागतं
ततस्तां विडुलेखाख्यां कालेनालोक्य गर्भिणीं। ज्येष्ठां विडुमती प्राप शक्तिदेवं रहस्थिता। अस्याः पाटय गर्भं त्वमिति श्रुत्वा विक्लू
णितः। ससमेत्यापरां कांतामभूद्ध्यानपरायणः। सावदत्तिवन्नमालोक्य दयितं सस्मितानना। प्रियपाटय मे गर्भं विडुमत्या वचः
कुरु। श्रुत्वेति विडुलेखायाः शक्तिदेवोतिविस्मितं। सर्वज्ञां मन्यमानस्तामुवाच रचितांजलिः। नृशंसकर्म पापिष्ठं कथमस्म
द्विधो जनः। कुर्यात्त्वं च कथं ज्ञात्वा तत्पापमनुमन्यसे। इति प्रियतमेनोक्ता विडुलेखावदत्पुनः। नैतदश्रेयसे कर्म शृणु चि
त्रकथामिमां। कंचुकस्थाननिलयोदयोदेवदत्तः पुराद्विजः। द्यूतापहारिताशेषधनो वभ्राम भूतले। महाव्रतिनमासाद्य जाल राम०
पादाभिधं ततः। तेनार्थितो वभूवासौ तन्मंत्रोपरिसाधकः। तेनादिष्टस्तदा गत्वा श्मशानं वटशाखिनि। पूजां कुरु हुम धूपाद्यैव ८३

लिप्सूर्णां प्रयच्छति। निष्पन्नसिद्धिः कालेन प्रविश्य स्ववटान्तरं। लेभे यक्षसुतां कान्तां सिद्धिं मूर्तिमतीमिव। हिरण्यवर्णां नाम सुतां

तनयां यक्षभूपतेः। विद्युन्मतीसमां मञ्जु जालपादान्तिकं ययौ। जालपादोथ तं प्राह सिद्धिज्ञो हर्षसंस्तुतः। गच्छ गर्भस

मुत्पाद्य तस्यास्तूर्णं समानय। महाव्रति वचः श्रुत्वा ययौ यक्षसुतान्तिकं। स पापकर्मनिर्विण्णो नोचे किंचिदधोमुखः।

विज्ञाय तदभिप्रायं प्राह यक्षसुता द्विजं। क्षिप्रं पाटय मे गर्भं मा स्म भूः संशयाकुलः। नच्छुत्वाप्पतिकाहरण्यान्नचका

रत्नशं स एव त। यदा तदास्यै मे सा गर्भं पाटयित्वा स्वयं ददौ। प्राप्यते भक्षयित्वे तद्विद्याधरगतिः प्रभो। इत्युक्तः स तदा

गत्वा तद्गर्भं प्रतिनेददौ। जालपादोपि विधिना भुक्त्वा तं गर्भमात्मना। विद्याधरगतिं प्राप्त एक एवान्यवंचकः। वंचि

तो देवदत्तोथ निष्पेषचरुभक्षणात्। जालपादेन भूमिष्ठस्तं ददर्श नभोगतिं। वंचितोहं कृतघ्नेन ध्यायन्निति स दुःखि

८४ 84

तः।दत्वास्वमांसंविदधेवीरोवेतालसाधनं।वेतालवाहनोगत्वादेवदत्तोविहायसा।विद्याधरपदंप्राप्यजालपादमवाप्तवान्।यक्षजातिविमुक्तां

चशप्तांवैद्याधरंपदं।विद्युन्मतीमवाप्यासौजालपादमपातयत्।वेतालबलविभ्रष्टेमहाव्रतिनिसद्द्विजः।विद्याधरोबभूवैवंतत्राप्यलिपु

रःस्तुभं।स्कीवेवंशक्तिदेवोपिप्रसन्नहृदयोभवत्॥ ॥देवदत्ताख्यायिका॥ ॥क्षिप्रंपाटयमेगर्भंनेतदस्त्रेयसेनव।इतितद्वाक्यमाक

र्ण्यशुश्रावनभसोगिरं।शक्तिदेवाविचार्यैवगर्भंपाटयपाटय।राजाकनकपुर्यांत्वंव्योमचारीभविष्यसि।इत्युक्तस्तद्विधायासौत्यक्त

जीवांप्रियांपुरः।आकाशगामिनींदृष्ट्वागगनादस्तृतोत्तुनः।कंठेपीडयगाढंत्वंगर्भमेनंविनिःसृतं।श्रुत्वेतितुष्टिनागाढंतंजग्राहमहाश

यः।सतेनापीडितोगर्भःखड्गोभूत्जगच्छविः।फुल्लोत्पलनानीवयत्प्रभाभिरभून्नभः।यातायांविद्युल्लेखायांप्राहदासस्तुतापतिं।अयंख राम०

ड्गस्त्वयाप्राप्तोविद्याधरगतिप्रदः।अहंकनकलेखाख्याविद्युल्लेखाचयात्वया।शयनेविगतप्राणादृष्ट्वावल्लभतावयं।छिन्ताकनक ८४

पुर्यांसाज्येष्ठाचंद्रप्रभामम। क्षिप्रंतदेहिगच्छावः शापोसोविगतोघनः। इतितद्वचनाद्व्योमसमुत्पत्यतयासह। शक्तिदेवोययौखड्गी
पुरीं तां कनकाह्वयां। चतस्रः कन्यकाः प्राप्य स्मरसागरचंद्रिकाः। तत्र विद्याधरीभूत्वानन्दामंदविभ्रमः। शशिखंडश्रियंप्राप्य
शक्तिदेवोमहाशयः। शक्तिवेगाभिधांलेभेखड्गविद्याधरेश्वरः। इत्याससादविभवंवत्सेश्वरचिराययः। सोहमेवागतोद्रष्टुंत्व
त्सुतंनरवाहनं। सर्वविद्याभृतांनाथोदृष्टोयंतनयस्तव। स्वस्त्यस्त्विदानींगच्छामिपुनरस्तुसमागमः॥ ॥शक्तिवेगकथा॥ ॥
इतिगिरममृतौघस्यंदिनीवत्सराजः प्रियसचिवसहायस्तस्यरम्यांभिशम्य। अभवदतुलहर्षस्मेरकांतिप्रतानप्रकटितनि
जसूनुस्वच्छकीर्त्तिप्रवाहः। आमंत्र्यराजानमदीनसत्त्वोविद्याधरेंद्रोदिवमुत्पपात। कुर्वन्मुहुःकुंडलतांडवेनमार्त्तंडमाला
भरणाद्वाशाः॥ ॥इतिक्षेमेंद्रविरचितायांबृहत्कथायांचतुर्दारिकानामपंचमोलंभकः॥ ॥अतःपरंसूर्यप्रभोभविष्यति

८५
85

देवोभवःसमवत्तांभवताद्विभूत्यैयस्यावहंत्यसितभूषणभोगिभोगाः।नेत्रानलाकलितकालकलेवरोत्थयेस्तधूमपटलीव
लनाविलासं।ततःकदाचिद्वत्सेशेसर्वास्थानसभास्थिते।तत्रकांचनसच्छायमहादृश्यनभस्तलं।गगनादवतीर्याथस्रग्वी
रुचिरकुंडलः।द्वितीयइवमार्तंडःसभांविद्याधरोविशत्।सनेत्रानंदसंदोहशशांकोरुचिरांवरः।पूजितोवत्सराजेनपृष्टःप्रा
हाश्रितासनः।राजन्नशेषभुवनोद्यानचंद्रोदयश्रिया।त्वत्कीर्त्यामानसोल्लासःकस्यनामनजायते।सर्वविद्याधरेंद्राणांच
क्रवर्त्तीसवात्मजः।भविताशंकरादिष्टस्तमहंद्रष्टुमागतः।अथप्राप्तनिजोत्साहमेनंवंदामहेवयं।जनैरभ्यधिकानंदैर्वा
लेंदुरभिवंद्यते।शिखरेवज्रकूटाख्येतुषारधरणीभृतः।राजावज्रप्रभाख्योहंविद्याभिर्वज्रविग्रहः।विद्याधरश्रियंपूर्णां राम०
शासनःशिवसेविनः।सप्रभावान्त्रणामतोयाताकल्पत्रयीमम।त्वत्सुतोस्मत्प्रभुःकल्पंचक्रवर्त्तीभविष्यति।नरवाहनद ८५

न्तोसौ पुरा सूर्यप्रभो यथा। हृष्टः सूर्यप्रभकथां शशंस विद्याधराधिपः। देवीभ्यां सहितो देवस्तद्वद्भिर्मन्त्रिभिस्तथा। शृणु शक्ता मनुष्येणाय
था विद्याधरेंद्रता। मद्रेषु शाकलपुरे राजा चंद्रप्रभोऽभवत्। इंद्रास्थाने हरस्त्रीभिर्गीयते यत्पराक्रमः। सर्वभोगसमृद्धेन प्राज्याज्य
ज्वलिताग्निना। यस्तेनाथ्व वेगोक्केनयोहदं समतोषयत्। तस्य कांतिमती नाम कांतिकल्लोलिनी प्रिया। भुवि भ्रमन्मही चिरभू
न्तौ भाग्यवारिधेः। तस्यास्त्कंद इवेशस्य जयंत इव वज्रिणः। सूर्यप्रभो भवत्सूनुः प्रेतापाक्रांतभूधरः। बभूवुः सचिवास्तस्य
समग्रगुणदर्पणाः। महार्थस्य प्रभावस्य भासः सिद्धार्थकस्तथा। चंद्रप्रभो ददौ तस्मै यौवराज्यं मुदान्वितः। स्वयमेवार्पिता
धन्यैरन्वये श्रीर्विलोक्यते। ततः कदाचिदास्थाने सपुत्रं तं नरेश्वरं। दानवाधिपतिः साक्षान्मयः कार्यार्थमाययौ। तमाल
श्यामलः प्रांशुभ्रदंष्ट्रांशुशबलच्छविः। बलाकावलयव्याप्तः शारदेण्य इवांबुदः। स्फुरत्कुंडलकेयूरमौलिरत्नांशुसंचयैः

नृत्यच्छिखंडिवलयो नीलाद्रिरिव जंगमः। स पूजितो नृपतिना भेजे स्फाटिकमासनं। गजेंद्र इव विस्फारं तुषारगिरिकंदरं। नत्वे
णभूभुजा पृष्टः प्राहागमनकारणं। स्निग्धगंभीरनिर्घोषो विवर्षिष्णुरिवांबुदः। राजन्महेश्वरादिष्टः पुत्रं सूर्यप्रभं तव। प्राप्तः
समस्तविद्यानां नेतुं भाजनतामहं। विजित्य श्रुतिशर्माणमेष विद्याधरेश्वरं। विद्याभृतां चक्रवर्ती भविता शिवशासना
त्। पक्षे स्थिताः सुराः सर्वे शक्राद्याः श्रुतिशर्मणः। वयं च तव पुत्रस्य दानवाः पक्षमाश्रिताः। इति तद्वचसा राजा हर्ष
पीयूषनिर्भरः। उवाच त्वत्प्रसादेन सर्वमेतद्भविष्यति। धन्यः सुतो मे यस्य त्वं श्रेयसे स्वयमुद्यतः। त्वादृशां दर्शने नापि
भवंतीप्सितसिद्धयः। इति ब्रुवाणं भूपालं नमुमामंत्र्य तद्गिरा। सूर्यप्रभं ससचिवं पातालमनयन्मयः। तत्र तस्मै ददौ
विद्यां सानुगाय यथाविधि। भूतासनं विमानं च स्वयमेव विनिर्मितं। प्राप्तविद्यो विमानेन तूर्णमेत्य रसातलात्। ववं

दे राजतनयो जननीजनकं तथा। ततस्तेन विमानेन विचरन्पितुराज्ञया। दिक्षु स्मराकृतिः शापकन्यकाः स्वयमागताः
गांधर्वेण विवाहेन भेजे पूर्वे सुलोचनां। लावानकपतेः पुत्रीं पौरवस्य महीभृतः। राज्ञो वीरभटाख्यस्य ताम्रलि
प्तापतेः सुतां। लेभे मदनसेनाख्यां मदनोद्यानमंजरीं। चीनकोटाधिनाथस्य सुरंभाख्यस्य चात्मजां। संपूर्णचंद्र
वदनां विद्युन्मालामवाप्नवान्। सुभटाख्यस्य तनयां कोकणाधिपतेस्तथा। आससादसुधास्यंदिसौंदर्यां चंद्रिका
वतीं। जनमेजयस्य पुत्रीं च कोशांब्यां हरिरोहणां। वरपुष्पाभिधां शापजित्वा विघ्नार्थे सुद्यतं। खेचरं हरिणासा
क्षात्समरे परिपालितं। दामोदराभिधं वीरं माषार्थपुरवासिनं। राज्ञो रंभाभिधानस्य सुतां वज्रपुरप्रभोः। प्रापतारा
वतीं नाम श्यामां शीतांशुसुंदरः। तेषां महीभुजां गत्वा सानुगो गगनायगः। पुराणि क्रमशो भेजे ताभिः परिणयो

त्सवं तासनाभिः सह कांताभिः स्मरसंभोगदीक्षितः । रेजे निजपुरीं प्राप्य वाहिनीभिरिवांबुधिः ॥ ततः कदाचिदास्थानसभां पिञ्जसमाश्रितां ॥
 समेत्य पूजितः प्राह श्रीमान्मयमहासुरः । राजपुत्रि रिपुध्वंसे किमद्यापि विलंवसे । प्रतापः कुंठतां सत्यं यात्यनुद्योगमंथरः । मा
 निनां सत्त्वमहतां वीराणां शौर्यशालिनां । उत्साहारभमात्रेण जायंते सर्वसंपदः । इति तद्वचसा क्षिप्रं राजसूनुर्जयोन्मुखः । नृपे
भ्यः प्राहिणोद्दूतांस्तूर्णमागम्यतामिति । राज्ञा हृष्टेषु दूतेषु सन्नद्धेस्तं वंधिवंधुषु । सूर्यप्रभः सहामात्यावभूव समरोत्सुकः
अत्रांतरे सुरमुनिः प्रभापिंजरितांवरः । तां सभां नारदोभ्यायाद्दिदृक्षुः शतमन्युना । स प्रविश्यात्तसत्कारः संप्राप्य कनकासनं
शनैरुवाच राजानं दानवाधिपसंनिधौ । अभिधत्ते सहस्राक्षः क्ष्मापते त्वां प्रभादिनं । हृदयस्तोद्धतः किं त्वं ममाप्यप्रियमी
हसे । कुलक्रमागतोऽस्माकं श्रुतिशर्मा महावलः । विद्याधराणां तस्य त्वं प्रतिपक्षदशाश्रितः । तस्य सर्वे वयं युद्धे विजया

शशिनः स्वयं।हृदयज्ञच्छन्नताम्वासः किं हठथा नृप माद्यसि।स कथं सोढवान् राजा सहस्रशतयाजिभिः।स्पर्द्धां दधानस्त्रिदशैः कथ

मेको न लज्जते।बलवद्भिर्विरोधो हि ह्रास्यायैव न सिद्धये।विपुलो दुर्गतस्यैव धनिकस्पर्द्धया व्ययः।नारदेनेति कथितेजा

नको वैच भूपतौ।मयः प्राह स्फुरत्कोपकंपव्याकुलकुंडलः।भगवन्नपरिज्ञायवीर्यसत्त्वबलाबलं।संदिष्टं हुरराजेन त्दृदय

स्यावमानिना।सहस्राक्रतुरवायस्य गीर्वाणाः पदमाश्रिताः।स खेचरश्रियं भुंक्ते क्रतिशर्मा किमद्भुतं।किं च सूर्यप्रभज

ये सरुद्रः स्वयमुद्यतः।यदिच्छामात्रसंपन्निजगतां प्रलयोदयः।शक्रः क्रतुशतावाप्तश्रीरित्येतदघ दुच्यते।तत्रक्रमः क्रतु

नीमवाप्य द्विशडंबरः।किं यज्ञैर्विपुलायासैः किं व्रतैः कायशोषणैः।निर्व्याजसेवा सुलभाभक्तिर्येषां महेश्वरे।पद्

याते छिन्नाधूयमस्मद्वैरिकुलेषु यत्।तत्र शंकास्पदं शुभ्रमत्प्रभावो विदितो हि नः।बलेन वञ्चितो यत्र बलिस्तत्र स्यमान

संशीर्णाति यच्च प्रसुनयस्तेन दृष्टप्रमुखा हताः । मयस्येति वचः श्रुत्वा स मामंत्र्य नृपं ययौ । भगवान्नारदो व्योम्ना चंद्ररश्मिरिवोज्ज्व
लः । ततश्चंद्रप्रभो राजा दूतैः संबंधिनो नृपान् । आनिनाय मयेनोक्तः पुत्रस्य जयसिद्धये । हरंभः पौरवो वीरः सुभटो जनमेजयः
रंभाद्यश्च तेवीरास्तत्र सूर्यो समाययुः । सूर्यप्रभं हरादिष्टः सानंदं नंदिकेश्वरः । समेत्य प्राह दिव्यां त्वं प्रियं संप्राप्स्यसीत्यथ । इरा
वती चंद्रभागासंगमं तु सतत्क्षितं । कृत्वा चंद्रप्रभं हृष्टः सपुत्रमवदन्मयः । भार्याः सूर्यप्रभस्येता जनकैर्भूमिपैः सह । तिष्ठं ति
ह्वैव पातालं प्रविशामो वयं नृप । इति दानवराजेन निर्दिष्टो वसुधाधिपः । चंद्रप्रभस्तथा कृत्वा सभार्यः ससुतो विशत् । सूर्यप्र
भे प्रविष्टेषु पित्रा सह रसातले । क्षितिश्रीः समभ्यायान्नमस्तां सुटिकाधरः । स राजपुत्रदयितास्ताः जहार विहिस्थिताः । मा राम०
यया मोहयित्वाशु नृपान्समरसंमुखान् । सुतावियोगशोकेन लक्ष्म्या चक्रिणीम्ब्रराः । नेमर्त्तुं उद्यतास्तत्र सुसुप्तुवुर्नेभ ५८

सोवचः । रक्षिताः शंकरेणैता राजपुत्रस्य वल्लभाः । श्रुतिशर्मा न सक्तोसावेन तन्मुखनिरीक्षणे । ऊचुः स्वं भजत मा सूर्यं

जित्वा सूर्यप्रभो रिपून् । करिष्यत्येव कांतानां वंदिग्रहविमोक्षणं । इति व्योम्नो वचः श्रुत्वा राजानस्ते धृतिं श्रिताः । जग्मुः शो

कं च मोहं च ववंधुः स्वजये मनः । चंद्रप्रभादयस्तेपि सानुगाः सप्रभोज्वलं । पातालगृहमासाद्य शुश्रुवुर्मयभाषितं । सू

र्यं विपुलसत्वाद्याः एषु कर्मसहं वपुः । भवतां वज्रकठिनं तुल्यं दानवभूभुजां । अत्र मा वोस्तु संमोहः स्मृत्यहं भाववि

भ्रमैः । इयं देहपरावृत्तिर्वस्त्राभरणसन्निभा । वासनानुगतो देही गृहाद्गृहमिवागतः । शरीरांतरमासाद्य भुंक्ते कर्मशु

भाशुभं । देहांतेष्वप्ययं भावो नायं नश्यति सर्वथा । धेनुस्वर्णादिदानानां फलभोगः कुतोन्यथा । जपध्यानमयं यो

गं राजेंद्र भज सांप्रतं । भोगापवर्गसंकल्पकल्पवृक्षो यतो जयः । अत्रापि श्रूयतां राजन्पौराणी व्रतिनः कथा । बभूव

८९ कालको नाम द्विजातिर्द्वितत्परः । वरं गृहाणेत्यवदत्तं कालेन प्रजापतिः । भूपालं निश्चलध्यानजय इत्यवदत्स सः । तस्मान्यव
89 रवे मुख्यास्वर्द्धे जयिनः फले । भीताः शतक्रतुमुखास्तद्विघ्नं समचिंतयन् । तत्प्रभावद्धितंत्रैरपि देवैः पुरस्थितैः । पुनः
पुनः प्रार्थ्यमानो नाग्रहात्स च चालसः । ततस्तद्धैर्यतः प्रायात्तु हि नाचलकं तरं । भवंतु मंदसंतापाह्निदृशा इति शीतलं ।
जपं तं तत्र भूपालो ब्रह्मणा प्रेरितो यतं । उवाचेक्ष्वाकुरभ्येत्य गृहाणाद्य जमद्वरं । भवान्दद्यात्तु वा महामिति श्रुत्वा स जापकः
मानी राजानमवदद्धामे वास्मि ते वरं । इति द्विजवचः श्रुत्वा सह सा क्षितियोऽभ्यधात् । प्रयच्छ मे जपस्यार्द्धमित्युक्त्वा त्रपश
यं ययौ । सहसा प्रस्तुकुले जातः कथं नु पृथिवीपतिः । उत्तानपाणिर्निर्लज्जः स हे याचकतामिति । ततो यदर्धं पायाततो वि रा०म०
वादाकुलितौ द्विजौ । तत्रैव न्यायमिक्ष्वाकुं नृपं प्रष्टुमीयतुः । एकः प्रोवाच नृपते गोरनेन समर्पिता । प्रतीपदत्तां गृह्णा ८९

तिनायमभ्युद्यताशयः। दत्तं नैव पुनर्ग्राह्यमित्यन्योप्यवदद् द्विजः। अत्रन्यायं नृपः श्रेष्ठो विचार्य ठाकुरब्रवीत्। दीय
मानं न शक्नोयात्तच्चदुर्नेयवानिति। ततो देवा नृपं प्राहुस्त्वमप्येवं विधो नृप। दत्तं योनैव गृह्णाति जयस्यार्द्धं द्विजन्म
ना। परोपदेशे सर्वोपि सदा भवति पंडितः। इति राजा हरगिरा जपार्द्धफलमग्रहीत्। ततो दिव्यविमानेन प्रययौ शि
वमच्युतं। धाम भूतपते रम्यं सुरासुरनमस्कृतः। व्ययीकृतं च संपूर्णजयस्यार्द्धमपि द्विजः। सवभूव भवः क्षिप्रं
तेजः परममाश्रितः। इत्येवं जपयोगेन दुर्लभं प्राप्यते नृप। तस्माद्भवानपि क्षिप्रं भजतां जपमुत्तमं। कालकंजा
काख्यायिका॥ ॥मयस्येति गिरा राजा पुत्रेणास चिवैस्तथा। महिष्या कांतिमत्या च सह द्रष्टुं प्राप्य हरालयं। विस्तीर्णाकारमा
लोक्य दैत्य पुत्रान शायिनं। उपविश्य राजा पास्तु निश्चलध्यानधारणः। स्तुतीर्थो नाम तत्र योमयस्य सुमहाबलः। केनापि

९० 90
हेतुनातवस्तुषु त्रिपदमास्थितः। चंद्रप्रभस्तु नृपतिर्विडंबकारणेन मम। कृत्वा देहं परित्यज्य सुनीथतनुमाविशत्। ततः सुप्तोत्थित इव सु-
नीथे दैत्यपुंगवे। ननंदुर्मयमुख्यास्ते यथाहे विहितोत्सवाः। मयभार्या सुतं दृष्ट्वा तं चिरात्प्राप्तजीवितं। लीलावती हर्षसुधापूर्ण-
नेत्रांबुजाभवत्। सूर्यप्रभमथ प्राह मयस्तज्जननीपुरः। अयं सुनीथः पुत्रो मे ययौ। चंद्रप्रभात्मतां। सुमंडीकरनामा च त्वमस्ये
व पुनरानुजः। एते महार्थप्रमुखाः सचिवास्तस्य दुर्मदाः। अवतीर्णाः क्षितौ वीराः कार्यार्थं दानवोत्तमाः। इति ब्रुवाणे दैत्येंद्रे हृष्टा-
स्तूर्णं समाययुः। संप्रहारोन्मुखा दैत्याः सर्वे बलिपुरोगमाः। ततः समभ्ययाच्छुक्रो दानवाभ्युदये रतः। इज्यमानो नमच्चूडारत्नपिं-
भैः सुरारिभिः। रत्नासनोपविष्टेषु तेषु तत्र यथाक्रमं। सूर्यप्रभेषु विजये बद्धोत्साहेषु सर्वथा। नारदः शक्रवचसा समेत्यावाप्तस- राम० ९०
त्कृतिः। उवाच सर्वे शृण्वंतु भवंतः शक्रभाषितं। वैरं सममभवत्पूर्वं भवद्भिः सह निश्चितं। शांतं तदधुना मन्ये धर्म्यमासाद्य सत्पदं

वैरिणोमित्रतांयांतिमित्राण्यायांतिशत्रुतां।कालस्यपरिमाणेनसर्वेहिपरिवर्त्तते।दीर्घःकालःप्रयातोसौप्राप्यनोकिंचिदस्तिनः
वर्त्तामहेमिथःस्नेहेनकलिःकारणंविना।किंत्वद्यश्रुतिशर्माणंविद्याधरधराधिपं।स्वयंजेतुंसमुद्युक्ताःस्वरपक्षसमाश्र
यं।सूर्यप्रभोमनुष्योसौसचखेचरसत्तमः।स्पर्द्धानयोःकथंनाममनुष्यत्वस्यैनचेद्भवेत्।मनुष्यमात्रसौहार्दान्माब्रस्रूढंयदृ
च्छया।एकात्म्यंदानववराविनाशयतनिर्जरैः।इतिश्रुत्वावदत्क्षीरोबलिर्दानवशेखरः।यथात्थभगवान्सर्वंसत्यमेतदसं
शयं।नैतन्नविदितंलोकेयदस्माकंसदृग्रहा।वर्त्ततेपरयाप्रीत्यामिथोजानातिवामनः।वैरस्यकारणंशान्तंयदेतदभि
धीयते।तत्रत्वंभवतोलक्ष्मीःकदानास्मत्सुखप्रदा।विद्याभृतांचक्रवर्त्तीश्रुतिशर्मानिजांश्रियं।युष्मत्पक्षाश्रयोमुं
क्तेविमतिर्नात्रकस्यचित्।किंतुसूर्यप्रभस्यार्थेस्वयंदेवस्त्रिलोचनः।उद्यतस्त्रिदशाःसर्वेपरिच्छामात्रभूतयः।य

९१ दाज्ञया वयं सर्वे यदि सूर्यप्रभोद्यमे। निविष्टास्तत्किमस्माभिः सुराणां विप्रियं कृतं। मोहाल्लक्ष्मीमदाद्वापि त्वमाहाद्वा श
91 चीपतिः। अनालोच्यैव वयं द्दक्तिं तत्कस्य हृदयं स्पृशेत्। अथवा भगवन्सर्वं त्वमेव शिवशासनं। जानीषे ब्रूहि नस्तत्त्वं वि
चार्यं यदिहोचितं। इति तद्वचनं श्रुत्वा मुनोयाते निहन्त्रे। सूर्यप्रभो दानवेन्द्रैः पूज्यमानो वसत्सुखं। ततो दनुजमु
ख्यास्ते चिरादेकत्र संगताः। भोगान्बुभुजिरे दिव्यान्नानारसमिरं तरान्। अनेकयोजनायाममंडलेषु महोद्याः
स्वच्छकैर्विविधच्छायैर्जांगलैः स्वल्पकूटकैः। दिव्यौषधिकृतैः शाकैः सघृतैः सुभ्रशालिभिः। त्वगेलाकेसरर
जः सुगंधिदधिपानकैः। घृतलेहैर्वैषकारैश्च भक्ष्यमंडकमोदकैः। पायसैर्मर्जिमाभिश्च दुग्धपिंडैः सशर्करैः। भु राम०
क्त्वा प्रासादमारुह्य प्राप्तमाल्यविलेपनाः। मिथोगृहीततांबूलाः कर्पूरागरुधूपिताः। ददृशुर्नयनानंदं दंत्रं दानवयो ९१

षितां पातालवासिनो दैत्या वेणुदी। गणास्तु नोचितं। ततः सूर्यप्रभस्तत्र दैत्यकन्याः सुलोचनाः। स्मरार्त्ताः स्वयमायाता भेजे
संभोगमानसः। ततः सकन्यकाः कांताः सप्तपातालवासिनां। अवापोद्वाहविधिना क्रमेण जनकार्पिताः। सुताहमिल्ल
काख्यस्य दितिसूनोः कलावती। पुत्री च मृगशावाक्षी प्रह्लादस्य महल्लिका। कांता कुमुदिकाभिख्यां डरारोहस्य चा
त्मजा। तरंगिणी तंतुकच्छस्य तनया च मनोवती। सुंदरी चंद्रवर्णा सुंदरी च बलेः सुता। एतास्ताश्चान्याश्च तावद्धः परि
णीय सुलोचनाः। नवसंभोगसुभगो भेजे सूर्यप्रभो रतिं। ततो मयेन सहितः समुत्थाय रसातलात्। जयोद्योगकृता
रंभः स गत्वा कश्यपाश्रमं। दितिं दनुं चादितिं च कश्यपं च तपोनिधिं। ववंदे विपुलानंदो वीरः पाढं तदाशिषं। अथ
शक्रः समभ्येत्य वज्रांशुज्वलितांगदः। प्रणम्य कश्यपं तत्र समयं प्राह हर्षाज्वलन्। अस्मन्न्यक्काराश्रयस्यापि वीर

९१ स्पृष्टातिशर्मणः। वार्यमाणोऽपि कौटिल्याद्विप्रियेऽत्वं समुद्यतः। उत्केतिकोपात्सोवेगं वज्रमुद्यम्य जंभहा। मयं संसारकोपेपि निर्वि
92 कारस्मिताननं। काश्यपेन सभार्येण भर्त्सिते विरते हरौ। मयो जहास निःशंकः संरंभेपि निर्विकारस्मितप्रियंवदः। शक्रेऽपयाते
दैत्येंद्रो मयः प्राप्य वरान्वरान्। सभार्यात्कश्यपमुनेः सूर्यप्रभयुतो ययौ। इरावतीचंद्रभागासंगमे प्राप्य तान्पुनः। संबंधि
नो भूमिपालान्प्रणोदथविप्रियं। सूर्यप्रभो महिष्यस्ता हृताः शत्रुकुलेरिति। तद्दुःखपावकव्याप्तं मयस्तं प्राह सस्मि
तः। अपि शत्रुकरप्राप्ता मया नवजयेऽस्तु ना। माययो नाहृता वत्स निगद्येति स तादृशो। ततः सूर्यप्रभो हृष्टः सोत्कंठः
प्राप्य वल्लभाः। भेजे निजं पुरं गत्वा भोगसुभगां श्रियं। ताभ्यो नरेंद्रपुत्रीभ्यः सकालेन ततः सुतान्। दैत्यान्संप्राप्य शौर्यश्रीकुला एम०
चारक्रमोचितान्। ततो रत्नप्रभं नाम सुतं राज्ये जनप्रियं। अभिषिच्य जयारंभव्यग्रः सैन्यैर्विनिर्ययौ। भूतासनं समारुह्य विमानं वल्ल ९१

मासखः। तेनैव दत्तं विधेश्च सह सर्वैर्नरेश्वरैः। सुनीथमथ निर्दिष्टं हिमवत्यास्वमेत्यसः। सुमेहं नाम सुहृदं चक्रे विद्याधराधिपं। अं
शं सुवाससं नाम शंभोस्तेजोमयाकृतिं। कुमारं रणसाहाय्ये भेजे सूर्यप्रभस्ततः। तस्याभूत्कटकोर्वंघो गजवाजिरथाकुलः। अशी
तियोजनायामो नरखेचरसंकुलः। वल्मीकात्खं समासाद्य दिव्यदेशं क्रमेण सः। विकटं जगराकारं चापं तूणमवाप्नवान्। अ
क्षयं तूणमासाद्य धनुर्दिव्यं च तद्विधं। विमानं च महापद्मं भास्करात्सप्तचौषधीः। मृतसंजीवनीमुख्याः सुहागर्भेज्ञयोत्सु
कः। श्रुतशर्माणमाकर्ण्य दूतवाक्याद्रणोन्मुखं। प्रतस्थे समरारंभदुंदुभिध्वानमंथरैः। सैन्यैर्गजघटाघंटाघनगंभीरविभ्र
मैः। प्रस्थितं तं समभ्येत्य सुवासाः खेचरैर्वृतः। प्राह सूर्यप्रभं यत्नात्स्थितं सुतवेसेनिकाः। देवासुराणां समरः सुघोरोऽयमु
पस्थितः। क्षीरोदमथने पूर्वं प्राप्तश्रीचंद्रकौस्तुभैः। पीयूषलुब्धैरमरैर्दैत्यानामभवत्कलिः। सदा वद्धवला देवा दैत्यानां

९३ क्रूरयोधिनां।तैःसहाक्षिप्तरणोत्तावदप्रमादंविधेहिनः।एवंस्तुवासवोवाक्यंश्रुत्वामूर्ध्नाभिनंद्यच।त्रिकूटकटकेप्रापनगरींश्रुतिशर्मणः॥
93 ततोविनिर्ययौकोपात्सज्जीकृतवलांबुधिः।श्रुतिशर्मासहामात्यैर्विमानेनक्षतुर्द्धरः।अथव्यूहेष्वनीकेषुप्रवृत्तेसमरोत्सवे।आय
युस्त्रिदशाःसर्वेव्योम्नाशक्रपुरोगमाः।प्रह्लादबलिमुख्याश्चदैत्यवीरामयानुगाः।समापेतुःसंप्रहारेसूर्यप्रभजयैषिणः।ततोवि
द्याधरेंद्राणांद्वंद्वयुद्धमभून्मिथः।मौलिरत्नपतद्बाणस्फुलिंगधवलाकुलं।केकारैश्चापदंडानांपत्रिकाणांचसूत्कृतैः।रणोते
श्चक्रपाणानांव्योमरंध्रमपूर्यत।अर्द्धचंद्राग्रनिर्लूनैर्विद्याधरमहीभुजां।वक्त्रैर्वभासेवसुधाविकाशिकमलैरिव।दामोदराद
यस्तत्रसविंशाःश्रुतिशर्मणः।चक्रुःसूर्यप्रभानीकंशरजालनिरंतरं।अथापरैःक्षिरचितंचक्रव्यूहंरणोपरैः।सूर्यप्रभगिरावी रा॰ म॰
रःकुमारस्तूर्णमाविशत्।तस्मिन्नविदारितेव्यूहेद्विषतांत्रिदवौकसां।सूर्यप्रभादयःसर्वेविविशुःप्राज्ञवंवलं।महावीरक्ष ९३

येतदुक्तांतवितितोत्सवे। युद्धं विद्याधरेंद्राणां निर्मर्यादमवर्त्तत। तेषां सेनासमुद्राणामचलैः कुंजरादिभिः। क्षोभिता
नां वभुः खड्गाः कालकूटच्छटा इव। तं सर्पिद्व वलोर्मीषु छत्रफेनौघपांडुरा। रक्तोर्मीनागजग्राहा रणोरक्ततरंगिणी
नतो दिनांते विपुलव्यायामस्रस्तकंटकाः। अवहारं मिथश्चक्रुः समरेंगुलिकाधराः। निशि सूर्ये प्रभो वीररसोत्सा
हपरायणः। लेभे न निद्रामासन्नविवाह इव बालकः। विनोदिनीं कथां कांचित्कथयेत्यथ सादरं। पृष्टः सूर्यप्रभे
ण हस्तहृद्धीतभयाभिधः। उज्जयिन्यां महासेनो बभूव वसुधाधिपः। तस्याशोकवती नाम सुंदरी दयिताभवत्
गुणशर्माभिधो विप्रः सचिवस्तु गुणाधिकः। विद्यानां च कलानां च केलिसौध इवोन्नतः। तं कदाचित्सविस्रं
भो राजा भार्यासखो रहः। प्राह दर्शय मे नृत्तं नृत्तज्ञोसीति सादरं। सोब्रवीद्राजमहिषीपुरः कथमहं प्रभो। नि

९४ 94 ल्पितोऽनल्पकद्द्वप्रभवामित्वदीक्षिते। अहं सर्वकलाभिज्ञः पश्य मे कौतुकं परम्। नृत्तं सुललितं वस्त्वयोषितामेव शोभते। वदन्निति
नेत्रेण्डेण निर्वेधात्स पुनः पुनः। प्रार्थ्यमानः शनैर्नृत्तं कलास्वसमदर्शयत्। कौशिकाकोमलं लास्यं वीरोदारं च ताण्डवं। स
र्वरागानुगं गीतं वीणां च स्फुटमूर्छनां। ततस्तस्य समालोक्य पुष्पे शोरिवमंत्रिणः। तत्राशोकवतीदेवी स्मराईहृदयाभव
त्। अभिलाषरसावेशं निगृह्य नृपमब्रवीत्। साप्येकावत्सराणियिनं तत्कालोचितविभ्रमा। अभ्यर्थ्यैनं येनायं देव शिक्ष
यति कुरंगात्। मां मंजुसारणां वीणां स्वरस्फुतिविचक्षणः। इति देवीगिरा राजा गुणाग्रामोऽर्थितश्चिरं। प्रातः शिक्षयि
तास्मीति निगद्य स्वगृहं ययौ। स्निग्धां दृष्टिं समालक्ष्य शंकितो राजयोषितः। विवेशान्तःपुरं प्रातर्वीणां शिक्षयितुं रम०
स्वयं। अंके वीणां समादाय तत्पुरः सा समाकुला। शशंस हि विकारैस्स्व भ्रूविलासैः स्वहृद्गतं। विदग्धानां नरवायेण ९४

संज्ञां मन्मथकातरां गुणशर्मा जगादैनां देवि संदृष्टखडुनेयं। प्रभोर्भार्या त्वमस्माकं मा कथा गर्हितां मतिं। इति तस्य
वचः श्रुत्वा भज मामित्युवाच सा। कंपमानस्तनी लीलासंरंभगलितांशुका। करौ पिधाय याते थ तामनाहत्य सुं-
दरी। तस्मिन्नरेंद्रमहिषीव भूव विरहातुरा। अत्रांतरे नरपतेः प्रविश्याहारमंडपं। विषदानोद्यतं सूदं गुण-
शर्मा व्यलोकयत्। सूदं नष्टमुखच्छायं सकंपं गद्गदस्वरं। सताडयित्वापप्रच्छ भूपतेर्ड्रोहकारिणं। सोऽब्रवीन्मा-
लवेंद्रेण राज्ञा विक्रमशालिना। विषदाने नियुक्तोऽहं वैरिणास्य महीपतेः। इत्थमुक्तवति तत्कोपात्सूदे तस्मि-
न्निपातिते। कालेन मानवाधीशः स्वयं योद्धुं समाययौ। दुर्जयं तन्महानीकं ज्ञात्वा भूरनराधिकं। मंत्रेणां-
तर्हितः प्रायाद्गुणशर्मा नदंतिकं। सक्रूटसिद्धोभूत्वा तं दिवः प्राह महीपतिं। मा कथा विग्रहं राजन्महासेनेन भूभुजा। प्रणम्यैनं

९५ महासत्त्वंश्रेयसीशास्त्रसिद्धिश्रियं। उक्त्वेत्यलक्षितेयाते गुणशर्मणि विद्यया। मालवेन्द्रो महासेनं प्रसाद्य प्रणनाम तं। कृतसख्ये प्रयाते
95 ऽथ तत्पुरीं मालवेश्वरे। गुणशर्मकृतां मायां प्रशशंस स पार्थिवः। ततः कदाचिद्गङ्गायां जलकेलिरतं नृपं। महासेनं महाग्राहो जग्रा
ह गजसन्निभः। गुणशर्मा समभ्येत्य स्वामिनं प्रोज्जहार तं। ग्राहं विधाय दलशः शास्त्रेण विपुलाशयः। पुनर्दष्टं भुजङ्गेन मन्त्र
शक्त्या मजीवयत्। इत्यनेकोपकारैः सोस्नेहांई नृपतिं व्यधात्। कदाचिदथ निःशङ्कं प्राप्नमन्तःपुरं द्विजं। तं सा भूपालमहि
षी भजस्वेत्यभ्यधात्पुनः। अनादृतैव भूयोपि याते तस्मिन्नृपप्रिया। लज्जाकोपस्मराक्रान्ता सा निशश्वास भामिनी। रहः क्ष्मा
पालं समभ्येत्य सावदत्साश्रुलोचना। गुणशर्मा न वात्यन्तं प्रियो देव किमुच्यते। परं विषप्रदः सूदो हतो यत्नेन तत्स्मरणु। राम०
एककार्यनिविष्टौ तौ ततो भेदस्त्वयोरभूत्। भवत्प्रसादो यद्बलाल्लक्ष्मीवलतरं गिरा। अहं तेनाद्य विजने याचिताहं रतं ९५

सतो वल्लाद्धि वसनां कृत्वा क्रोशन्तीकाममोहितः। पाणिना मासस्पर्शस्तनयोर्जघने तथा। श्रुत्वेति मोहं प्रययावीर्ष्यासंमूर्छि-
तो नृपः। तयैवाश्वासितः संज्ञां प्राप्य कोपादकंपत। स सभामंडपं गत्वा निर्लज्जो जनसंसदि। उवाच गुणशर्माणं देवीदत्तां-
तमाकुलः। परिस्फुद्धिवचलस्य क्रोधांधो वहुधाधिपः। अस्पृष्टएवं नैव तं शक्तैः सानुगो हं तु सुघ्ययो। कृतश्रमो वंचयि-
त्वा स राजानं भटांस्ततान्। ययावलद्धिनो वेगाद्गुणशर्मा विधेर्वशात्। दक्षिणापथमासाद्य ब्राह्मणस्य निवेशनं। अ-
ग्निदत्ताभिधानस्य स विशेषहृदुःखितः। वेदवेदांतसारज्ञः पृष्टस्तेन द्विजन्मना। गुणशर्मा निजां जातिं कर्म स्नेहाज्जगा-
द तं। अहं सुलोचनाख्यायां कुले यज्वद्विजन्मनः। आदित्यशर्मणो जातो गुणशर्माभिधः स्वयं। गुह्यकीजनसंपर्का-
द्धनदस्य गृहे स्थितं। यदृच्छया मतः शक्रः प्राह मज्जनकं रुषा। प्रणाम त्वं तु समस्तेषु यक्षेषु मयि सादरं। व्यग्रस्त्वं न

९६ प्रणमसि प्रायो मामवमन्यसे। लोकपालपुरादस्मात्पतन्क्षिप्रं महीतले॥ इतिक्रुद्धवारुणो देवेंद्रो मत्पित्राथ प्रसादितः। तं शाहत्त्व त्वत्तो भू-
96 मियात्वत्तोमेवहृतो यतः। इति शापान्महेंद्रस्य प्राप्तोहं वसुधातलं। अविस्मृतानेकविद्यः प्राप्तो भूपतिमंत्रितां। महासेनाभि-
धानेन मिथ्या तेन महीभुजा। भार्यादूषितचित्तेन निरस्तोहमकिल्विषः। अग्निदत्तो न शस्येति प्रार्थितो गुणशर्मणा। उवा-
च गुणिने तस्मै दातुमस्तुद्यतः स्तुतां। श्रीमतः कार्त्तिकेयस्य जयिनस्तारकद्विषः। गुहाराणमंत्रमेतेन जहि त्वं पार्थिवाधमं
रुद्रस्य देवी हृदयेति विघ्नो भूत्तु रशासनात्। वह्नेस्तदाननेवीर्यं तत्याज च महेश्वरः। यातेन वर्षसहस्रेण तदुद्गीर्णा कृशानुना।
जज्वालसलिलान्तस्थ गंगायां वन्हराशुतं। मंदाकिन्या स तु त्यक्ते शरैर्वितेजसि दुःसहे। जातः शरवणे तस्मिन्कृत्तिकाव- रा०म०
र्द्धितः शिशुः। षडाननः समुत्थाय सुरेंद्रेणार्थितो मयात्। सेनापतिपदं प्राप्य तारकं निजघान सः। तस्मै मं प्रवरं मंत्रं त्वं ९६

गृहाणायजश्रिये। उक्त्वेति विधिवन्मंत्रं तस्मै दिश्य वरो ददौ। सुतां च सुंदरीं नाम सौंदर्यशक्तिचंद्रिकां। तां कांतां गुणशर्मा च श्र
प्यायनविलोचनां। जित्वा नृपं महासेनं तद्राज्यं समवाप्तवान्॥ ॥गुणशर्माख्यायिका॥ ॥इतिवीतभयाख्येन कथितां सुहृ
द्राकथां॥ ॥सूर्यप्रभो निशम्यैव प्रीतो निद्रां समाययौ। ततः प्रभाते सन्नद्धः स्नातः कृतजयोचितः। अवाप्य संस्थाममुं वं दि
व्यं व्यूहमकल्पयत्। अथ स्वयं शक्रमुखास्त्रिदशा दैत्यदानवैः। अयुध्यंत सुसंरब्धाः श्रुतिशर्मजयैषिणः। ततो विनि
हतान्प्रेक्ष्य विद्याधरवरान्भुवि। रत्नांसुभासुराकाराः क्षीणपुण्या इव ग्रहाः। स्वयं सूर्यप्रभस्तत्र ध्यात्वा देवपिनाकिनं। व्य
धात्पाशुपतं घोरमस्त्रमस्त्रविदां वरः। तेन बध्वा सहामात्यं श्रुतिशर्माणमाहवे। हरुंकारविध्वस्तान्देवान्सूर्यप्रभो जयत्। त
तः शिवाज्ञया सख्यं विधाय श्रुतिशर्मणा। सजयश्रियमासाद्य ननंद सह बांधवैः। प्रह्लादतनयां तत्र कामचूडामणिं ततः

परिणीयाभिषेकाय सभायामृषभाचलं। साक्षाद्दिलोकपहे रंवं प्रणतो विघ्ननायकं। गौरीपतिं च सानंदो भेले निर्दिष्टितिसुत्तमां। सुमेरुप्रमु
९७ खोऽस्तत्र विद्याधरधराधिपैः। शुक्रादिभिर्गुरुवरैर्मयमुख्यैस्तथासुरैः। मुनिभिः काश्यपमुख्यैरभिषिक्तो यथाविधि। सूर्यप्र
97 भश्चक्रवर्तिश्रियं भेजे सुहृद्वृतः। कांताभिः सह सर्वाभिः संयोगसुभगोत्सवे। कृतकृत्यो रतिप्राप साक्षाद्दिवसमन्मथः
इति सूर्यप्रभेणाप्ता विद्याभृच्चक्रवर्तिता। त्वत्तुल्योऽप्यधिकां देवलप्स्यते नरवाहनः। अवाप्तविद्यमचिराद्विजिताराति
मंडलं। एवं पुनः समेष्यामीत्युक्त्वा वज्रप्रभो ययौ। सूर्यप्रभस्येति निशम्याद्भुतं वृत्तं स्थिरो हर्षसुधानिषिक्तः। देवीसु
खांभोजनिविष्टदृष्टिः यशश्शोभुत्रस्य करंकरेण॥ ॥इति क्षेमेंद्रविरचितायां बृहत्कथायां सूर्यप्रभो नाम षष्टो लं एमं०
भकः। अतः परं मदनमंचुका भविष्यति॥ ॥मुखे लेखा धनुगुणनतं विचलितोली लाकटाक्षः शरोहासस्तस्मि ९७

तत्पुंखपद्मरचनामोर्वी। चपस्मक्षुविः। ॐकारः कलपंचमाश्रयि व चोयस्येत्थमास्तूज्यनेनेजेवं ततमानारतं सुवतिभि
कामायतस्मैनमः। सूर्यप्रभकथांक्षन्वायत्सराजः प्रियासखः। सुत्रप्रभावं कलयन्नवभूवानंदनिर्भरः। अत्रांतरे स्मरं ज्ञा
त्वानरवाहनरूपिणां। अवतीर्णावरा हं मोर्भुवं रजिरवातरत्। दयिता तु प्रतासाथ तपस्तापार्वे तीवरा ह्। कांताय त्रयथा
ता तातनदिहानी मिहोच्यते। अस्तिसं तोषजननी निर्विकारस्तुरवस्थितिः। वितस्ता मोक्षवीथी व सिद्धसेव्या महानदी।
यस्यास्तुषारनिकरस्मेरसीकरमारुतैः। पुंसांभवमरुभ्रांतितापे पापेचकाकथा। तस्यास्तटे शिलानाम तीरे स्ति हचि
रपुरी। यत्सौधकांतिभिर्व्योम्नि जायते दिनकौमुदी। तस्यां कलिंददत्तो भूत् भूपालो धर्मभूषणः। त्रिजगद्व्यापिनी यस्य
पुण्या कीर्तिसरस्वती। शशिप्रभापराभिख्यः सविहारशतैर्भुवं। लोकनाथः पवित्रक्षेपरामिव सुरावती। करुणा

९८ सर्णहृदयो नानायुक्तिनिदर्शनैः। संदेशनाभिश्च जनं व्यधात्सुगतिभाजनं। वितस्तादत्ततनयस्तस्य राज्ञः पुरे वणिक्। बभूव
रत्नदत्ताख्यो भिक्षुद्वेषी जिनशासने। भिक्षुभ्यः प्रणतं नित्यं दातारं पितरं स्तुवा। सोवदद्देव बाह्यानां धिक्त्वां निपतितं वशे
जात्याचारविहीनानां दंभमीलितचक्षुषां। भिक्षूणां धूर्तमुख्यानां धीमान्को नाम विश्वसेत्। इति पुत्रवचः श्रुत्वा दुःखि
तो भूपतिं जगौ। सन्मार्गं मत्सुतं देव स्थापयेति वणिग्वरः। नृपोप्याहूय तत्सुतं सप्रत्ययनिदर्शनैः। लोके लोकोत्त
रं धर्मानुपदेष्टुं प्रचक्रमे। तदादेशकृतिपरो न बभूव वणिक्सुतः। भ्रूभंगभीषणः क्रोधस्तमुवाच महीपतिः। अ
यं नराधमः क्षिप्रं हन्यतां हन्यतामिति। ततः संभ्रांतहृदयो वेपमानः कृतांजलिः। भीतः प्रसादयामास जनक राम०
लस्य भूपतिं। तद्वाक्यान्नृपतिस्तस्य चक्रे मासद्वयावधिं। वधे तद्वासरारंभसुह्न्नेगणनापरः। भयाद्विगतनि ९८

ड्रोथ निर्विण्णो निःसुखः कृशः। मरणं प्रत्यहं ध्यायन्क्षोकंपत वणिक्सुतः। कंकाल इव निर्मांसः सोस्थिशेषो भयातुरः। जा
ते मासद्वये मेने कृतांतं शिरसि स्थितं। ततो राज्ञा समाहूतो वधायावधिवासरे। दृष्टस्त्विं नात्र ह यस्तः स नीमो वणिजः
सुतः। तमाह राजा चकितं कृशोसि वत निःप्रभः। दृश्यसे त्वाशु शेषांगो ध्यायन्मरणजं भयं। मासद्वयावधेर्भीतो सु
खं किं परीतप्यसे। मरणस्यावधिर्नास्ति मुहूर्त्तमपि देहिनां। एवं विधं भयं नृणां सर्वे देवोपपद्यते। को हि निद्रां समा
याति मृत्युदंतांतरस्थितः। ज्ञात्वेति धर्मपंथानं श्रयदुःखौघशांतये। धर्म एव बान्धवः पुंसां संसारमकरालये। श्रु
त्वेति वणिजा पृष्टः कथं मुक्तिरिति प्रभुः। प्राह लोकोत्तरं धर्मं वक्ष्यामीति नरेश्वरः। ततस्तृतीयेह्नि पुनर्भूमि
पालस्तमभ्यधात्। आरायोत्सवयात्रायां संपूर्णे तैलभाजनं। प्रदक्षिणीकुरु पुरीं विंदुमात्रमपातयन्। पतेद्यदि

९९ ततोविंडहन्यसेरवङ्गपाणिभिः। मत्प्रदिष्टैरनिष्क्रान्ता पात्रहस्तो यथैव णिक्। समुद्यतासिभिर्भीमैः सोनुयातः प्रहारिभिः।
तैलभाजनमादाय वशाम निखिलां पुरीं। भ्रांत्वा नृपांतिकं शापभयाद्च्युतभाजनः। दृष्टः प्रोवाच राजानं देवादेशः कृ
99 तो मया। न दृष्टं न श्रुतं किंचिदुत्सवेस्मिन्महाजने। ध्यानैकाग्रेण पात्राग्रेन्यस्तनेत्रहृदयं मया। निशम्येत्यवदद्राजामो
क्षवर्त्मैतदेवयत्। सर्वतो विनिवृत्तस्य ध्यानैकाग्रमनोगतिः। इत्याग्रहेण वणिजस्तस्य कारणं तु दद्य हं नृपः॥ ॥ एत
दत्ताख्यायिका॥ ॥ एवं स सर्वजनतातारणोभूत्कृतोद्यमः। तारादत्ताभिधानस्य वभूव नृपतेः प्रिया। कुमेवोत्तमसत्व
स्य करुणोकाड्डे चेतसः। अत्रांतरे सुरेंद्रेण यात्रायां विबुधांगना। शप्ता सुरभिदत्ताख्या विद्याधररताद्दिवि। सा शक्रशापप एम०
तिता जन्मने गर्भमाविशत्। राज्ञः कलिंगदत्तस्य जायायाः स्वप्नसूचिता। देहदापांडुरमुखी रजनीवेंदुमंडिता। तारद ९९

ज्ञामवत्स्त्रीत्वं नितरामथ भूपतेः ॥ ततः सा रत्नदीपस्य शिखयेवांतराश्रिता । ददर्श राज्ञी निखिलां प्राग्जन्मस्थितिमात्म
नः । जातिस्मरा स्वरूपं प्राह पुरा मे जननी विभो । ततु लक्ष्मीः प्रियं प्राह धर्मदत्तं महीपतिं । अन्यस्मिन्जन्मनि विभो कुंभ
दासी वणिक्गृहे । अभवं देवदासस्य भर्ताभून्मम मागधः । तदा वांसर्वे दुर्भिक्षे परपिंडोपजीविनो । याचितावर्थि
नाभ्येत्य रुद्र तत्क्षामेन द्विजन्मना । दत्वा स्वमशनं तस्मै तच्छेषकृतभोजनौ । तदा मम पतिः शोकान्निधनं समवाप्त
वान् । तस्यानुमरणाद्स्मि जाता जातिस्मरा विभो । इति कोशलभूपालः श्रुत्वा जायावचो रहः । देवदासोहमेवे
ति जातिं सोप्यस्मरन्निजां । जातिं स्मृत्वा नयोर्दिव्यं धाम धर्म्यप्रपन्नयोः । पितृभ्यामथ हीनाहं मातृष्वस्रा वि
वर्द्धिता । कन्यैव ततः कश्चिन्मुनिरभ्यागतो मया । आराधितः पुरा कृत्या पार्थे जन्मसुवायथा । तद्वरात्त्वां वरं देवलो

१०० कनाथशिरःस्थितं। अमिताभभवाप्याहं प्राप्तासीमं तिनी पदं। इत्याकर्ण्य नृपः प्राह देवी सत्यवतां मतिः। अमोघाश्च तनूः
100 कामधेनुरन्येषु जन्मसु। त्वत्पिता स्तु गतिं प्राप्तः सत्वादेवप्रियासखः। सत्वप्रकाशाद्वसतिः सतां हि द्विविशाश्वती
गंगाकूले पुरा विप्रश्चांडालस्तु जराद्वितौ। चक्राते त्यक्तुमात्मानं विचिन्त्यानशनव्रतं। नियमस्थौ ददृशतुर्लो
निषादं गतं रहः। प्रत्यग्रसुस्रमत्स्यौघभोजनव्यग्रमग्रतः। द्विजस्तान्वीक्ष्य मत्स्यादाल्लौल्यादन्नोदकाकुलः। न
स्थावनशनक्लामो निगिरन्निव सस्पृहं। चंडालोपि विलोक्यैनाञ्छकुत्सयन्मत्स्यखादकान्। घ्नन्ति प्राणि राम०
भिः प्राणान्वृ धिगेतानित्यचिंतयत्। चिंतयित्वेति तौ यातौ त्रिदिवं तीर्थसेवया। जन्मांतरे क्षेत्रफलाज्जाति १००
स्मरपदं श्रितौ। पर्यंतभावसदृशं प्राप्तश्चकुलं पृथक्। द्विजोभूद्धीवरसुतश्चंडालस्तु द्विजात्मजः। सुश्रु

द्रोहिचित्तस्य जंतूनां स्युर्महदुःखते॥ ॥विप्रचंडालाख्यायिका॥ ॥उपाध्यायो द्विजः कश्चित्कुंडिने नगरे पुरा। सप्तभिः सहितः शिष्यैर्दुर्भि
क्षे क्षुधितोऽभवत्। गत्वास्मत्श्वशुरात्कौ गां गामानयत पुत्रकाः। तत्क्षीरेण स्तु वो वृत्तिरिति शिष्यांस्तु वाच सः। शिष्यास्तदाज्ञया गत्वा गु
रुश्वशुरमंदिरं। गामादाय परावृत्ताः प्राप्यांध्वं विषमेध्वनि। निराहारा निपतिताः स्वासशेषा व्यचिंतयन्। अस्मिन्महत्तटे प्राप्तो मृत्युर
स्माभिरुत्कटे। अस्मद्विनाशे गौरेषा दिनं स्थाति गुरुस्तथा। तदालभ्य विधानेन गामेतां याजिनो वयं। भुक्त्वा प्राणानवाप्स्यामस्तेषु
धर्मः प्रतिष्ठितः। चिंतयित्वेति बहुशो विशस्य विधिनैव गां। तद्यागशेषं भुक्त्वा ते शिष्या गुरुगृहं ययुः। यथावृत्तं निवेद्यास्मै
निःसंगाः सत्यवादिनः। जातिस्मरास्तद्द्वारास्ते शिष्याः प्रापुः परां गतिं॥ ॥शिष्याख्यायिका॥ ॥इति सत्त्वविशुद्धानां सत्तामा
यांति संपदः। त्यजंति सत्त्वहीनांस्तु दारा अपि निरादराः। अस्ति गौरीवनगरी चंद्रचूडस्य वल्लभा। श्रीमत्युज्जयिनी नाम जननी

१०१ जनसंपदां। तस्यां विक्रमसिंहोभूद्भूमिपालो महाबलः। निःशेषविहितारातेर्यस्य युद्धे मनोरथः। दर्प्यकंडूलदोर्दंडं तं युद्धगतमान
|0| सं। उवाचामरयुग्माख्यः कदाचिन्मंत्रिपुंगवः। देवबाणासुरः पूर्वं सहस्रभुजदुर्मदः। ययाचे त्रिपुराराति युद्धं मेदीयतामि
ति। ततो निमेद्धसर्वं ध युद्धसन्नद्धचेतसा। माधवेन निकृत्तास्य चक्रेणां भुजमंडली। अभिमानोवमानायखंडितानामिव भू
भुजां। युद्धप्रतिनिधिर्दैव मृगयास्ति नृपोचिता। मुनीनां प्रातिकूल्येन प्रमादाद्धरवाजिनां। राज्ञामतिप्रसंगाच्च मृगया
दुःखदायिनी। तस्मान्मृगरसोक्रीडां भज व्यसनवर्जितः। इति मंत्रिगिरा राजा सानुगः प्रययौ वनं। कुंजरक्रोडशरभ
द्वीपिकेसरिसंकुलं। ततः स्रुतश्रमोभ्येत्य लीलाहृतवनेचरः। विनिवृत्तो ददर्शाग्रे कथासक्तोमिथो नरौ। एकांते राम०
चिरसंलापो तो दृष्ट्वा शंकितो नृपः। चौरावितितदाह्वाने प्रतीहारमचोदयत्। प्रतीहारसमाहूतौ सर्वोस्थानं महीप १०१

तेः ।ततस्तौ ब्राह्मणौ प्रातः प्रविष्टौ भयकंपितौ । दृष्टा भयेन नरपतेस्तौ कथ्यतामिति वादिनि । तयोरेको वदत्नराजन्श्रूयतां नौ
विचेष्टितं । पितृभ्यां विप्रयुक्तो हं बालो विप्रः पुरा नृप । नियुद्धशस्त्रकुशलो द्यूतान्तदुर्मदो भवं । यानि कालेन वोढा हा मप
श्यं पथि योषितं । पुण्याधिरूढां प्रत्यग्रमंगलावद्धकंकणां । अत्रांतरे महावेगः स्फोटितालानस्तंभखलः । तां विवाहम
हावाद्यकुपितः कुंजरोभ्ययात् । त्यक्त्वा तां द्विरदत्रासात्प्रयाते ष्वनुयायिषु । गजो जिघृक्षुस्तां प्रापस्तुरखाब्जां नलिनी
मिव । दृष्ट्वाहमतिकातरणां नादेनाह्वयवारणं । वंचयित्वाश्रमाभ्यासाद्विह्वलां ताममोचयं । तस्मान्महाभयान्मुक्ता
सा वदन्मांस्तलोचना । वल्लभस्त्वं जनस्यास्य प्राणानामधुना विभुः । त्यक्त्वा प्रियेण संत्रासाधिक्षिप्तं कातरं नरं । ना
हं संदूषिता तेन न च वेक्ष्यामि तं जडं । प्रच्छन्नानुगतस्त्वं मामचिरात्सम वाप्स्यसि । इति मे संविदं कृत्वा संगता स्वजनेन सा । ययो मर्ह्टि

१०१ हं त्वद्वीमय्येवार्पितमानसा। तामेवानुप्रयातोऽहं प्रेमपाशवशीकृतः। प्रच्छन्नवृत्तिर्वेश्याशः शून्यदेवगृहे स्थितः। तत्रापश्यमहं विप्र
102 मिमं प्रच्छन्नकामुकं। तस्या भर्तुः स्वस्तु शूद्रप्रौढरोगैकभाजनं। अनेन जातसौहार्दः सततं तां कामिनीमहं। हत्वा शूद्रमिह
प्राप्तस्तापनिर्वापणौषधिं। जामिं च तस्याः प्राप्यायं तु हृन्मे निहितो भवत्। तद्दैवदेवसंलापः शून्ये भूच्चिरमावयोः। श्रुत्वे
ति तद्वचो राजा तुष्टः सत्त्वनिवेदनात्। ताभ्यां वस्तु ददौ कोऽपि हि सद्भावेन तु तुष्यति। इत्येवं सत्त्वसारेण प्राप्ता कांता द्विज
न्मना। क्लीवेन सत्त्वहीनेन कातरेण तु हारिता॥ ॥विक्रमसिंहाख्यायिका॥ ॥राज्ञः कलिंगदत्तस्य श्रुत्वेति वचनं
प्रिया। तारादत्तापरानंदसुधार्द्रवदना बभौ। अथ कालेन संपूर्णदोहदा द्युतिशालिनी। असूत सा सुतां देवी द्यौः राम०
शशांककलामिव। जातां पुत्रीं नृपः श्रुत्वा बभूव विमना इव। चिंतामूर्तिमती कन्या कस्य प्रीणाति मानसं। स १०१

चिंतास्तिमितो गत्वा विहारं शंभुमंदिरं । सुश्राव धर्मं श्रवणेन तन्मोहप्रशांतये । अहिंसा परमो धर्मः सन्यासः परमं
पदं । कारुण्यं परमो कामो मोक्षश्च परमः क्षमा । क्षमैव सर्वसत्वानां पुण्यपीयूषवाहिनी । मैत्री च सर्वभूतेषु संसा
रमरुवारिदः । पुरा तपोवनोपांते राजपुत्रः प्रियासखः । विललासानिलालोलवालन्कतलतावने । रन्तिश्रां
ते मधुमदात्तस्मिन्निद्रावशंगते । चपला राजपुत्रस्य लाविचेरुः केलिकानने । तदुपांते मुनिं ध्यानमीलितासं
विलोक्य तां । तस्थुर्मत्ता विलासिन्यः कुतूहलविनिश्चलाः । राजपुत्रः प्रबुद्धोपि प्रियादृष्ट्वा मुनेः पुरः । तं
जघानेर्ष्यायशलः खड्गेन निरवग्रहः । तेनाहतोपि बहुशः शस्त्रेणानचुकोपसः । सत्यं हि हृदि शान्तो च शमिनां स
दृशादृशः । निर्दग्धुमुद्यतां पापं तं तपोवनदेवतां । अवारयत् कृपापूर्णः सकृपासागरो मुनिः । खड्गप्रहारनिर्मूलगात्रोपि मुनि

१०३ सन्नमः। तयैवदेव्यासंस्पृष्टो वपुर्वस्त्रच्छविग्रहः। क्षमावदानं॥ ॥कुमार्यः सप्त रूपिण्यो भूपालस्य कवेः सुताः। पश्य श्मशानं वैराग्यात्त्यक्तसंसार

वासनाः। स्वजनेनार्थितोप्याकुलाः शरीरमिदं हि नः। अस्थिमांसशिराचर्मसंवीतमतिकुत्सितं। अस्मिन्काये श्मशाने च को विशेषः प्र

103 दृश्यते। पच्यंते सततं यत्र वह्निना सप्त धातवः। विरक्तो राजपुत्रः प्राह्निं यतोभिक्षुकव्रतः। दृष्टः प्रविष्टो भिक्षायै रूपवान्नृपोरयो

षिता। तं नृपमिव रूपस्य यौवनस्येव यौवनं। विलोक्य कामवशगा भिक्षादानोद्यतावदत्। अहो सुभग रूपं ते मानसामृतदीर्घिते।

वर्षतीवामृतं दृष्टिस्तव राजीवलोचनः। इति लोचनसौंदर्ये विचाराधिकसस्पृहां। तां वीक्ष्य निजमुत्पाट्य नयनाब्जमुवाच सः। च

मीवनद्धं पश्येदं वारिलोकं न लोचनं। अस्मिन्मनोहरं मातः किं कुत्सितशरीरके। इति तस्य गिरा सापि विरक्ता जिनशासनं। प्रपदे

जन्मसंतानजरामरणवारणं। वैराग्यावदानं। क। कलिंददत्तः स्कृत्वेति वज्रशो धर्मदेशनाः। अस्पृष्टो द्वासप्तवचः कन्यकाजन्म राम० १०३

दुःखितः। कुमारीजन्मना राजन् किं वृथा परितप्यसे। पुत्रैरशक्यं यत्कं हि तत्सुताभिरवाप्यते। हंसेन इति भूपालश्चित्रकूटतटेऽभवत्।
कर्पूरकरिणी पूरे भूयद्युयशः सुरयोषितां। कांतावर्गे समारं सुप्रियां तु स्वरूपगुणां विना। नविना चंद्रिका लक्ष्मीचंद्रकांतः प्रसीदति।
स निर्ममे नवोद्यानं विमानमिव गां गतं। शंके तत्स्वप्रकामस्य वसंतेनेव कल्पितं। रममाणः सदा तस्मिन्स नानाकुसुमोज्ज्वले। ननंद
नंदनगतः शतक्रतुरिवापरः। कदाचिन्नयनानंदनिस्यंदमधुवाहिनी। गीर्वाणनर्तकी रंभा तं ददर्शाद्य तां च सः। सा तं विलोक्य
सच्छायं शृंगारसुरपादपं। सर्वांगीणविनिर्माणपुण्याहमिव वेधसः। सच तां वीक्ष्य पूर्णेंदुनवलावण्यचंद्रिकां। कौशिकीर
सिकस्येव कामस्य रतिभूमिकां। बभूव तत्स्मरशरासारसंभिन्नमानसो। तत्पुष्पवने नैव सरोमोहमवेपथू। सा मानुषतनुर्भूत्वा
तमुपेत्याश्वनस्तनी। गंगेव शंतनुं भेजे हंससेनं नाककामिनी। काशीति पुच्छनीयाहं नराजन्निति संविदं। तां शापभूमिपालोभू

१०४ 104 त्स्मरसाम्राज्यदीक्षितः। रेमे मालाः सह तया रतिमानिव मन्मथः। मधुमास इव श्रीमान्नवोद्यानमभूषयत्। ततः सा गर्भमासाद्य कालेन वसुधाधि-
पात्। असूत तनयां कांतिसंतानजितचंद्रिकां। सावदन्नृपतिं नाथ स्वस्ति गच्छाम्यहं दिवं। रंभामवेहि मां देवदेवीं देवविलासिनी। सु-
ताशसवपर्गतः संगमो मे भुवि त्वया। पुनः पुत्र्याः प्रभावान्मे भविता संगमस्त्वया। इत्युक्त्वा प्रययौ व्योम्ना तडित्स्फुरितविभ्रमा। ह-
त्वा भुजंगी नृपतिं वियोगविषमूर्छितं। ततः सुलोचना नाम सा कन्या विभ्रमावनिः। प्रियासमागमाशेव ववृधे नृपतेः शनैः। तां
यौवनवतंसेन संगतांसलवकल्लनी। श्यामासपश्यद्द्युतिमान्काश्यपो हि मुनिसत्तमः। अभिलाषवतीं दृष्ट्वा स तां हारिणलोचनां॥
सुवायया चे नृपतिं स्मरस्मेरः सुलोचनां। याचितो वत्समुनिना शोवा च वसुधाधिपः। रंभावृत्तांतमावेद्य संदेविरहनिःसहः। रा म० १०४
प्रियासमागमायेयं तनया मे भविष्यति। अनीप्सुरोस्मि दानेस्या मुनेन तत्संगमावीप्से। श्रुत्वेति वचनं राज्ञो वभाषे मुनिपुत्रकः

अहं स्वतपसोर्द्धेन सशरीरस्यते दिवि । रंभासमागमं कर्त्ता देहि राजन्सुलोचनां । पुरा प्रमद्वरां जायां भृगुवंशभवो रुरुः । आयुषोर्द्धे
न डुण्डुहिदष्टामिष्टामजीवयत् । इत्युक्त्वा संगमं राज्ञो विधाय सुरपोषिता । सुलोचनां मुनिः शापस्मरणभूततरंगिणी । इति
कन्याप्रभावेन प्राप्नुवंतीप्सितं नराः । श्रापादिकारणोद्दिव्यो मर्त्येष्ववतरंति च ॥ ॥ सुलोचनाख्यायिका ॥ ॥ इति विप्रगिरा
राजा चिंतां तत्याज निर्वृतः । कलिंगसेनां तनयां पश्यन्नयनचंद्रिकां । सापितुर्मंदिरे बाला केलिलीलाविलासिनी । दृष्टा सौधस्थि
ता व्योम्ना कदाचिद्दैत्यकन्यया । मयस्य तनयानाम्नी साध्वी सोमप्रभाभिधा । कृत्वा मर्त्योचितं वेषं सख्यं चक्रे तया सह । तयोर्विस्र
म्भसद्भावात्प्रेमप्रवरालपल्लवा । संसिक्ता स्नेहपीयूषैर्ववृधे प्रीतिवल्लरी । तयोर्मेयहुताशाहतां विश्वासकथांतरे । राजपुत्रि
सुगुप्तोयं संगमो मे प्रियस्त्वया । नास्मि राजगृहे स्थातुं शक्ता प्रकटितान्वया । आशीविषगुहाघोरं राजगेहं हि दुःसहं । न

१०५ 105 गर्यांपुष्करावत्यांशूरसेनोनृपात्मजः।मित्रंवशीकृतस्तंचकेप्रणयेनापितस्तुरा।संगतोराजपुत्रेणास्नेहसन्मानकारिणा।सततंतत्प्रियहि
नव्रतः सोभूद्वशीकृततः।राजपुत्रोथजन्यर्थी यात्रायांमित्रसंयुतः।उदयाद्रिरिवप्राप्यान्तिनच्छत्रेंदुमंडलः।सव्रजन्पथिविश्रां
तः सैनिकैः सुहृदांसह।विवाहोत्कंठितोवीतनिद्रांधात्रीमभाषत।मृगणेषुहर्षजननींकथामाश्चर्यशालिनीं।इत्युक्तोवासव
द्वीवोमेजोनिद्रांसमाकुलः।धात्र्यामपिप्रसुप्तायामेकएववशीकृतः।विनिद्रोनिशिसुश्रावबालीमाकाशयोषितां॥
अहोतुराजपुत्रेणाकथितानैवसाकथा।कौतुकाद्वयमायाताः सुप्तश्चैषमदाकुलः।आभाष्यकथयामीतिमूर्खोयो
यातिमूकतां।कौतुकात्प्रोतुमायातानास्तंशयंत्येवदेवतां।हारंवर्त्मनिसंप्राप्ययदाकंठेकरिष्यति।तदातेनैवपापेनकण्ठ राम०
तांतमयमेष्यति।भक्षयित्वाम्रवृक्षस्यफलान्येषदिनंक्षिपति।अथवास्योपरिगृहंक्षिप्रमेवपतिष्यति।हुतशरद्गतेवा १०५

सजीवशब्दश्रवणं न चेत्। कश्चिद्दद्यादिति तेनैव मया यास्यत्येष पंचतां। अस्य शापप्रतीकारं यः कुर्यात्स सुचेतसः। सोपि व्यसनमा
साद्य तं संशयेन पतिष्यति। श्रुत्वेति शापान्देवीभिर्वितीर्णान्सुहृदो मिश्रः। तत्प्रतीकारसंनद्धः स बभूव वणिक्सुतः। प्रभा
ते कृतयात्रोथ राजपुत्रः सहानुगः। यथोक्तमेव देवीभिर्हरिं शापफलानि च। वणिक्सुतेन सहसा निषिद्धो नायहीत्सु
तं। महाश्वहनिपाताच्च तेनैवाभ्येत्य रक्षितः। ततः स विहितोद्वाहो नवकांतासमागमः। उवास राजतनयः स्वसुरावथे
सुखं। वणिक्सुतोपि रक्षायां तस्यासीच्छन्नविग्रहः। अंतःपुरे स शुश्राव क्षुतशब्दं प्रांते निशि। जीव जीवेति शब्दानां
सत्वरं शतमभ्यधात्। इत्यस्य शापनिर्वाणं विधित्सुतः सुहृद्वरः। ततः प्रभाते प्रच्छन्नं निर्गतोतः पुराद्वणिक्। दृष्टो
राजसुतेनाशु क्रोधव्याकुलचेतसा। अयमंतःपुरे पापः छन्नो निशि करोति किं। इत्युक्त्वाभ्रुकुटिभ्रांत्या दिदेशास्य व

१०६ 106

धंजुधा।सराजपुत्रवचसागाढवद्धपुरःसरैः।अचिंतयदहोकष्टाट्टणंराजकुलस्थितिः।बालाःसुखेनसेव्यंतेवालोहूताश्चवद्धयः॥
नतुनित्यमदाध्माताराजानःकुटिशयाः।ध्यात्वेतिदुःखसंतप्तोराजपुत्रमुपेत्यसः।हितंयथाकृतंसर्वंतत्त्वमस्मैन्यवेदय
त्।ततस्तत्त्वविचारेणराजपुत्रोवणिक्सुतं।हितैषिणंप्रियंमित्रंप्रसाद्यसुदितोभवत्।इत्येवंराजभिःसार्धंसखिदुः
खेनरक्ष्यते।कोहिसुप्तेनसिंहेनकृतकंटग्रहःस्वपेत्॥ ॥राजपुत्राख्यायिका॥ ॥कलिंदद्दत्ततनयानिशम्येतिसखी
वचः।उवाचसत्यमेवैतत्तत्कृतघ्नाःसखिभूमिपाः।शून्याशयप्रियाघोरादुःखसाध्याविकारिणः।मित्रविद्वेषणोत्सेयाः
पिशुनाइवभीषणाः।कथांशृणुपिशाचानांराजहृन्नानुकारिणां।पुरायज्ञस्थलग्रामेब्राह्मणोल्पधनोभवत्।कदाचि रम० १०६
त्सकुठारेणाभिंदन्काष्ठाग्रमकमः।अपाटयन्निजांजंघांतेनाभूच्चिरमातुरः।सर्वोपायपरिक्षीणोरोगःकृशाल्पकःचिकित्सकैः

नाडीव्रणार्तैः सुहृद्भिः स वाक्याडुक्तिमापवान्। पिशाचं साधयेत्येवं मित्रवाक्यात्ततः परः। अतोषयन्निशि महापिशाचं वलि
पुष्पदः। ततो वरात्पिशाचस्य तद्दत्ते रोषधि व्रजेः। स्वच्छः स्वच्छन्दसंचारो विजहार सुखं द्विजः। स्वस्थनाडीव्रणं कालेन समुवाच
पिशाचकः। रोहत्येवमया दत्तं द्वितीयं दर्शय व्रणं। अपरं चेद्व्रणं विप्र न मे दर्शयसि स्फुटं। मय्याक्रोधानलाज्यत्वं नीतो
नैव भविष्यसि। पिशाचवाचं श्रुत्वेति पुनश्चिंताग्निनापितः। प्रदध्यौ स्वगृहं गत्वा निश्वासग्लपिताधरः। अस्तएवास्मि
पापेन कृतो नाडीव्रणीजनः। इतिध्यायन्स्वसुतया दृष्टो नष्टधृतिस्मृतिः। दृष्ट्वा विज्ञाय वृत्तान्तं तत्सा रंडा निखिलं पितुः। ना
डीव्रणं पिशाचाय दर्शयामीत्यभाषत। स पिशाचः समाहूतो हृष्टो नाथ द्विजन्मना। विदग्धं विजने शापतन्तुतां दृष्टेहा
कुलः। व्रणं गविष्टं तत्कृत्वा सा पिशाचमभाषत। सखे नाडीव्रणस्यास्य सन्नद्धो भव रोपणे। इति मुग्धपिशाचो सो श्रुत्वा

१०७ तद्वचनंमृदुयायत्ताहृत्तौषधन्नातैस्तत्परः कृशनांययौ।प्रभवंतियतोलोकाः प्रलयंयांतियेनच।संसारवर्त्मविततंकःपिधा
107 तुंतदीश्वरः।ततः पिशाचःसविनष्ठिरात्कुंठक्रियाक्रमः।भयात्पलाय्यप्रययौगृहेयन्निजदुर्गृहं।इत्येवंदुर्गृहाध्मा
ताः पिशाचाजडबुद्धयः।शठाः कलुषचित्ताश्चराजपुत्रास्ततोधिकाः।सुहृन्नैवदृसौहार्द्रोनिर्लज्जावञ्जसेविताः
लुब्धानृपाश्चवेश्याश्चदूरस्थाएवशोभना॥ ॥पिशाचाख्यायिका॥ ॥वचः कलिंगसेनायाः श्रुत्वेत्यसु
रकन्यका।उवाचचंद्रवदनावीक्ष्यसंध्यारुणंनभः।पंकमलिनीकांतः शशांकस्ताचलमौलितां।गच्छामिपुन
रेष्यामिपंथामेषष्टियोजनः।इत्युक्त्वाकाशमाविश्यतूर्णंसोमप्रभाययौ।विधायवदनद्योतैर्वेऊसोम रम०
प्रभंनभः।ततः सस्मांप्रयातायांराजपुत्रीव्यचिंतयत्।केयंविद्याधरीदेवीभुजंगीवासखीमम।श्रूयतेमा १०७

तुषैः सख्यं भजंति किल देवताः। पृथ्वीपतेः पृथोः पूर्वं पुत्र्यास सख्यमहं धृतौ। भेजे नयनमार्गेण प्रीतिर्हि विशते स्व
यं। कासि पृष्ठेनु तद्वाक्यात्पृथुराज्ञीय भूतलं। अस्तं तत्र च यो दिव्यं ददौ तस्यै सुदुर्लभं। गावो वत्यो गणो लोकेस्मिं
ल्लतः प्रभृति पावनाः। तदेषा कापि मे देवी सखी पुण्यैः समागता। कलिंगसेनाध्यात्वेति निनाय रजनीं शनैः
अथापरे द्युरादाय विचित्रायंत्रपुत्रिकाः। सखी समभ्ययात्तूर्णं सोत्कंठा मयपुत्रिका। सा च भाषितया पृष्टा
स्तुताहमसुरप्रभोः। मयस्य मायावैचित्र्यधाम्नः सोमप्रभाभिधा। स्वयंप्रभा मे भगिनी सास्ते पातालमंदिरे। ह
नुमत्प्रमुखैर्दृष्टा जानकीमार्गणैः पुरा। कुबेरतनयः श्रीमान्भर्ता मे नलकूबरः। यच्छापच्चः दशास्योपि नाभू
त्परवधूविभुः। इत्युक्त्वायंत्रवैचित्र्यात्सजीवा इव पुत्रिका। करंडिकां समुद्घाट्य ददौ सख्यै प्रियायसः। ततो मूढसखी सक्तां त्यक्ताह।

रास्तुतां नृपः। अस्वस्थां मन्यमानस्तां वैद्यं पप्रच्छ दुःखितः। वैद्यो वदत् राजपुत्र्या राजन् व्याधिर्न लक्ष्यते। प्रेमप्रहर्षसंपूर्णा नाभिनंदति भोजनं। त
तो विज्ञाय वृत्तांतं दुहितुस्तां च तत्सखीं। कलिंगदेवो देवी च परां मुदमवापतुः। राज्ञा विदितवृत्तेन दत्तानुज्ञा च सा तदा। सोमप्रभां सवि
श्रंभामिये षप्रकटां सखीं। सा तत्र राजभवने पूजिता नेन भूभुजा। विजहार समं सख्या विहारे तत्र हारिणी। सा यंत्रपुत्रिकानीतदिव्य
कांचनपंकजैः। विहारपूजनं चक्रे तेनाभूद्विस्मितो नृपः। अनुज्ञाता ततः पित्रा सहांतःपुरराज्ञिभिः। मायायंत्रविमानेन तां निना
य मयात्मजा। नीता स्वयंप्रभां द्रष्टुं ज्येष्ठां स्वभगिनीं तथा। पुरं ददर्श वैचित्र्यचित्रकर्मैव वेधसः। तत्रापश्यज्जटापुंजविभ्राजि
वदनां वधूं। नलिनीमिव शैवालजटालोत्फुल्लपंकजां। स्फाटिकेनाक्षसूत्रेण विराजितकरां बुजां। ननु प्रसूतलावण्यविं
दुमालांकितामिव। उद्वृत्तकुचपर्यंतपर्यस्तधवलांशुकां। चक्रवाकयुगन्यस्तफेनवेगामिवापगां। विलोक्य तां राजपुत्री
प्रणामनताननां। भ्रश्यत्कर्णोत्पलरजोरेखासंवलितस्तनी। स्वयंप्रभा राजपुत्री तां विलोक्य स्तुलोचनां। नामाभिजनमा

करार्थ फलान्यस्यै स्वयं ददौ। जरानिवारणान्यासु भुक्त्वा तानि फलानि सा। बभूव बालापीयूषक्षालितेवाधिकद्युतिः। ततो
विचित्रसुधानंदिव्याभिप्रायनिर्मितं। वापीच कांचनांभोजां दृष्ट्वा प्रीतिमवाप सा। स्वयंप्रभामथामंत्र्य सा सोमप्रभया
सह। ययौ यंत्रविमानेन पितुस्तक्षशिलां पुरीं। अंतःपुरगता तत्र कदाचिद्‌मृगणोद्गिरं। सोमप्रभा या विश्रंभकथासु मृग
लोचना। सखि मन्ये यदा कस्मिन्वरस्त्वां परिणेष्यति। तदा नौ सहवासोयं ध्रुवं दूरी भविष्यति। प्रवेक्ष्यामि कथं स्वैरं सखि भ
र्तृगृहं तव। जानामि श्वश्रूजनायत्तं विषमं भर्तृमंदिरं। स्वयंप्रभासमागमः॥ ॥श्रृणु श्वश्रू कृते दुःखं यथा प्राप्ता कीर्तिसेनया॥
विपद्यधान्यवृध्या च नित्यौर्णौ अस नोदधि। धनपालित इत्यासीद्वणिक्पाटलिपुत्रिके। कीर्तिसेना भवत्तस्य कन्या ला
वण्यवाहिनी। तां चैव नवतीकाले स्वसांगविलोचनां। देवसेनाय वणिजे मगधावासिने ददौ। सा भर्त्रा लालिता स्वैरं श्वश्रू

१०९ 109 कलहपीडिता उवास बोहोश्री खंडवने सर्पाकुले यथा। ततः कदाचिज्जलधिं प्रस्थितो द्रविणार्जने देवसेनः प्रियावेश्म विवेशामंत्रणोद्यतः। तम
ब्रवीत्कीर्तिसेना त्वयि याते ऽत्र वं विभो। भक्षयिष्यति मां श्वश्रूः कलहेन निरंतरं। इति प्रियावचः श्रुत्वा संलब्धा विरहव्यथां। ययौ
मातरमाभाष्य वर्तयेथाः स्नुषामिति। तस्मिन्याते तज्जननी सततं कोपमूर्छिता। वियोगक्लेशितां शाह कीर्तिसेनां ननानर्नां।
सूत्रकृते नित्यहृदि ते डर्भगे मंगलोज्झिते। वाध्यंते पितुरे वा स्तु पुत्रो जीवतु मे चिरं। उक्त्वेति तत्यारिजनं निरस्य सहसा गृहात्।
भयात्प्रसन्नवदनां पुनराह परे हनि। हासशीलेन वपतिर्भयाद्देशांतरं गतः। त्वं तु वेश्येव निः स्नेहा विलासेनेच्छसे जनं। इ
तिनानाविधोद्वेगसावेगकोपदुःसहैः। वाक्तायकैस्तामसक्षुजघान विरहे पि सा। संमंत्र्य तद्वधोपायं तामथांध गृहोद् एम०
रे। रहो हमत्टे इविणांस्थमित्युक्त्वान्यवेशयत्। श्वश्र्वाष्टपिहिते तत्र न्यस्तासा निविडार्गले। सदाशनचंडमर्भीगं लेमे भग्नशारा १०९

वके। शरावखर्परेणाथ निचखान गृहं शनैः। दैवात्प्राप्तेन च पुनः खनित्रेण महाविलं। तेनैव निशि निर्गत्य गृहीतकनकां
बरा। विधाय पौरुषं वेषं वल्लभं संमुखं ययौ। पथि सार्थपतिं प्राप्य कृतिराजसुताकृतिः। प्रययौ पुरुषस्पर्शपरिहारपरैव
सा। ततस्तस्मिन्महासार्थे पपात शनिवन्निशि। चोरसेनाविधौ वामे तु घत्यालं वनान्यपि। सा चौरभयविद्रस्ता सार्थे निःशे
षतां गते। उवाच गूढा रजनी त्वराभ्रूकुहरं तरे। प्रातस्ततो विनिर्गत्य प्रविष्टा विष्टाविकटाटवीं। सिंहव्यालेन निहता स
तीते जो हि दुःसहं। राजपुत्राकृतिं कोपि दृष्ट्वा तामध्वनापि तां। कारुण्यात्सलिलैः शीतैर्वितृष्णामकरोन्मुनिः। निरोहि
ते मुनिस्तु तेन निशीथे परस्तुपस्थिते। सा तस्थौ दस्युचकिता सुषिरद्रुमकोटरे। ततोर्धरात्रे संप्राप्ते राक्षसी सह पुत्रकैः। छाया
मिव कृतान्तस्य दृष्ट्वा शीलरक्षिता पुरः। भोजनं याच्यमाना सो तनयैस्तान भाषत। महाकालेन निर्दिष्टं भोजनं नो भविष्यति

११० 110

वसुदत्ताभिधो राजा वसुदत्तपुराधिपः। शतपद्या समाक्रांतः कर्णरंध्रप्रविष्टया। तत्प्रसूतैः शतपदीशतैर्व्याप्तशिराश्च सः। अविज्ञाताम
यो वैद्यैर्भविता मृत्युभोजनं। श्रुत्वेति कौतुकाविष्टैः दृष्टा सा राक्षसी हृतैः। नृपस्य जीवनोपायं वीतशंकमभाषत। घृताभ्यक्तः
समध्यान्हतापे संतप्तपायसैः। उपलिप्तशिराः कृत्वा श्रवणे वेणुनालिकां। स्थापयेन्नलिकाग्रांते कुंभं यदिह शीतलं। ततोस्य
निःसरंत्येव शतपद्यो न संशयः। किमनेनाथवास्माकं यातु राजा सपंचतां। अस्मत्संत्रपयेन्नूर्णामि त्युक्त्वा सहसा ययौ। की
र्तिसेना निशम्यैतत्स्थानात्तत्क्षययौ नृपं। अदूरवासिनं क्षिप्रं वैद्यवेषोपलक्षिता। पुंलो उहुंदरसुखः श्रीमानेक इवाश्वि
नोः। सुकुमारो रविंद्राक्षो वैद्यो देशांतरागतः। नृपं स्वस्थं विधास्यामि प्रतिज्ञामिति निर्दिशन्। प्रविष्ट इति राजानं प्रती रम०
हारो व्यजिज्ञपत्। ततः क्षिप्रं समाहूता राज्ञा देव्या च पूजिता। वैद्यवेषा विशत्क्षिप्रं कीर्तिसेना नृपालयं। ददर्श तत्र नृप ११०

तिं क्षयक्षीणमिवोडुपं । शोषितं पुण्यसंघेन क्षयाद्दृक्मिवोन्नतं । देवी करतलन्यस्तकपालो वीक्ष्य तं नृपः । निर्दिष्टो भूत्क्षुभशाभ्रो
मनः पूर्वं प्रसीदति । ततो यथोक्तं राज्ञस्सा सा विधाय महीपतेः । चकर्ष शिरसो व्याधिं येन स्वस्थो भवत्क्षणात् । व्याधिमु
क्तोथ नृपतिर्वैद्यवेषामुवाच तं । राज्यार्द्धमम्बर त्वाद्यं गृहाणेति प्रहृष्टधीः । साब्रवीन्न्यासभूतं मे संप्रति त्वयि तिष्ठतु । या
चितो दास्यसीत्युक्त्वा गूढा तस्थौ तदालये । ततः कालेन सर्वाणि गेदेवसेनः समाययौ । महाभांडधनाभोगपूरिताशेषप
न्नगः । राज्ञा निवारितं गंतुं शुल्कायतनमुपेत्य सा । चिरसंगमपीयूषस्नाप्यमानाभवन्मुदः । देवसेनः परिज्ञाय कीर्तिसेनां
सकौतुकः । दृष्ट्वा निशम्य वृत्तांतं बभूव प्रमदाकुलः । भूपालोपि तदाश्चर्यं विदित्वा निखिलं ततः । उवाच धर्मभगिनी
ममेयं त्वं स्वसुः पतिः । वैद्यवेषं विधायेषा संप्राप्ता जीविताय मे । इत्युक्त्वा वणिजे राजा राज्यार्द्धमुदितो ददौ । इति स्वस्था

१११ सुहृद्विपुले पतिता शोकसागरे। कीर्त्तिसेनाख्यधर्मेण तारिताप्राप वल्लभं॥ ॥कीर्त्तिसेनाख्यायिका॥ ॥कलिंगदत्ततनयानिशम्येति
सखीवचः। सतीचरितमाश्चर्यं प्रहृष्टो मनसा सती। ततोऽह्नि तत्र तां याते वयस्यां गन्तुमुद्यतां। कलिंगसेना सोवाच सखि दृष्टी
यमे निजं। पतिं धनाधिनाथस्य तनयं नलकूवरं। इति सोमप्रभा श्रुत्वा राजपुत्रीमभाषत। त्वं यौवनवती कांता संस्तुवा
च विशृंखलः। परस्पराविरुद्धं हि दर्शनं नवतस्य च। ईर्ष्याकोपेन नोतत्र सौहार्दं नश्यति ध्रुवं। नदीकूलद्रुमस्येव स्नेह
स्येर्ष्याविपत्तये। उक्त्वेति श्वो ययौ दृष्टुं तन्वाना कांतिकौमुदी। हर्म्ये कलिंगसेना च तत्रस्था व्योमावलोकिनी। ततो यदृच्छया
यातो विद्याधरधराधिपः। सुवा मदनवेगाख्यस्तां ददर्श नभोगतः। तां वीक्ष्य स्मरसौंदर्यविभ्रमाणां समागमं। अमृताह एम०
रणे शौरेः शिष्टां कांताहृतामिव। सोभवन्मन्मथशरासारजर्जरिताकृतिः। तयादृष्टिविशेषेणेव भुजंग्यासुजर्जरीदृ १११

नः। स धैर्यं हि प्रमास्थाय कथं विद्याधरस्य मे। मानुषी मोहयेच्चित्तमिति ध्यानपरो भवत्। ततो विवेद विज्ञप्तिविद्यया तु
लिकाधरः। स तामप्सरसः शापाद्वतीर्णां शतक्रतोः। ज्ञात्वेति तद्गतमनाः कालकूटगिरेर्निजां। राजधानीं समभ्येत्य
तस्थौ सुखपराङ्मुखः। स हेमकदलीकुंजे किंनरीगीतनादिते। तां राजतनयां ध्यायन्न लेभे न च निर्वृतिं। चिंतयंस्तन्मु
खांभोजं भेजे नांतःपुरे रतिं। मंदारमालामालोक्य मालत्यां को हि सादरः। एवं तस्यैव तस्याभूच्छापस्त्रीसेवने बला
त्। यंत्रितस्तेन सहसा हर्तुं तां नाकरोन्मतिं। सोभवद्विरहायासपांडुरः खंडिताशयः। पौर्णमासीविरहितः शशीव क्षा
मविग्रहः। किं विद्याधरराज्येन कांतारसदृशेन मे। यत्र नेत्रामृतं कांता न सा नेत्रावलंबिनी। तपसा वरदं देवमाराध्य गिरिजाध
वं। ध्रुवं कांतामवाप्स्यामि तामायतविलोचनां। अनुकूलः सुहृद्दानमानिताश्रीः क्षितयशाः। मनःसुहृद्वाचदयितानानु

११२ ष्टपार्वतीपतौ। इति ध्यात्वा स्मरं देवं त्र्यंबकं तपसे ययौ। संकल्पकल्पविटपी तस्य नाम न शंकरः। ऋषभस्य गिरेः शृंगं तपसा तस्य धूर्जे
टिः। तुष्टः प्रोवाच तं कन्यां तामवाप्स्यसि युक्तितः। कलिंगदत्ततनयां वत्सराजः स्वयंवरे। यावन्नैति पुरोगत्वा तद्रूपेण त्वमाप्नु
हि। इत्यवाप्य वरं शंभोर्विद्याधरपतिर्ययौ। तत्संगमाशयाक्लिष्टं हुधासारपरिप्लुतः। अत्रांतरे नृपतयस्तनयां रूपशालिनीं।
कलिंगदत्तनृपतिं दूतैः सर्वैर्ययाचिरे। ततो विचार्य नृपतिः कुलाचारगुरौ नृपात्। अमन्यत वरं योग्यं पुत्र्याः सेनाजितं नृपं र
हः कलिंगसेनाथ प्राह सोमप्रभां सखीं। सेनाजिन्नाम भूपालः पितुर्मे भिमतः पतिः। मयपुत्री निशम्येति प्राह साश्रुविलोचना। अ
हो नु दग्धविधिना नयोग्यः संगमः कृतः। त्रैलोक्यसुंदरी सुभ्रूः प्रवयास्त्वां स पार्थिवः। मधुयोर्हेति न स्रष्टुं बालां कल्पलतामिव एम०
व। वत्सेशोदयनो नाम कौशांब्यामस्ति भूपतिः। स ते समुचितः कांते वरो गौर्या इवेश्वरः। तस्य वासवदत्तास्ति दयिता रूपशा ११२

लिनी । सा लेभे तनयं तस्माद्भाविविद्याधरेश्वरं । इत्युक्त्वा वत्सराजस्य वंशवृत्तांतविक्रमान् । निवेद्य निखिलं सख्यैः पुनराह
नृपात्मजां । त्वां वीक्ष्य वत्सराजोसौ ध्रुवं तान्यरूपिश्रियां । कमलाकमलं दृष्ट्वा नान्यत्सम्मस्तृशास्यलं । उखा यास्त्रिचलेखासौ
बाणपुत्र्याय थापुरा । प्राद्युम्निसंगमं चक्रे करिष्यामि तथास्मि ते । इत्याकर्ण्य सखीवाक्यं राजपुत्री जगाद तं । अन्याभिः
सखि भूपालः कांताभिः सनिषेव्यते । महासेनसुतासक्तोऽडुलेभोस्यजनस्य सः । अकामकामाः कामिन्यः सखि यांत्येव हास्य
तां । राजपुत्र्या निशम्येति प्राह सोमप्रभा पुनः । यत्नमत्र विधास्यामि दैवायत्ना तु सिद्धयः । स्वयं सेनजितं पूर्वं वीक्ष्य गौडमहीपतिं ।
मत्प्रभावोदितगतिः श्वेरूस्तोदयनं ततः । लावण्यास्यास्य ते हृत्प्रभुसौभाग्यस्य कुलस्य च । एवं समुचितं पूर्वं चंद्रचूडः करिष्यति ।
रात्रौ विक्रमसेनस्य कन्या तेजोवती पुरा । कंचिद्युवानमालोक्य वभूव स्मरतापिता । सख्या देवगृहे तेन कृत्वा संगमसंविदं । निर्ययौ

११३ राजपुत्री सालोकैकविभूषणा। अत्रांतरे राजपुत्रः सगोत्रबलविद्रुतः। राजसंश्रयकामस्तद्देवायतनमभ्ययात्॥ अवापतत्र तां दैवात्सराजतनयान
113 यां शुभा। अथ धन्यैराहृतं नामकल्पाणिभिरवाप्यते। सा तमासाद्य दयितं तोषमभ्यधिकं ययौ। भृंगी चंपककामेव पारिजातसमाग
मा। न तत्संभोगसुधासिक्ता सा राजानमवाप्य तं। ज्ञातः सशुचितां प्राज्ञां प्रपेदे गूढकामुकः। राज्ञोपि स्वसुतां दातुं तस्मै मतिर
भूद्दृढा। कन्यारत्नं च तत्संवैविवेद न उपतिः शनैः। तद्विज्ञाय क्षितिपतिर्निजामात्यानभाषत। सोमदत्ताय कन्येयं मनसाक
ल्पिता मया। स्वयं गांधर्वविधिना पूर्वमेव वृता नया। विधेरेव समाधानं जातं सदृशाहिद्वये। राज्ञः श्रुत्वेति वचनं प्र
त्यभाषंत मंत्रिणः। दिष्ट्या सदृशयोगेन नशोचोयं तवात्मजा। स्वयं वृतो नयाश्रीमान् राजपुत्रः कुलोचितः। देवदेवेन लि राम०
खितं प्रमार्ष्टुं कस्य कः क्षमः। हरिशर्मा पुरा विप्रो दारिद्र्याद्दासतां गतः। कुटुंबिनो धनवतः सभार्यः सहपुत्रकः। गृहे कुटुं ११३

विनस्तस्यैव वैवाहिकमहोत्सवे । भक्ष्यभोज्ये प्रवितते स ननंद स्पृहाकुलः । दिनांते भोजनव्यग्रे संबंधिजनमंडले । विस्मृतः कुत्रा
पि क्षामः प्रदध्यौ दुःखितः कृशां । अवमानावधूतस्य दारिद्र्योपहतत्विषः । कथमादरमाधत्ते प्रसिद्धशरणो जनः । अहो
विद्याविहीनोयं हं निर्द्धनः शोच्यतां गतः । दीपयाम्यभिवादीपं लोके दग्धदशाश्रयात् । कृशां स चिंतयित्वेति निजां जाया
मभाषत । विस्मृतं पश्य मां दीनमस्मिन्नुत्सवभोजने । इतो दूरतरं नीत्वा जनस्यैकस्य घोटकं । छन्नं स्थापय विज्ञानी भ
विष्यामि तदा त्वये । कृटज्ञानी हयप्राप्त्या प्रसिद्धिं परमां गतः । नावमानमवाप्स्यामि कल्पव स्नीहि धूर्त्तेता । इति प
त्युर्वचः श्रुत्वा नीत्वा सा तुरगं निशि । ववंधाविजने धीरा जने मधुविमोहिते । हारितो श्व इति प्रातर्जने कोलाहलाकुले
ब्राह्मणी प्राह भर्त्ता मे हरिशर्मा प्रनष्टवित् । ततः कुटुंबिनाभ्येत्य प्रार्थितः प्राह स द्विजः । कृतकयहविज्ञानः स्वांगुली गणनापरः ॥

११४ नातिदूरे स्थितः सोऽस्य चौरैर्विरहितो वने। इति तद्वचसा लब्धेहयेरख्यातोऽथ भूर्वसा। ततः कदाचिद्द्विजो हारितो राजवेश्मनि। प्रसिद्धः स
114 समाहूतो मूर्खोऽस्मीति भयाकुलः। प्रातर्वक्तास्मि संचिंत्य समाभाष्येति भूपतिं। निर्जने मंदिरे तस्थौ स चिंताध्याननिश्चलः। अत्रांतरे
नरपतेर्जिह्वाख्यास्य हचेटिका। तच्चौरीशंकिता गत्वा तमपश्यदलक्षिता। सोऽपि दुःखाकुलः प्राह राजभीत्या वृथामतिः। धिग्जि
ह्वे त्वां पयाहं तत्संशयः स्वयमाहृतः। निजजिह्वामिति मुहुः सस्मभर्त्सयतो वचः। श्रुत्वा सा चेटिका तूर्णं पादयोरपतद्भयात्
विज्ञाता भवता पापा याऽहं जिह्वेव तस्करी। इत्युक्तवाक्यां तां ज्ञात्वा स दंभमधिकं व्यधात्। ततो राजानमभ्येत्य कृतकज्ञानग
र्वितः। मुहुस्फालितैकभ्रूर्घुष्टांगुलितलो मुहुः। चकार बकटं संवेधनं राज्ञा स तु पूजितः। ख्यातिं प्रजासमुन्नद्धे तस्मि राम०
न्नभ्येत्य मंत्रिणः। धूर्तोऽयं चोरसंकेती मूर्ख इत्यूचिरे नृपं। राजापि तत्परीक्षायै मंडूकं पिहिते घटे। निधायास्मिन्वद किमस्तीति प्रा ११४

हतं मंत्रिणं सदा। पुनः स दुःखितश्चिंताध्यानस्तिमितलोचनः। हा मंडूक हतोसीति जगादोच्चैर्भयाहतः। मंडूकेत्यभिधा तस्य बाल्ये मा
त्राकृता भवत्। ज्ञातं ज्ञातमिति प्राज्ञः सभ्यास्ते विस्मयाकुलाः। ततो नरपतिस्तस्मै प्रत्यहं विभवं ददौ। इत्येवं दैवविहितं स्व
यं भवति सिद्धये॥ ॥हरिशर्माख्यायिका॥ ॥श्रुत्वेति मंत्रिणो वाक्यं राजा तेजोवतीं ददौ। राजपुत्राय गांधर्वविधिना पूर्वे
संगतां। इत्येवं कुलसौभाग्यरूपाचारगुणोचितं। तेजोवतीपतिं शापत्वमप्येवमवाप्स्यसि॥ ॥तेजोवत्याख्यायिका॥ ॥
अथार्चयित्वा श्रीकंठं विधिना पार्वतीपतिं। नभसा जग्मतुः सख्यौ ते विमानेन भास्वता। दृष्ट्वा वर्षधरोपेतो राजपुत्रीम
नोजवं। पंचचक्रविमानं तद्विजेंद्रो लीलाविलासवत्। नृपं सेनजितं द्रष्टुं वत्सराजं च सुंदरी। प्रस्थिता गगनं चक्रे राजपुत्री सु
धामयं। आवंति नगरं प्राप्य विमानादवरुह्य सा। सख्या सेनजितं दूराद्दर्शितं नाभ्यमन्यत। श्रीमानपि स राजेंद्रस्तस्या ना

भिमतोभवत्।पद्माकारइवोत्फुल्लः शरत्पूर्णशशित्विषः।आलक्षिता तमालोक्य प्राह सोमप्रभां ततः।सखिवत्सेश्वरं द्रष्टुं त्वरते मम
११५ मानसं।इत्युक्त्वायं त्वरचितं विमानमधिरुह्य सा क्षणाद्दवाप कोशांबीं विलाससदनं प्रियः।अवतीर्य वरोद्याने ततः सख्या
115 सहोचिते।तस्थावल्लिकुलालोललताजालतिरोहिता।अत्रांतरे वरोद्याने ततः सख्या सहोचिते।तस्थावल्लिकुलालोल
लताजालतिरोहिता।अत्रांतरे वरोद्यानविहाररसतत्परः।वत्सेश्वरः समभ्यायात्तं देशमतुलद्युतिः।तमालुलोके
सानंदं कंपमानघनस्तनी।कलिंगसेना स्वेदांबुक्षाल्यमानविशेषका।सस्यामानसोल्लासपूर्णचंद्रोदयो नृपः।चका
रोत्कलिकालोललहरीकेलितांडवं।सहसा तद्गतमतिर्बभूव लिखितेव सा।स्तत्क्रुञ्जोचिताकारं हरवैरादिसस्मरं।सोमप्र राम० ११५
भा सखी दृष्ट्वा नरेंद्रगतमानसां।उवाच सखि तिष्ठेह श्रुणु न मे त्वसंगमावधि।स्पंदमानमिदं चक्षुर्नेष्टमांज्ञा सतीव मे।व्यपो

हैतत्समेष्यामि कर्त्तव्या नाद्य तिस्त्वया। यौगंधरायणगिरं विनानायं नरेश्वरः। स तु नयानुगतो नित्यमभीष्टेपि प्रवर्त्तते। त
स्मादद्य त्वाद्विधास्यामि तव वत्सेश संगमं। गच्छामि त्वमविज्ञाता विलंबस्वेह सुंदरि। इत्युक्त्वा दैत्यतनया प्रययौ व्योम
गामिनी। तस्थौ कलिंगसेना तु वत्सराजाभिलाषिणी। तां प्रतीमन्मथाक्रांतां ततः कंचुकिनं निजं। प्राहिणोद्वत्सराजाय दू
तं संवांछिताप्तये। राजन्विराजमानं त्वां वारयित्री महीपतेः। सुता कलिंगदत्तस्य प्राप्तेत्याह स भूपतिं। श्रुत्वा विश्रुतलाव
ण्यां स्वयं प्राप्तां नृपात्मजां। हर्षादमन्यतात्मानं धन्योस्मीति नरेश्वरः। ततो रहः समाहूय हृष्टो यौगंधरायणं। राजेंद्रचंद्रः प्रोवाच वि
किरद्दंतचंद्रिकां। राज्ञः कलिंगदत्तस्य तनया रूपविश्रुता। वरयित्री स्वयं प्राप्ता मामद्य मदनावनिः। विधीयतां समारंभ
स्तद्विवाहमहोत्सवे। तूर्णं दुर्लभलाभेषु वक्रविघ्ना हि सिद्धयः। श्रुत्वेति भूपतिवचः प्रदध्यौ मंत्रिपुंगवः। अभेषजेस्मि

न्यासने क्ष्मापतिर्मां पतत्विति। कोऽह्यसमान्यलावण्यविलासतरलभ्रुवां। मुच्यते वसमासाद्य स्वभावरसिको जनः। अमात्यश्चिंतयि
११६ त्वेति नीतिज्ञो गणकेऽभ्यधात्। विवाहलग्नव्याजेन कालहारं महीपतेः। नृपोऽथ रत्नरुचिरं वरोद्यानसुदारधीः। ददौ कलिंग
116 सेनायै गृहं परिणयोत्सुकः। योगंधरायणोऽप्यस्यसार्द्धं वासवदत्तया। पद्मावत्या च संमंत्र्य कालहारमचिंतयत्। सोऽब्रवी
द्देवि संलभ्य कोपमीर्ष्योद्धसुत्थितं। कुर्वीथां भूपतिपुरः कृतकस्वच्छमानसं। नवोढाहे नरपतेर्वर्त्तते भृशमादृशः।
सर्वंर्हु शाति हृल्पेन शाक्यः केनानिलोपमः। जडाविपर्ययायेव विषयेषु तरंगिताः। सनिरुद्धाविवर्त्तंते नदीवेगा इवे
श्वराः। आतुहृल्पेन सुतैर्नो वहे विनायां तिमार्द्दवं। वेगोत्कृष्टा हि शाम्यंति ज्वराः कालइवेश्वराः। कालहारेण न रा०म०
कृषीवंचितः प्रार्थिनापरः। शय्याचारित्ररक्षायै शंके विशेषिते पुरा। इति संविदमाधाय मंत्री वासवदत्तया। मित्रं ११६

तस्मात्कार्यार्थयोगेशं ब्रह्मराक्षसं। तं ध्यानमात्रआयातं तद्वृत्तं ज्ञातुं न्यवेशयत्। गूढं कलिंगसेनाया मंदिरे बुद्धिकोविदः
अथांतरे मयस्तत्र तां समभ्येत्य विहायसा। कलिंगसेनां सोत्कंठं कंठे जग्राह सादरं। चिरायातां सखीं हृष्टां विज्ञाय ज्ञानचक्षुषा
प्राह सोमप्रभा सोमप्रभाविजयशालिनी। स्वयमपि प्रणतायां किमात्मा वत्सभूभुजे। त्वया प्रकाशितः सत्यमधीरं ल
लनामनः। मन्मतं समतिक्रम्य रभसादिति साहसं। कृतं तु भुत्वया यद्वा मूर्खाः साधुमतद्विषः। अंतर्वैघ्यां विजयामेव हु
दत्तस्तुतो द्विजः। विस्तुरत्नो भवद्विद्या वधूविभ्रमदर्पणः। स मित्रैः सन्नभिमूर्खैः सह गंतुभृशार्थितः। वलभीत्वरया वि
हेरनक्रत्रैपि निर्ययौ। डीनैमितं समालोक्य तेन ते स्थातुमर्थिताः। अज्ञानदुर्ग्रहग्रस्तानव्यलंवंत सत्वराः। अपि यत्ने
न शक्यंते धर्तुं प्रलयमारुताः। विरुद्धाम्बुनदीवेगानहतु मूर्खा हि तद्विषः। सगत्वा सह तैर्दूरं वद्धः शपथसंविदा। निशिप्र

११७ तिष्ठयाकांक्षी विवेश पुरमंदिरं। भुक्त्वा श्रमार्त्तास्ते तत्र मूर्खास्तस्यानुयायिनः। भृशं समाययुर्निद्रां सत्वजागर्विचारधीः। महानि
117 द्रामहाकोपामहामोहामहाशनाः। मूर्खाः पशूनां शिष्यावा मूर्खाणां पशवोपि वा। स विनिद्रस्ततोपश्यन्निशितङ्गहृद्यो
षितां। निम्नगामिव तारुण्य महावेगतरंगितां। प्रच्छन्नकामिनां ह्नाकेनापि रनिशंगतां। साकंपाकुलनिश्वासा विदधे
तस्य कौतुकं। रतिनिद्रापरीतायां तस्यां स्वगृहमविशत्। गृहस्वामी समायातांश्च विहस्त्य निजसेवकान्। स राजवं
श्यः स्ववधूं दृष्ट्वा केनापि संगतां। शिरश्छिच्छेद हस्तस्य प्रियाचारित्रहारिणः। खड्गं तद्रक्तसंसिक्तं दीप्तं विश्वस्य तत्
पाणिना। तान्प्राह पांथान्निर्गत्य जनमानीयतामिति। विक्षुब्धो विनिद्रोथ सत्वरुत्थाय ससंभ्रमः। जलं तस्मै ददौ पाणि राम०
खड्गरक्तनिवारणे। पाणीप्रक्षालराजन्ये मोहनिद्रासुपागते। प्रबुद्धा छिन्नशिरसं सापश्यन्नरमंगना। मनःप्रियं त ११७

मादायनिहतं लघुचारिणी। भस्मकूटे ह्यपिहितं तं रथ्योपांते न्यवेशयत्। तं निधाय प्रविश्याशु पत्युः सुप्तस्य मस्तकं। चिच्छेदाहृत्य निस्त्रिं-
शघोरं हि स्त्रीविचेष्टितं। ततश्चुक्रोश सा तारममर्यादैः पतिर्मम। दस्युभिर्निहतो रात्रावुत्तच्छ्रुत्वा विविशुर्जनाः। तैर्दृष्टे हीतागता-
शंकं पांथास्ते भृशविह्वलाः। चोरा इति वध्वा काश्चन्मूर्खा नो किंचिदूचिरे। यथावृत्तं यथादृष्टं विस्मुदत्तस्तथावदत्। भस्म-
कूटांतरस्थं तं तत्तस्मै शीर्षकलेवरं। प्रत्ययात्तेस्तथायुक्तोऽदुर्निमित्तविनिर्गताः। निंदन्वयस्यान्प्रययौ विस्मुदत्तः स्वमंदिरं।
इत्येवमनिमित्तानि मूर्खैर्वैरगणितान्यपि। फलंति भेषजं तेषां किं तु विद्वत्समागमः। मूर्खाख्यायिका॥ ॥सरित्तूर्णीत्व-
यामोहान्धिकिमात्मा प्रकटीकृतः। सपत्नीनां प्रयत्नो हि त्वद्विवाहनिवर्तने। रक्षणीयासि मे यत्नात्सपत्नीगोचरं गता।
मायावतीनां वैरेण योषितां को हि मुच्यते। दृढकर्माभिधो राजा मृगया निर्गतः पुरा। इक्षुमत्याः परीसरे हृतेनाश्वेन नावि-

शब्दं।सोपश्यदनिलालोलतरुरम्ये तपोवने। तत्र कन्यामसामान्यलावण्यललिताकृतिं। तां विलोक्य मनःसिंधुचंद्रिकां
११८ 118 क्षुभितो नृपः। प्रणम्य तस्या जनकं मुनिं पप्रच्छ मंकणं। भगवन्कस्य कन्येयमस्मिन्नपि तपोवने। यत्कटाक्षच्छटालंबो मुष्णा
ति मदनो जनोजनं। श्रुत्वेति भूपतेः कन्यालाभलोलुपचेतसः। मुनिः प्रोवाच तामस्मै दातुमभ्युद्यतः स्वयं। ममैवा
श्रमे सा वीक्ष्य मेनकां धैर्यविभ्रमात्। सुतेयं कदलीगर्भा कदलीगर्भसंभवा। गृहाणेमां शशिमुखीं पात्रमेवासि भू
पते। दुःखंत इव कण्वेन पुरा दत्तां शाकुंतलां। उक्त्वेति प्रददौ तस्मै स कन्यामापतेक्षणां। अथ स्मरः कल्पितोद्वाहयो
ग्यकौतुकमंगलां। भूभुजा सह तां गंतुं प्रस्तुतां शासनात्पितुः। ऊचुरप्सरसः स्नेहाद्दत्वास्ये सिद्धसर्षपान्। पु राम०
त्रि भूयाः सपत्नीषु सावधानात्मरक्षणे। न सहंते हि मानिन्यः पत्युरन्यासमागमं। खिन्ना भर्तृगृहे सुभ्रु यदापि ११८

तरमेष्यति। तदा मार्गोपदेशाय तवेयं सर्षपावली। इत्युक्त्वा ताभिरगमत्तापस्तुरनुपायिनी। उदयोऽभूत्तस्यैव रक्ताभानुम
नःप्रभा। सा राजधानीमासाद्य रुचिरोद्यानभूमिषु। रममाणा चिरं तस्थौ प्रियप्रणयलालितां। तस्यामासक्तमा
लक्ष्य नृपं त्यक्ताखिलक्रियां। ज्येष्ठा नरेन्द्रमहिषीव भूव भृशदुःखिता। उवाच सा स्वमेकान्ते स्वाममात्यं भूपतेः
सचिवानेकसक्तोऽयं स्त्रापतिर्वीर्यतामिति। तदाकर्ण्याब्रुवन्देवी स्वैरमालोच्य मन्त्रिणः। वयं प्रणयिनीप्रेम
च्छेदे न स्वामिनः क्षमाः। स्त्रियोऽत्र विनियुज्यन्ते भिक्षुकीवाथ तापसी। मायाकुहककौटिल्यकल्पे कोशाहियोषितः। श्रु
त्वेति लज्जितेवासौ स्तवान हृचनं हृदि। दम्भाद्वांसुक्तमित्युक्त्वा तान्विसृज्य तथाकरोत्। गर्भे दासीं विसृज्याथ सा समाहू
य पूजितां। सपत्नीपरिहाराय योजयामास तापसीं। गर्भपातनसंस्थानवश्याकर्षणमारणैः। लब्धप्रतिष्ठा नत्वां यसात

११९ 119 थेत्याह दृग्जितात्मा तत्प्रतिज्ञाय सा पश्चात्तापं भेजे निजाश्रमे । कुहकाः अभवंस्त्येते कथं नृपगृहे स्थितिः । रत्नमंत्रौषधिस्तुते सदैव ह्नपुरे हिते । म
हाराजपुत्रेषु क्रान्तशंसति क्रुद्धसिद्धयः । ध्यात्वेति दुःखिता सा या हृद्धृदं साधनापितं । योमायाडंवरचर्येर्भ्यो त्वराशिशिरिवोस्थितः । त
स्मैनिवेदयत्सा सर्वं राजपत्न्या विचेष्टितं । कार्येस्मिंस्त्वं सहायो मे तत्तु वाचेति तापसी । सततं निशम्य मनसा प्रदध्यौ हर्षसंप्लुतः ॥
अचिंतितविधानेन दिष्ट्याहं स्वयमर्थितः । दिष्ट्यापि वामः स्वादामो वरो पित्वा समंजसां । तुरीये हृपनमं त्येव झून्नीनां जडबुद्ध
यः । चिंतयित्वेति विस्रब्धं स तां सादरमभ्यधात् । स्थितोहमत्र निःशेषमायाकल्लोलसागरः । राजपत्न्याः करिष्यामि सपत्नी विनिवारणं । युक्तिज्ञः साधयिष्या
मि सर्वं तव मनोगतं । कीर्णकौतुकम व्याम बुद्धिविभवं प्रिये । दुःशीलं नाम भूपालः पुरमेव ह्लभां रहः । सदाशिवे वे तदुःखाद मवं मुष्क विग्रहः राम०
वमनक्रालन ह्रीणं विधायाहं ततो वपुः । अवदं भूमिपालेन पृष्टो दौर्बल्यकारणं । भार्या मे शाकिनी रात्रावाकृष्यांत्राणि भक्षते । सुदृढारेण तेनाहं ११९
विवर्णो निःप्रभः कृशः । साशंकमिति राजानं संविधाय स्वमंदिरे । अवोचं सास्तु नयनो निजजायामधो मुखः । सुद्दे राज्ञः सम्मुख मन्नं दंष्ट्रायुगलमुत्क

टांछुरंछित्वान्निसततंतेनमेकर्मकारिणः। हन्निच्छेदाद्विनष्टोहंशास्त्रभांडरूपेसदा। इतितद्वचसासाभूद्भूरिविस्मयकौतुका। ततोरहःसमेतस्यगत्वासा
भूपतेर्निशि। गुदंपस्पर्शहस्तेनसाशंकस्यकुतूहलात्। तत्सलांडाकिनींमत्वासपलाय्ययोजवात्। इतिपुत्रोप्यवदयितामयाधूर्तेनमोचिता
वांटदेव्याःकीर्णामिनिःसपत्नीभयंमनः। उक्तेतितापसीहृष्टःप्रदध्यौनापितःक्षुरं। राजद्रोहेनशक्तोहंकिंतुजीवामिवर्णनैः। विचिंत्ये
त्यवदद्युक्तिंनृपस्यांतःपुरांतिके। हस्तयादृशिरःखंडान्कश्चित्क्षिपतुपोषणात्। विलोक्याजातशंकस्तांस्तांपलादांमुनेःसुतां। दृष्टक
र्मीनृपःकोपाक्रांतस्त्यक्तनिवल्लभां। इतितद्वाक्यमाकर्ण्यतापसीराजमंदिरे। देवीहितायतत्संर्वेचकारलक्ष्मचारिभिः। तद्विलोक्यनृपो
घोरांमत्वातोशाकिनींवधूं। सपत्नीरचितांसत्यदोषांतत्याजमूर्खवत्। पितुराश्रममासाद्यसर्षपादिष्टवर्त्मना। न्यवेदयत्साद्रष्टांतांत
मात्मनःक्षितियस्यच। विज्ञायडहितुर्द्वैतंदिव्यधीर्मकरोम्मुनिः। चकाराभ्येत्ययत्नेनसंजातप्रत्ययंनृपं। इतिमायाःसपत्नीनांडुर्ज्ञे

१२०
120

ध्यामृदुमानसे। गच्छाम्यहं त्वयाद्य भुक्त्वा तत्वं सावधानया। वर्तमानां परस्टहे त्वामहं समुपस्थिता। वारितावद्दमे नाथ प्रसादेष्यामि तं पुनः
सपत्न्याख्यायिका। इत्यामंत्र्य सखीं स्वैरं प्रययावनायां विहायसा। सोमप्रभा यातं तत्सर्वमाकर्ण्य ब्रह्मराक्षसः। योगेश्वरः समभ्येत्य मं
त्रिणो दिव्यलोचनः। सख्योः परस्परालापं निवेद्य पुनराविशत्। वत्सेश्वरोपि तत्संगदिन ध्यानपरायणः। निनिंद मनसा नित्यं
गणकाहगणनापरा। दृष्ट्वा वासवदत्तां स निर्विकारामुपस्थितां। योगंधरायणकृतां काचिन्नीतिमशंकत। तत्कारणं
रहो राज्ञा पृष्टो योगंधरायणः। प्राह देव मनाख्यान्या देव्याः कोपो न लक्ष्यते। यत्सहासं मुखं कोपे स्त्रीणां मानविनिश्चया
न्। मरणाध्यवसायस्य सकोप्यस्खलितक्रमः। इत्यादियुक्तिवचनैर्विधायाहं इभोमनः। स विवाहमहोत्साहे स्म श्यारंभमि रम०
वाकरोत्। वत्सराजस्ततो ज्ञात्वा विमनाः प्राह मंत्रिणां। संदेहाकुलितो वात्याविलोल इव षट्पदः। भजमानां प्रणयिनीं योमो १२०

हाद्दवमन्यते। नमोस्तु चंडपशवे नमेस्मै कठिनचेतसे। अस्मत्सुराणपुरुषः सोपिधीमान्धनंजयः। स्वेर्गरं भामनादत्य तच्छाया ल्लेव्य

मापन्नवान्। चिंताज्वरो दुःसहो यं म्पज्यते यन्नपात्मजा। यत्काल ह्मीस्वयं प्राप्तामनुतापं भजेन्न कः। इति वत्सेश्वरवरः श्रुत्वा मं

त्रिवरोवदत्। कंदर्पस्वरूपो नृपतिः श्रुतसेनाभिधोभवत्। कदाचित्तीर्थयात्राया दृष्ट्वा सोमेश्वरं प्रभं। अग्निशर्माभिधो विप्रस्तं य

दृच्छागतोब्रवीत्। पंचतीर्थ्यं नृप स्नात्वा यत्र नाः सव्यसाचिना। एवं मया स्मरसोत्सुका द्रष्टुं सर्वे महं गतः। दृष्ट्वा सोमेश्वरं देवं

स्तुराष्ट्रामृतवारिदं। भ्रांतः स्तालीवनालोलश्यामलेजलधेस्तटे। ततः कदाचित्पुलिनामपश्यं राजकन्यकां। राज्ञोवसंत

सेनस्य भुंजानः सत्रमंदिरे। भल्लीकुसुमचापस्य वल्लीयौवनशाखिनः। पल्लीमदपुलिंदस्य भुंजानः सत्रमंदिरे। भल्लीकुसु

मचापस्य वल्लीयौवनशाखिनः। पल्लीमदपुलिंदस्य वीक्ष्य तां विस्मितो भवं। परं रतिमिवालोक्यानां त्वां स्मृत्वा स्मरोपमं। त्व

१२१ पतिः श्रुतसेनोऽस्या योग्य इत्यस्य धीः स्फुटं । सम्भवानेव तत्कन्यारत्नमर्हति नापरः । इत्युक्त्वा तद्गिरा गत्वा तामयाचत तत्कृते । द्विजदूत्य विनीतां
121 तां पित्रा प्राप्य नृपः श्रियं । विद्युद्योतां स्मरोद्यानविलासरसिको भवत् । याति काले तयोः प्रौढं प्ररूढे प्रेमपादपे । अपरा विश्रुतगुणां वद्
यित्री समाययौ । नवा नरेन्द्रतनयां प्राप्तां पत्युः स्वयंवरे । साज्ञात्वा प्रेमसंभोगभंगभीता भवद्व्यहुः । तद्द्वियोगानलालीढो नृपोऽपि प्रा
पपंचतां । वरयित्री च मानिन्यः संशयेत्यभिमानिताः । श्रुतसेनाख्यायिका ॥ ॥ यौगंधरायणास्येति निशम्य जगतीपतिः । ध्यात्वा
देव्यौ च कन्यां च तस्थौ दोलादिलोलधीः । वीक्ष्य वासवदत्तां च संहृतेर्ष्यां हर्षं नृपः । प्रसन्नवदनो हारामभूत्सुस्थ मनोरथः । त
तो योगेश्वरोऽभ्येत्य मंत्रिणो रजनीचरः । चारमावेदयामास समेत्यालक्षितः ॥ गोपालकेन निहतो चारो स्वस्मर वेक्ष्णो । राज्ञाक राम०
लिंगदत्तेन पुत्री चिंतावताहिताः । गूढव्यंजनसंचारास्मारादृष्टास्तथा मया । इति रक्षो वचः श्रुत्वा प्राह योगंधरायणः । कलिं १२१

गसेनाहृत्तांतं यत्नेन ज्ञातुमर्हसि । त्वद्बुद्धिविभवेनाहं प्रमोक्ष्यसनमागतं । छेत्तुमिच्छामि रज्जां हि दुश्चिकित्स्यः स्मरानलः । चाणां ने
सर्गिकी बुद्धिर्नृणामिति किमद्भुतं । तिरश्चामपि निष्पन्ना ताव्यसनो छिन्नयेमतिः । न्यग्रोधमूलनिलयः पालितो नाम मूषकः । जा
ले लोमशमार्जारं ददर्शापतितं पुरा । वद्धे तस्मिन्नुगताशंकः स जिघ्रंश्च पलाननः । भक्ष्यं वहिश्चचाराखुर्विलखन्नखैर्महीं
ददर्श नकुलं तत्रोलूकं च विकृताननं । तौ दृष्ट्वा प्राणसंदेहं मूषकः समचिंतयत् । नकुलोलूकभीतोहं मार्जारबलिनां वरं ।
श्रयामि विषमस्थानां संधिस्त्राणं हि शत्रुणा । चिंतयन्निति तत्याशछेदायोद्यतमानसः । मार्जारमवदन्नीलकाचकांचनलोचनं । अमित्रो
मित्रतां याति मित्रं वा यात्यमित्रतां । कालेन तस्माच्छेत्स्यामि पाशं ते वद्धसौहृदः । इति श्रुत्वा मधुनिभं मार्जारः सौहृदं व्यधात् । गाढं मंके परिष्व
ज्य मूषकं विपदि स्थितः । तं दृष्ट्वा नकुलोलूकौ निराशावाखुभक्षणे । वभूवतुर्भग्नमुखौ तदुपाश्रयशंकितौ । ततः शनैराखुश्छिच्छेद स्नायु

१२१ वंधनं। नं तूर्णमित्याह मार्जारश्चिरकारिणं। स्वार्थमुद्दिश्य लंबं ते सेवा तं तु मिरीश्वरे। छन्नोत्स्वकार्यशेषेण पापयेत्कार्ययाचकान्॥ इति ध्यात्वा धि
122 येवाखुर्लुब्धकागमनावधि। एकपाशावशेषं तच्चकार नयकोविदः। कालाकारकराले थ संप्राप्ते पाशजीविनी। चकर्त्त पाशशेषं स
छित्त्वैव विलमाविशत्। भयान्मुक्तोथ मार्जारः कालेनोपेत्य मूषकं। विलद्वारस्थितः प्राह सखे निर्गम्यतामिति। नीत्वास्तुलोय दश
नं श्मश्रुसूचीवितानानं। करुसंहत्तलांगूलं जिघ्रंतं विलसौरभं। उच्चैकपाद निभृतं मीलितार्द्धविलोचनं। पार्श्वावलोकिनं दृष्ट्वा मार्जारं मू
षकोवदत्। सौहार्देनोपयुक्तः प्राकृत वचाह भवांस्तु मे। गम्यतां स्वगतः कालो भविं वेचनास्त्वहं। यद्भवान्मधुरं वक्ति महं तन्नाद्य रो
चते। यातस्ते कार्यकालोसावधुना नास्ति संगतं। निजप्रयोजनापेक्षापेशलप्रियभाषितं। दुर्वलः क्रूरमनसां धीमान्को नाम राम०
विश्वसेत्। कृतज्ञ भव मे मित्रं दूरादेवार्च्चयेच्चेतसा। न संगोस्ति विरुद्धो हि भोक्तृभोग्यसमागमः। निरस्य वक्रमिवाकेव मार्जारमिति १२१

मूषकः। बिलं तत्प्राज्ञकालेन निजं छन्नं विलोकितं॥ ॥मार्जाराख्यायिका॥ ॥इति बुद्धिमतां नीतिर्निगूढा कार्यसिद्धये। चित्रं हि
यन्नष्टं ज्ञापापश्यन्ति हृतं संहृतं। पुरा प्रसेनजिन्नाम श्रावस्त्यां वसुधाधिपः। सभायां ब्राह्मणेनैत्य विज्ञप्तः सास्रुचक्षुषा। दुःखार्जि
तं धनं। देव हारितं त्वयि शास्तरि। वनेनागवलावल्लीमूले विनिहितं मया। श्रुत्वेति राजा संचिन्त्य वैद्यानाहूय सर्वतः। अपृच्छ
दातुरेष्वद्य प्रयुक्तं किं किमौषधं। इति पृष्टेषु वैद्येषु प्राहैको वणिजो मया। दत्तो नागवलाक्वाथः श्रमार्त्ताय मधुना नृपः। इ
त्याकर्ण्य तमर्चिष्य स्वानितायेन सा लता। भेषजाया ब्रवीद्राजा ब्राह्मणास्त्वहृतं त्वया। इति वैद्यधराहूतः श्रुत्वा कंपाकुली
नरः। राजभीतस्तथेत्युक्त्वा स विशाय ददौ धनं। इति राज्ञा स्वबुध्येव विप्रस्वं नष्टमाहृतं। को हि नाम न संकल्पो धीमतां यो न सिध्य
ति॥ ॥प्रसेनजिदाख्यायिका॥ ॥इति मंत्रिवचः श्रुत्वा प्रहृष्टो ब्रह्मराक्षसः। कलिंगसेनाभवनं तत्प्रयुक्तः पुनर्ययौ। अत्रांत

रेसमाकृष्टश्चिराभ्यस्तमनोरथः ।श्रीमान्मदनवेगाख्यो विद्याधरपतिः स्वयं।वत्सेशवेषमाधाय निर्विशेषमवारितः।कलिंगसेनाभवनं वि
१२३ 123 शेवेशदृक्छुतिः ।कलिंगसेना तं वीक्ष्य व्याजवत्सनरेश्वरं।ससंभ्रमं सस्तुक्तस्तोरणन्नूपुरमेखलां।लज्जानतमुखांभोजां कंपमानघ
नस्तनी।गांधर्वेणाह विधिनाहृष्टस्तामालिलिंगसः।तं दृष्ट्वा तूर्णमभ्येत्य ग्राहयौगंधरायणं।राक्षसोवत्सराजेन राजपुत्री वृते
ति सः।असंभाव्यमिदं मन्येनायं राजा विस्मृष्टखलः।एवं कस्मिन्नतत हैषो मंत्री शाहेत्यविस्मितः।नृपं वासवदत्तामंदिरे वीक्ष्य मंत्रि
णा।विसृष्टो राक्षसः शायाद्द्रष्टुं कपटकामुकं।कलिंगसेनाभवने सोपश्यन्नृपरूपिणं।विद्याधरेंद्रं स्वरतश्रमनिद्राविमोहितं।नि
द्रेलिचरणं ज्ञात्वा ग्राहयौगंधरायणं॥ ॥कलिंगसेनामदनवेगसमागमकथा॥ ॥ततो विज्ञाय निपुणं राजकन्या विचे रा॰म॰
ष्टितं।चक्रे विदितवृत्तांतं नृपं यौगंधरायणः।कलिंगसेनाकेनापि हृता विद्याधरेण सा।इति वासवदत्तां च मंत्री गूढमहर्षे १२३

यत्र। क्रोधशोकस्पराक्रांतो गत्वा वत्सेश्वरः स्वयं। कलिंगसेनां निःशंकं ददर्शाज्ञातसत्कथां। सा वत्सराजमालोक्य सभ्रमालिंगितांस्तु
का। स्तनद्वयं पिदधती नखोल्लिखितमाबभौ। दृष्ट्वाभिनवसंभोगसंभावितमनोभवां। सौभाग्यविभ्रमोद्भिन्नां तां लतामिव पुष्पि
तां। वत्सराजो नियम्यांतः कोपमन्मथविक्रियां। आह केनापि पापेन वंचितोस्मीति निश्वसन्। कलिंगसेना तच्छ्रुत्वा सद्यः क्षीण
मनोरथा। नेदानीं त्वं सपत्नी मे स्वामिनीव व्यलोकयत्। ततो वत्सेश्वरे याते सा साक्षाद्विद्याधरेश्वरं। वरं मदनवेगं सा ववंध च सतीध्रु
तिं। अथ वत्सेश्वरः स्वैरं स्मरानुशयतापितः। विद्याधरेंद्ररहितां राजपुत्रीं समाययौ। स तामेतावदल्लज्जानतलोचनकांतिभिः
आगुल्फमिव दिधाराणां नीलोत्पलदलस्रजं। प्राज्ञा मदर्थमेवासि भज मां सुभ्रु नास्ति ते। दोषो विशुद्धभावायाः प्रमाणं चात्र मे
मनः। इति राजवचः श्रुत्वा साब्रवीत्साश्रुलोचना। दुर्निमित्तं विलोक्यैव सख्याहं वारिता पुरा। सोमप्रभावचः पथ्यमकृत्वा

संशयं गता । प्रजापालन वेदानीमगम्याहं परांगना ॥ इंद्रदत्ताभिधो राजा चेदीनामभवत्पुरा । पापसूदनतीर्थं यश्चक्रे दिव्यं महत्सुरालयं । स
कदाचिद्वणिग्जायां तीर्थं स्नातुं समागता । ददर्श कांतिकल्लोलैः प्लावयमानामिवाभितः । तामन्विष्य स्वयं राजा समेत्य विजने
निशि । भजस्वेत्यवदत्को हि कामेन न खलीकृतः । स्पृष्ट्वा वह्निं विशामीति सा समाभाष्य भूपतिं । तत्याज दयिताप्राणान्विषमं
हि सतीव्रतं । भूपतेरपि तन्नीत्वा पापसंकुचितायुषः । मन्ये तस्य कथां स्पृष्ट्वा जिह्वेयं लज्जतीव मे ॥ ॥ पतिव्रताख्यायिका ॥ सु
रांगना शक्रशापादहं प्राप्तादृशामिमां । निंद्यास्मि चापलायद्वामभेषा भवितव्यता । मनोरथशताप्यस्तमप्राप्यान्यद्वाप्यते ।
विधातृविहितं को हि कदा लंघयितुं क्षमः । इदं विद्याधरेंद्रेण वितीर्णं मणिकांचनं । मह्यं शुभ्रात्सुरे राजन्निव सा स्वपनपा रा म०
यिनी । श्रुत्वेति मदनार्तोऽपि विरराम नरेश्वरः । स तां कलुषितं चेतः सहसैव प्रसीदति । अथ कालेन संभुक्ता विद्याधरक्षराभु १२४

जा। कलिंगसेना संतोषं गर्भं चाधत्त सुप्रभा। ततो विद्याधरपतिस्तामामंत्र्य ययौ प्रियः। गर्भाधानावधिस्त्रीणां खचरैर्हि
समागमः। स्मृतमात्रः समेष्यामि याते कृत्वेति संविदं। विद्याधरेंद्रे याते तस्याश्चो दोहदापांडुरद्युतिः। ततो सूत सुतं काले सा
सूर्यैणी सूर्णीलक्षणां। चित्रंगदोथ गंधर्वैस्तमदृष्टं जहार च। अत्रांतरे वरार्द्धंभोः सांर्गनंगार्थिनी रतिः। प्रच्छन्ना मायया तत्वी
न्यस्तात त्स्सूतिकागृहे। नरवाहनदत्तस्य कामस्यापररूपिणः। भाविनी वल्लभा गर्भे व्यत्ययं तत्सुताभवत्। लावण्य
कलिकाकारतद्वपुः कांतिसंचयैः। प्रादुर्विवर्णितां दीपां धूतकाराजिताइव। सुतां कलिंगसेनायां जातां श्रुत्वा महीप
तिः। पुत्रोद्वाहनमतिं चक्रे भाविज्ञो हि मनोरथः। मदनमंचुकाजन्मकथा॥ ॥ ज्ञात्वावत्सेशसंकल्पं प्राह यौगंधरा
यणः। राजन्नयोनिजैवेयमुत्पन्ना कन्यकारतिः। गर्भेयोऽवं तयोर्हृत्तः श्रुतमस्माभिरन्यपि। त्वत्सुताया वतीर्णी

१२५ 125

षासाक्षान्ममघृरूपिणो।विरूपाक्षाभिधो यक्षो धनदानुचरः पुरा।विज्ञप्तो निधिपालेन भूतलन्यस्तजानुना।देव पाशुपताचार्यः सहितो ब्राह्मणैर्द्विभिः।निधा
नोत्पाटने लग्नो मथुरायामपेतभीः।इति श्रुत्वा विरूपाक्षो हन्यतामित्यभाषत।तच्छिरतं जघानासौ धनदस्तद्विवेद च।कुबेरो ब्राह्मणवधाद्विरूपा
क्षमथाशपत्।तच्छापाद्भुवि विप्रस्य पुत्रो भूत्सोग्रहारिणः।धनेशमर्थयित्वाथ तद्भार्यावनतारच।अयोनिजा मत्सुतेति दास्यास्त्वेहे नवर्धिता।
तां पूर्वभार्यामालोक्य सोपि द्विजकुमारकः।कंठेजयाह न श्यंति न हि शाग्जन्मवासनाः।ततस्तयोर्विवाहो भूत्पित्रा संचिंत्य कल्पतः।इत्येवं पू
र्वसंबंधात्संगमो देहिनामिह॥ ॥यक्षाख्यायिका॥ ॥इति मंत्रिवचः श्रुत्वा हृष्टो वत्सनरेश्वरः।देव्या च पद्मावत्या च विजहारस्मराद्धीः।
नरवाहनदत्तोपि मात्रोर्नूतनिर्जरः।पितुर्मनोरथैः सार्द्धं पूर्वमाणततुर्वभौ। ततो वासवदत्तायाः शासनात्तनयां प्रियां। कालिंगसे
नासानंदं विससर्जेष्टपांतिकं।नरवाहनदत्तस्तां दृष्ट्वा मदनमंचुकां।स्फारांजहर्षबालोपि सिच्यमान इवामृतैः।उत्संगलालिताधा एम० १२५
त्र्यातं राजतनयं विना।सुहृन्नेमपि नो तस्थौ सा कांता कामकंदली।ततो राजा च शाले क्षिभ्रुमं संपूर्णविग्रहः।यौवराज्येभिषिच्याहमंत्रि

पुत्राश्चक्रमागताश्च। नरवाहनदत्तस्य सूर्यमौलाय थोचिताः। भृत्या मया दिष्टाः पितृपैतामहे पदे। इत्युक्त्वा तनयोपेताय ददौ मंत्रिपुत्रकाञ्श्येयौ
गंधरायणसुतं मरुभूतिं महामतिं। वसंतकं च पुत्रं च नर्मशीलं तपंतकं। गोमुखाद्यांश्च सुहृदो वीरं हरिशिखं तथा। अत्रांतरे मयसुता भर्तारं न
लहूवरं। समामंत्र्यांतिकं सख्या स्मृतमात्रा समाययौ। साचक्रे व्योमगं योगाद्विमानं भर्तृशासनात्। योग्यं कलिंगसेनायाः पुत्रीपरिपायोत्सवे। व
त्सराजः सहामात्यस्तदालोक्यतिकौतुकं। कलिंगसेनां सानंमेनेसंबंधिनां पदे। ततोरहस्थितो राजा रजनीतिकाननाः। दृष्ट्वा वरांगनाः प्र
क्ताः पप्रच्छागमकारणं। ताः प्राहुर्भूपतेः सर्वा वयं विद्याकलास्तथा। शरीरं प्रविशामोघ तव पुत्रस्य धीमतः। तच्छ्रुत्वा वत्सराजस्ताः संपू
ज्य प्रयतः सुचिः। महान्प्रसाद इत्युक्त्वा बभूवानंदनिर्भरः। ततस्ताविविशुर्विद्या राजपुत्रं कलाश्च ताः। तदाविष्टश्च स बभौ सुधासिक्त इवो
डुपः॥ ॥ यौवराज्याभिषेको विद्याकलासंक्रांतिश्च। नानाविद्याकलाकेलिकाननं सन्नृपात्मजः। सर्वज्ञः पितुरप्यासीद्वीणायां लक्ष्यतो
गुरुः। नृपाज्ञया प्रक्षराक्षो नृत्ताचार्यो दिने व्यधात्। कलिंगसेनातनयां गीतनृत्यादिकोविदां। तां वीक्ष्य राजतनयः सा च तस्मररूपिणं। प्रा

१२६ 126 पद्मः प्रेमवल्लया मधुमाससविलासतां। तयोः परस्परप्रेम्णा वर्धमाने मनोरथैः। बभूव पुष्पचापस्य सफलः कार्मुकक्रमः। ततः कदा
चिद्देकांते दृष्टा गोमुखमभ्यधात्। कलिंगसेनाजामातुर्भाविनः सुहृदप्रियः। नरवाहनदत्तस्य सखुस्तवयशस्विनः।
दृष्टिवद्धानुरागा मे सुतामदनकंचुका। सेयं यदि वरारोहा जाता तन्त्रीतिशालिनी। तटस्थो राजपुत्रश्चलज्जौ षाकेन सह्य
ते। श्रुत्वेति गोमुखः प्राह मातर्युक्तं प्रभाषसे। युनोर्हि सदृशी प्रीतिः कस्य नानंददायिनी। पुरा वररुचिः प्राह योगनंदं
महीपतिं। भारिकं कुंभकारं च पृथिवीस्थसमागतौ। अनयोरुपरि प्रीतिकीदृशी तव भूपते। इति श्रुत्वा गत्वा वररुचिः
स्वयं। तौ वभाषे गतो राजा योगनंदाद्यपंचतां। तच्छ्रुत्वा भारिकः प्राह दिष्ट्यानिःकंटकं जगत्। कुंभकारोब्रवीत्तासं राम०
हाधिक्शून्याः कृताः प्रजाः। श्रुत्वैवं श्रोतरि भूपाले श्रुत्वा कात्यायनो वदत्। श्रुतं देव यथैव त्वमनयोर्वेत्ति से दृशा। त १२६

थैवैनो त्वयि प्रायस्स्नेहेन स्निग्धं हि पश्यति। प्रीतिविस्फारनयना यथा मदनमंचुका। राजपुत्रेन तथैवास्यां राजसूनुरसंशयं॥
इत्युक्त्वा गोमुखः प्रायात्प्रहृष्टः स्वं निवेशनं। कलिंगसेनापि हृता विवाहं समचिंतयत्। योगनंदाख्यायिका॥ ॥कस्य
चिन्मो मुखं दृष्ट्वा कापि पीरवलिग्व भ्रूः। भजस्वेत्यवदत्सैवं स च तां नाभ्यनंदत। सा लज्जिता च क्रुद्धा च विदन्ते मायिनी
मतिं। प्रच्छन्नं तद्वधोपायेमधुमिश्रविषादिभिः। पाने विषप्रदां बुद्ध्वा तां प्रदध्यौ च गोमुखः। अहो निसर्गमलिनं
स्त्रीमलिनं स्त्रीविचेष्टितं। सोद्वेगाः कलुषारूढा निम्नगा इव निम्नगाः। अहो नु योषितो नाम कोपि दोषसमुच्चयः। अ
प्यन्विष्टा न लभ्यंते सत्यक्त्वा न त्यजंति च। वासना इव संसारमोहनैकरताः स्त्रियः। प्रहसंति विषादिन्यो हृष्टाः शोचंति
लीलया। एगिरयोपि पतिं घ्नंति कश्चिन्नं वेत्ति योषितां। अथ वात घ्यमेवो तत्कथयंति पुराविदः। शत्रुघ्ननामा पुरुषो

यथा स्वं दलिनां वरः । गाढमन्यनरासक्तां निजयांतिं ददर्श सः । तां तु दृष्ट्वा जघानाशु कुपितः पारदारिकं । यथानीत्वा शवं स्कंधे निधाय वल
१२७ 127 गर्वितः । अंधकूपे स चिक्षेप वीक्षमाणो नतानतः । कूपे निरीक्ष्यमानं तं पश्चाद्दैत्यलघुक्रमा । न्यपातयन्निजवक्षूरिति चिश्चाशयाहि
यः । शत्रुघ्नाख्यायिका ॥ ॥ गोमुखश्चिंतयित्वेति राजपुत्रं समभ्यधात् । मरुभूतिप्रभृतिभिः सेव्यमानं मनःप्रियैः । नानाकथां
तरे तत्र राजनीतिविदां मिथः । नरवाहनदत्ताग्रे प्राहासौ सेवकव्रतं । हृष्टाः कष्टे न सिध्यंति स्नवं गच्छ पलान्नृपाः । ये सेव्यमानाः
कुर्वंति प्रसीदंति च वर्जिताः । समस्तचित्तग्रहणां संघंसंस्थाविवर्जनं । अहो व्रतमिदं कष्टं योगिनः सेवकस्य च । एतद्धि परमं
तत्वं सेव्यते यन्महीपतिः । ग्रहणो महतां राज्ञां मनसां च कईश्वरः । राजानः कुटिलैर्दैवैर्वाध्यंते सरलाशयाः । यस्मात् भिन राम०
न्नियतेन तस्य लक्ष्मीरनश्वरा । मथुरायां पुरा राजा शूरसेनः स्वसंहतान् । भृत्याविलोक्य भेदेन योजयामास योगवित् । दत्वा १२७

प्रसादमेकस्मै तीव्रः परमं दंडयत् । तमप्यदंडयत्काले सर्वो नैकैकशस्ततः । इति संति नयाः शास्त्राः सेव्यास्ते तत्वदर्शिनः । इत्यादि
कथयातस्थौ नयस्यैनिरवाहनः । अथ मानसवेगाख्यो विद्याधरपतिः स्वयं । कलिंगसेनातनया लाभे चक्रे मनोरथं । क
लिंगसेनाया वचसा वत्सभूपतिः । यौगंधरायणसखः पुत्रोद्वाहे समुद्ययौ । शस्ते मुहूर्ते विमले प्रवृत्ते देवतागणे । पुष्पव
र्षैर्हृष्टैर्मुक्तै विवाहोचितकंकणा । विवेश भूषिता वेदीं कन्या मदनकंचुका । निजकांतिवितानेन भूषयंती विभूषणं ।
वक्रैः प्रदक्षिणे तस्याः पत्युः पार्श्वावलोकिनी । ननाम दृष्टिः पर्यस्ता त्रस्तेवोत्पलमालिका । साकाप्यभूत्तदा लक्ष्मीर्ज्यो
तिषां लग्नसंगमे । कल्पं विद्याभृतां यस्याः प्रभावस्थ्रकवार्त्तता । अथ नयनविलाससस्मेरवक्त्रेंदुभासा स्फुटमिह हि सरत्या
संगतः पुष्पचापः । वत्तविधिविहितोयं कोपि तत्रोत्सवो नः हृत्रामिति दिवि चेरुस्तद्विवाहप्रवादाः ॥ ॥ इति क्षेमेंद्रवि

रचितायां बृहत्कथायां मदनमंचुका नाम सप्तमो लंभकः॥ ॥अतः परं वेलालंभको भविष्यति॥ ॥हेतवे सर्वसिद्धीनां कल्मषघ्नाय हेतवे। भ
१२८ 128 वाब्धिसेतवे तुभ्यं नमोऽस्तु वृषकेतवे। ततः कदाचिदुद्याने विहरन्नरवाहनः। ददर्श राजतनयावश्विनाविव रूपिणौ। तौ दृष्ट्वा निश्चल
दृशा स्वयं संतोषनिर्भरः। कुतो युवामित्यपृच्छन्मुखेंदुकृतचंद्रिकौ। उवाचैकः प्रणम्याथ देव त्वां द्रष्टुमागतौ। आवां तुरंगका
रिणीजवाधिकविवादतः। अस्ति वैशालिका नाम नगरी संपदां निधिः। नंदनो नाम नृपतिस्तस्यासीन्महायशाः। तस्य स्वस्तन
यौ लक्ष्मीसंक्रांतिमणिदर्पणौ। अहं रुचिरदेवाख्यो तस्यायं ममानुजः। काचिज्जिनेंद्रसेनाख्या स्वसा च मम सुंदरी। प्रकाशि
तं रत्नदीपशिखेव कुलं यथा। अस्ति मे करिणी भद्रा केशिनी नाम विश्रुता। निर्मिता जवशिक्षायै महतामिव वेधसा। पोत रम०
स्य चास्ति तुरगो गरुत्मानिव रंहसा। जगत्प्रदक्षिणीकर्तुं जवो मूर्त्तिमिवास्थितः। तद्वेगयातिविजये पणबंधः कृतो मि १२८

थः। आवाभ्यां देवतेवैव प्रमातामिव सर्ववित्। तदेह्यस्मत्पुरं तावद्धामिमितितद्गिरा ययो मनोरथजवं रथमारुह्य तत्पुरीं। त

द्राजधानीमासाद्य कांताभिर्नयनोत्पलैः। अर्च्यमानः स्मरक्षिया तदंतःपुरमाविशत्। ताभ्यां संपूजितस्तत्र भेजे रत्नासनं

कृती। धाम्नां निधिरिवोदारमुदयाचलशेखरं। अथायातां सपर्यायै तत्त्वसारं ददर्श सः। जिनेंद्रसेनापुत्रिं इचंद्रविंबवि

भाननां। भुजभृंगानाकृष्टकेतकाग्रदलत्विषा। कुर्वाणां दक्षिभागेन कृष्णसारप्रभादिशः। लज्जावनतपद्मास्यनेत्रां सुश

वलस्तनीं। नमद्भ्रमरसंभारस्तवकामिव मंजरीं। पुरः प्राप्तां प्रणामाय रणन्नूपुरमेखलां। संचारिणीं कणद्बालकलहंसामि

वाब्जिनीं। तां दृष्ट्वा पद्मवदनां विस्मितो नरवाहनः। हर्षमन्मथकंपानां क्षणात्परिचितो भवत्। तत्क्षणमाकुलासापि

वभीत्यलच्युताच्युतैः। केसरैरिव तत्काल संजातपुलकांकुरैः। स्थित्वा मुहूर्तमेव च सा सत्तयो राजपुत्रयोः। सज्जीकृतांतां कारि

णीमश्वं चन्द्रगुप्तमभ्यधात्। विचार्य विपुलैर्देशे नयोर्वीनाथिकं जवं। ववंध विजयोल्मीषं कारिण्याः कुंभमंडले। जिते वाजिनि दंतिन्याशु
१२९ नरेंतःपुरं ययौ। प्रीत्याह रुचिरं देवस्तद्वाचरचितांजलिः। देवं वत्सेश्वरो वेत्तु निजदासगृहे स्थितं। इत्युक्त्वा विरते तस्मिन्नवस्था
129 भिमुखेन तया। राजपुत्रेपि तुष्टीत्याप्तिमिते वसभातले। सूचितोपि प्रतीहार्या प्रणाम्यान नतशेखरः। प्रविश्य चंद्रसाराख्यः सा
र्थवाहस्तमभ्यधात्। देवलंपाभिधे देशे वभूव घनदोपमः। वणिक्कुसुमसाराख्यस्तस्याहं भल्लभः सुतः। अहं तदा
त्ययायातः कदाचिद्वाणिज्येन। सार्द्धं सुवर्द्धनाख्येन सुहृदा सरितां यतः। तचोद्धतमहावातैः प्रतीपं तटमागते
मम प्रवाहणे राजन् वद्धोहं धनवांछया। ततो महीधराख्येन परिज्ञाय कृपाजुषा। वणिजा कुलमित्रेण मोचितोहं राम०
नृपाज्ञया। संमानितो भूमिभुजा जातस्तुरः सुचिरं स्थितः। फुल्लवाललताजाले काले मत्तालिकोकिले। वणिजः शि १२९

खराख्यस्य पुत्रीं मेत्रीमिव द्युतेः । अपश्यमहमुद्याने युंज्यनैविलासवलितेक्षणां । तां दृष्ट्वा याचितोभ्येत्य तत्तज्जनको म
या । प्राह मां पुत्र नेवेषा हातुं मे युज्यते स्वयं । ज्ञानिना भिक्षुणा पूर्वमहमुक्तो हितैषिणा । देया मातामहेनेयं नानुकूला
नवात्मजा । इति तेन निषिद्धोहं नदृशामिह तां स्वयं । अद्येव प्रहितोभ्येतां मातामहगृहं सखे । अब्धिना सिंहलद्वीपं
तां दिशं त्वमपि व्रज । इत्युक्त्वा विससर्जाशु पुत्रीं प्रवहनेन सः । ततो वलवता तस्याः कर्मणो वनभस्वता । अभज्य
त प्रवहणं तद्धि वेद च तत्पिता । पुत्रीवियोगदुःखार्त्तेन तस्मिन्बंधुजनैः शनैः । आश्वासिते तद्विरहादभवं शोक
कर्षितः । ततः सहवयस्येन सिंहलद्वीपगंद्राणात् । आरुह्याहं प्रवहणं प्रस्थितो दक्षिणां दिशं । ततो भग्ने प्रव
हणे ममापि मकराकरे । अहं च फलकासक्तः प्राप्तो वेलावनावनिं । तत्र श्रांतस्थिरं प्राप्य मतंगाश्रमकाननं । क

१३० 130 न्याशिवार्चनरतामपश्यं तटिनीतटे। नवनामिव कामस्य यौवनस्येव हृन्मतां। हर्षो नामिव चंद्रस्य रूपस्येव विभक्ततां। तां दृष्ट्वा विस्मयज
यातत्रविश्यतयोवनं। एषा मया मतंगस्य तनया हृद्धकन्यका। यमुना नाम मां प्राह भाषाचित्रसरस्वती। दंतांशुभिः प्रोज्झिरंती पूर्णे
पुरायमिवोज्ज्वलं। मग्ने प्रवहणे पुत्र मतंगमुनिना स्वयं। प्राप्तेषा वणिजः पुत्री शिखराख्यस्य सुंदरी। सुतेव पालितास्माभिः शि
वार्चनरता सदा। समुद्रवेलालब्धेयमिह वेनेति विश्रुता। इति श्रुत्वा परिज्ञाता सा तया चारुहासिनी। हर्षलज्जास्मरारंभवि
लोलतनुवल्लरी। ततो दिव्यदृशा ज्ञात्वा मुनिपुत्री पुरस्थितं। प्राह मां पूर्वभार्येयं तव पुत्र सुलोचना। इत्युक्त्वा वितताराशी
स्तां महर्षिस्वसुतामिव। ततोहं प्राप्य दयितामश्रौषं मुनिभाषितं। इयं विद्याधरी पूर्वं जलकेलिविनाशिनी। मुनिनां तज्जे
लस्थेन शप्ता मर्त्यपदं गता। आदिष्टश्च वियोगोस्यास्त्वया सह सदुःसहः। जन्मांतरे तवाप्यस्ति नरवाहनदर्शनं। वैशालि एम० १३०

केयूरवेरस्तुरंगकरिणीजवं। योद्रक्ष्यति स विज्ञेयो भावि विद्याधरेश्वरः। जन्मांतरेनवाप्याहिंशिवाचोऽस्य हारिणः। किंत्वि
षं तन्न मे वास्तु दृष्ट्वा सर्वविविनं द्रक्ष्यति। इत्यहं तद्वचः श्रुत्वा तां प्राप्य हरिणीं द्रुतं। प्रस्थितः स्वपुरं वेलातटं प्राप्तो महोद
धेः। तत्रारोप्य प्रियां नावि यावदस्मि समुद्यतः। तावत्सा कर्मयोगेन हृता नौर्मे महानिलैः। ततो वियोगसंतप्तः प्रलाप
मुखराननः। दिवापि तिराक्रांतामिव भ्रांतोऽस्मि मेदिनीं। स च प्रवहणभ्रष्टः प्राप्तः पथि यदृच्छया। ततो विरहदग्धेन म
यास्तु वचनः सुहृत्। स मां प्रतापितं प्राह दृष्टा स्माभिस्तव प्रिया। समुद्रतीरे शोचंती स्फुटं तु न विभाषिता। इति मित्रवचः श्रु
त्वा प्राप्तोऽहं भवदंतिकं। त्वद्दर्शनावधिः शापो मुनिनाभिहितो यतः। अधुना क्षीणशापोऽहं द्रष्टुमिच्छामि तां प्रियां। उक्तेति
सार्थ्यः प्रायात्सवणम्य नरवाहनं॥ ॥चंद्रसाराख्यायिका॥ ॥चंद्रसारे प्रयाते थ संगते च मृगीदृशा। वत्सेश्वरात्मजोऽह

१३१
131

ष्टस्तत्कथाविस्मयाकुलः। दत्तां हृष्टचिरं देवेन राजपुत्रीमवाप्तवान्॥ विद्याधराधिराज्याय पुरः सिद्धिमिवागतां। जिनेन्द्रसेनां संप्राप्य कांतां तां परिणायो
त्सवे। तामेवारुह्य करिणीं प्रययौ नरवाहनः। व्रजन्स वत्समनिशाप्य मगधाधिपतेः पुरीं। तेन संपूजितः प्रायात्कौशांबीं वल्लभासखः। त
तः प्रणम्य वत्सेशं दृष्ट्वा मदनमंचुकां। ईर्ष्याकोपकषायाक्षीं प्रणामानतशेखरः। रहः प्रसादयामास हसितावधि - - - हृष्टकं
ठग्रहानंदमुकुलीकृतलोचनां। तां सेवमानो लावण्यनदीं मदनमंचुकां। नरवाहनदत्तोभूदभिषिक्तइवामृते। ततः कदाचि
त्प्रत्यूषे फुल्लेकमलकानने। सांध्यरागारुणो व्योम्नि तत्र मार्गमिरिवाहते। प्रभातवातानस्थासं गाढरक्तं मुमालिनी। उदया
द्रिमिवारूढे वियुक्तां द्रष्टुमङ्गिनी। स्तुतश्चाथ राजतनयल्लारमंतःपुरांतिके। अकांडे करुणारावं कीरीणोकमशंकि राम०
तः। किमेतदिति दृष्टोथ वयस्यस्तेन गोमुखः। चिरादकथयत्रभूमिं विलिखन्साश्रुवीक्षितैः। हताकेनापि भूतेन दे १३१

वीमदनमंचुकं। अदृष्ट्वा मूर्च्छितो रत्नपर्यंकोत्संगशायिनी। श्रुत्वेति सुहृदो वाक्यं बभूव नरवाहनः। अवारितमहाशोकस्रोतो

निष्यंदलोचनः। सकोपशोकसंरुद्धो निःप्रतीकारविक्रियः। हा प्रिये प्रेमसुभग त्वं त्वो देहीत्यभाषत। अंतःपुरे मदनमंचु

कयावियुक्तो लीलासु केषु सदृशं प्रददौ सबाष्पं। येन तत्प्रसादनकृता प्रणयेव बभूवुर्नमोक्तिभिर्हसितविभ्रमकेलि

का॥ ॥जिनेंद्रसेनालाभो मदनमंचुकावियोगश्च॥ ॥इति श्रीक्षेमेंद्रविरचितायां बृहत्कथायां वेलालंभको नामा

ष्टमः॥ ॥अतः परं शशांकवती भविष्यति। सुवर्णगिरिकर्णिके तरलतारकाकस्वरे बलजलदषट्पदे स्फु

टदिगंतपत्राष्टके। स वः प्रमथनायकः प्रदिशतु स्वयं यत्करः करोतु जगदंबुनेवलितनाललीलायितं। ततो वि

रहसंतप्तः स्मरन्मदनमंचुकां। कांतिमात्रावशेषोभून्निःसहो नरवाहनः। स चंद्रकांतपर्यंकनिषण्णो निशि निःसुखः।

१३१ 131
प्रद्धोतन्ननिश्वासोम्लापयन्नमरिणादीपकाश।कथंचिदथनिद्रार्द्धमीलिताक्षं स्मरातुरा।तंजहारसपर्यंकंकापिविद्याधरांगना।
ङ्कियमापास्तयास्वप्नेदृष्टातामेवसुंदरी।प्रबुद्धस्तन्मुखांभोजेददौदृष्टमलक्षितां।सद्दर्शविशालाक्षींतामानंदसुधा
नदीं।कांतिकल्लोलपटलैःक्षालयंतीमिवाखिलं।निश्वाससौरभाकृष्टव्योमगंगाजषट्पदैः।वद्धवेषामिवाविद्ध
गतिव्यालोलवेणिकां।वीक्ष्यमाणांविललितग्रीवंखेचरशंकया।भुजस्विकपराहतिनिमज्जत्रिवलीलतां।वेगो
द्गतिविलोलेननतारहारेणभूषितां।क्षुभ्यत्क्षीराब्धिकल्लोलमालिनींकमलामिवां।विलोक्यतांस्मरस्यैवनगरी
व्योमचारिणीं।सोमवन्निभृतश्वासः क्षणंकृतकनिद्रया।सातमादायसहसागत्वामलयभूधरं।अवतीर्याद्रिशि
खरेप्रहृष्टानिर्वृतिंययौ।तत्रलंवानिलोल्लोलदलच्चंपकपल्लवे।तस्योपर्यंकमारुह्यतदालिंगनलाल राम० १३१

सा नवस्मरसावेशस्वेदधौतविशेषका। लज्जां लेभे मुहुर्न्नेत्रे साकंपमानघनस्तनी। बालां मदृष्टसंभोगां मत्वा तां नरवा
हनः। धूर्तो युक्तिमुपाश्रित्य प्राह निद्राकुलाक्षरं। अपि क्वासि कुरंगाक्षि प्रिये मदनमंजुके। इति नामास्समाकर्ण्य त
दाकारं चकार सा। स्वविद्यया निर्विशेषं भूत्वा मदनमंजुका। गाढालिंगनसंनद्धा तस्थौ कुचपुरःसरा। ततः स्मि
तस्मेरमुखः सानंदं नरवाहनः। करकृष्टालकं मुग्धस्याश्चुचुंब वदनांबुजं। हृते बलान्नीविबंधे तस्यास्तेन विलासिना। चकंपे चूतवल्ली
व स्तनस्तवकिनी तनुः। हृतांशुकं यदंगं स ददर्श मृगीदृशः। दृष्टयस्तत्र तत्रास्य न चेलुः कीलिता इव। ततस्तां गाढमालिंग्य स प्राह
मधुरस्मितं। अहो रूपतिरोधाने वैदग्ध्यं तव सुंदरी। इति प्रियस्य वचनं श्रुत्वा प्यजविलज्जिता। सहसा रूपमास्थाय निजं भेजे रतो
त्सवं। ततः प्रियेण साध्वस्या बभाषे दशनांशुभिः। ग्रथ्नतीव गुणैर्हारं रतिमर्दविसूत्रितं। हृदये मौक्तिकलता सुधासारो मनोरथे। कर्णे

१३३ करिष्ये रक्षसस्त्वद्यशः स्तुत्यदर्शां विभो। अहं त्वद्यशसाकृष्टा तातवप्रादिनीपदं। प्राप्ता गिरिरिहत्तां मन्ये स्वसौभाग्यतिरस्कृतां। इति विद्याधरीवाक्यं
निशम्य नरवाहनः। प्रभाते तत्कलाकेलिप्रहृष्टस्तामभाषत। ब्रह्मसिद्धिरिति ख्यातो मुनिराशीन्महातपाः। तस्योत्तदाश्रमोपां
133 तगुहायां हद्धजंबुकी। दुर्दिनाभिहते काले कदाचित्सा क्षुधार्दिता। कथंचिद्दैववशाप्रसवलङ्घति विक्रवा। ततः समाययौ शुंजन्मनालिवयलयोग
जः। स्मरन्करेणुकां स्वस्थभ्रष्टां मीलितलोचनः। तद्दयाविद्रुतात्मा सा थ जंबुकी शरणं मुनिं। ययौ तद्ध्यानयोगाच्च बभूव करिणी क्षणात्। स तया जा
तसंप्रीतिर्विजहार वने गजः। उद्दंडपुंडरीकेषु मानसेषु मदालसः। ततः प्रियार्थे पद्मार्थी सरः पंके ममज्ज सः। तस्मिन्निमग्ने सा मेने द्वितीयं
गजयूथपं। तं पूर्वे करिणी दृष्ट्वा निमग्नं मन्युमुद्ययौ। महज्जातकुलीने हि प्रीतिः पर्यन्तनिश्चला। करुणाख्ये मुनीन्द्रस्य स गजेन्द्रो ह्यनुग्रहा एम०
त्। उन्मज्य कच्छान्त्याजसदाचारद्वापदं। तद्विधाभिरभिप्रीतिरवसाने ह्यनश्वरी। सा जंबुकी प्रयाता तु न स्थिरा खलसंगतिः। कुंजराख्या १३३
यिका॥ ॥इति प्रियस्य वचनं श्रुत्वा विद्याधरात्मजा। कदाचिद्ब्राह्मणः कश्चित्तद्गृहं भोक्तुमाविशत्। उपविष्टे ततस्तस्मिन्सज्जभोजनमंड

लेउत्थाय तूर्णं निर्गत्य वामदेवोभ्ययात्पुनः। भोजनांतेर्थिना दृष्टः स निर्गमनकारणं। कामदेवो वदत्त्वेवं श्रूयतां कौतुकं द्विज। शिशु

मेतिभायमिव भूवहुसुखी पुरा। तत्यक्तगृहभारोहं राजसेवापरो भवं। ततः कदाचिन्मामाह पितृव्यः साश्रुलोचनः। कामदेव प्रियेयं ते

भार्या गोपालरागिणी। इति तद्वचसा शंकाकुलितोहमलक्षितः। स्थितः प्राकारसुलग्नघनफुल्लवल्लीनिकुंजके। ततो महिषपालेन

संगतां निजवल्लभां। अपश्यं प्रेमविश्वाससकेलिलीनां निरर्गलां। ततोहं भृशसंक्रुद्धो निहंतुं पारदारिकं। समुद्यतस्तया दृष्टोथा

र्यान्निष्कंपया पुरः। सा दृष्ट्वा मूर्ध्नि चिक्षेप धूलिमुष्टिं बलेन मे। किल्विषापह्नवक्रौर्यैपधीरा नार्यो हि दुर्जेयाः। ततो महिषतां

यातः सहसाहं महाकृतिः। कोपान्महिषपालेन तङ्किरांतेन ताडितः। वद्धं महिषशालायां ततः कालेन मां वणिक्। कश्चिन्निनाय

मूल्येन दूरग्रामेतिवाहकं। कदाचिदथ दूराध्वनिःसहं शुष्कविग्रहं। कन्यकानुगता पश्यन्कापि मामुन्नमांगना। सा दिव्यदृष्टिः कास

१३४ 134 एयात्त्वा तायंताजलेन मां।अथावलोक्य महिषाकारं वंधाद्मोचयत्।ततः शापस्वरूपाय साच स्वां तनयां ददौ।अथावलोक्य महिषा
कारं वंधाद्मोचयत्।ततः शापस्वरूपाय सा च स्वां तनयां ददौ।कांतां कांतिमतीं नाम सिद्धिं मूर्त्तिमतीमिव।अथ स्वगृहमागत्य तद्दत्तैः
सिद्धसर्षपैः।साकुमार्यो मया दूराद्ंहता वडवा भवत्।सेयं छिन्ना मंडुरायां सततं लकुटैर्मया।ताड्यते पंचभिर्नित्यं तदर्थे चास्मि
निर्गतः।श्रुत्वेति विस्मिते याते तस्मिन्नभ्यागते द्विजे।जननीयोगसंसिद्धा कांतिमत्यामहं – – तस्य नाम्ना ललितलोचना।जा
ता विद्याधरेंद्रस्य मलयाचलवासिनः।साहं गौरीवरादिष्टा तव भार्या कुलोचिता।नास्म्ययोग्य कुलोत्पन्ना येनैतत्कथितं त्वया।इति कांतावचः श्रु
त्वा विस्मृद्धं नरवाहनः।विजहार तया वालश्रीखंडतरुमंडले।तच लीलारतश्रांतभुजंगमिथुनस्पृशः।चंदनामोदसुभगा मरुतस्तं सिषेविरे
पुन्नागचंपकाशोकचूतकिंशुककेसरैः।मालितेष्वुरतिं लेभे तटेषु दयितासखः॥ ॥ललितलोचनासंभोगकथा॥ ॥ततः पुष्पोच्चयक्री एम०
डाव्यग्रां ललितलोचनां।दृष्ट्वादिव्यसरस्तीरं प्रययौ नरवाहनः।कमलाकेलिसदने संफुल्लकमलाकरे।स्नात्वा चेयित्वा श्रीकंठमुपकं १३४

उत्पलोकयत्। ततः सस्मार सहसा प्रियां मदनमंचुकां। रमणीयेषु दृष्टेषु स्मर्यते रपि तो जनः। वदनं शशिनः पद्मेषु दृशं नीलोत्पलेषु
च। वीचीषु भ्रूविलासं च सस्मार शोच मृगीदृशः। कलहंसकुलक्वाणकमनीयां स्मरश्रियं। पश्यन्प्रदध्यौ दयितां लीलामुखरमेख
लां। मत्तालिमालावलयव्यालोलनलिनीतटे। स्मृत्वा केलीरतालोलकांचीकांतां सुमोहसः। पिशंगजटनामाथ तमेत्य मुनिस
त्तमः। प्रत्यग्रचंदनरसैः सिषेच करुणानिधिः। लब्धसंज्ञः सविलपन्प्रियां मदनमंचुकां। महामुनिं पुरो दृष्ट्वा प्रणनाम क्षिया
न्ततः। तं पिशंगजटः प्राह धैर्यावष्टंभमाश्रुचः प्रियां। भवं जिमहतामेव दुःखहा देव विक्रियाः। उत्क्वेतिनं निनाया सुस मुनिर्निज
माश्रमं। मुनिकन्याकराकीर्णनीवारहरिणाकुलं। तत्राद्र्द्र चंदनरसैस्तपलिप्तो जटागणो। नरवाहनमासीनं मुनिमध्ये म्पधान्मु
निः। नरवाहन सहस्वेतं दुःसहं विरहानलं। अचिरात्प्राप्स्यसि मनः स्तुधां मदनमंचुकां। श्रूयतां राजपुत्रेण यथा प्राववल्लभा

१३५ 135
पुरा राजन्मृगांकदत्तेन निस्तीर्यो विरहोदधिं। अयोध्येत्यस्ति नगरी स्फाटिकैर्या महागृहैः। कैलासवासरसिकं हसन्तीव महेश्वरं। तस्याम
मरदत्ताख्योबभूव वसुधाधिपः। यत्कीर्तिकौमुदी चित्रा लोकेषु गुणविकासिनी। मृगांकदत्तस्तस्याभूत्तनयः कांतिभूषणः। यशःस
रित्विस्फारे मृगांक इव बिंबितः। शरीरतुल्यास्तस्यासन्विक्रांताः सचिवा दश। स्वच्छाहृदि हृदशस्तु प्रथिताइव भूतयः। स्थू
लबाहुर्मेघबलस्तथा विक्रमकेसरी। व्याघ्रसेनो विमलधीर्दृढमुष्टिर्गुणाकरः। चंडशक्तिश्चित्रकरस्तथा भीमपराक्रमः॥
इति कर्मचिताभिख्या बभूवुस्तस्य ते प्रिया। ईश्वरे भूतिहृभंगैः सतैर्दशभिराबभौ। एकादशात्मासंशांभोहद्रसाम्यद
शामिव। ततः कदाचित्तं शाह स्वैरं भीमपराक्रमः। देवस्वप्ने मया दृष्टं श्रूयतां कौतुकं महत्। तमोभिरंजनशिलापुंजैरिव
पुरस्कृतं। अपश्यं मत्तमानंगकपोलमलिनं जगत्। ततः स्फुरन्नखश्रेणीविस्फूर्जितततमःपटः। ज्वालाविलोलजिह्वाग्रो एम०
मृगेंद्रोभिससार मां। समयाकृष्टशस्त्रेण समाहूतो ययोजवात्। सरितः पारमुत्ताललांगूलाकंपकेसरः। अपारां निर्गतां तस्य १३५

जिह्वां छित्त्वा महाशयः। तेपेवोन्नीये तटिनीतटं तकमुपागतः। ततो वेतालतां यातं तमप्राक्षं कुतूहलात्। भार्या मृगांगदत्त
स्य का भवित्री मल्लुप्तधीः। सप्राहास्ति सुरावासजयिन्युज्जयिनी पुरी। तस्यां कंदर्पसेनोस्ति राजा कंदर्पदर्पहृत्। उत्पन्ना क
मलावत्यां तस्यास्ति कमलेक्षणा। पुत्री शशांकवत्याख्या प्रत्याख्यानं शशिश्रियः। सुंदरी सुरभिश्वासा सुधाढ्योष्ठभग
स्वरा। सुकुमारतरा यस्यास्तनुः सर्वेंद्रियोत्सवः। विलासहासकुसुमाकटाक्षोद्भ्रांतषट्पदा। योवनोपवने यस्याः फुल्ला
विभ्रममंजरी। हाररत्नस्तनस्मेरा त्रिवलीमुष्टिमुद्रिता। भाति रोमावली यस्याः कामस्येवासिवल्लरी। हरप्रसादाद्द्वयि
ताव लभ्या सो भविष्यति। राज्ञो मृगांगदत्तस्य निगद्येति तिरोदधे। श्रुत्वेति राजतनयः सुहृदः स्वप्नकौतुकं। श्रुत्वा वि
दितवृत्तांतानुवाच सचिवान्पुरः। आश्चर्यं दृष्टवान्स्वप्ने वत भीमपराक्रमः। ममाप्युद्येवं दृष्टं यत्स्वप्ने तच्च निशम्यतां

१३६
136

सुष्माभिः सहितो गन्तुं प्रस्थितो विकटाटवीं । अहं तृषापरिक्रान्तः प्राप्तः शीतजलां नदीं । वयन्निषिद्धाः खड्गयष्टिहस्तैस्ततो नरैः । यावद्युद्धाकुला
स्तावन्नदी साऽदृश्यतां गता । ततस्तृषाग्नितप्तेन मया दृष्टः स्वयं शिवः । तस्य नेत्राग्निनेत्रस्य पतितोऽक्ष्णः कणः क्षितौ । समुद्रतां स संज्ञाप्तः
पीतः सर्वाज्ञया मया । रत्नाङ्केन कपालेन तन्मध्यान्मौक्तिकावली । मया प्राप्ता प्रशिक्षिता साच कण्ठे निवेशिता । निशम्य राजपुत्रेण तेन स्व
प्नमित्तिवर्णितं । प्रशशंसुः प्रियाचाग्निजयं चास्योन्नमंधुरः । नूतनं कुरितोत्कण्ठं पुनः प्राह नृपात्मजः । राजा कंदर्पसेनोसौ सत्त्वसाध्यो
महाबलः । याचितोपि न कन्यां स प्रयच्छति रणोत्कटः । दुर्गस्थश्चयो महाकोशो रक्तामात्यो महामतिः । तस्मादुपायविच्छेदे धिया कार्यं
विचिंत्यतां । स तां हि वत्सुसंदेहे बुद्धिरस्पुदयश्रिये । मगधाधिपतिः पूर्वं भद्रबाहुर्वराकृतिः । धर्मगोपस्य नृपतेः सुतां श्रुत्वाभ्य रा॰म॰
याचत । अनंगलीलां न ददौ स तां वाराणसीपतिः । तस्मै दिग्गजतुल्येन गजराजेन गर्वितः । भद्रबाहोर्महामात्यो मंत्रगुप्ताभिधस्स १३६

नः ॥ युक्त्वा वाराणसीं गत्वा सह शिष्यैरभूद्व्रती । तत्र प्रसिद्धिमाख्यातः सिद्धान्ताख्यानकोविदः ॥ अमन्त्रिशिरद्दर्शी रास्त्रियं द्वि
त्रिनराणुगां । साब्रवीत्तान्विमुंचं तु मां भवंतो सुहृत्तेकं । कुंजरेंद्रं भोजयित्वा तूर्णमायाति मे पतिः । इत्याकर्ण्य महामात्यो
ज्ञात्वा तां स्वैरचारिणीं । तां समादाय यातानां तेषां गृहमवेक्षतः ॥ ततः प्रभाते दयितारहितो हस्तिपालकः । शोकाद्युक्तविषो
दष्टस्तद्धिष्ण्ये वीक्षवाकुलः । तस्य मित्रैरर्थितास्तेहं हंतुं विषविहरचिकां । तं गुरो ब्रेति वेषस्य मंत्रिणोनिन्तुरंतिकं । स तं वीत
विषं कृत्वा प्राह तां लास्यसे वधूं । मद्दारादिति संभाष्य तस्मै चोरान्दर्शयन् । ततो हस्तिपकः शूरो हत्वा तान्प्राप्य तां प्रियां ।
प्रणम्य प्राह भो कुंमे गृह मे हीति मंत्रिणं । सोवदन्मु त्वनास्माकमुचितो गृह संगमः । श्रुत्वेति हसितः प्राह धिकुंमे गृ
हमेहीति मंत्रिणं । सोवदद्धस्तिशालासु पैहि मे । इति तेनार्थितो मंत्री स शिष्यो नक्तभोजनः । प्रभुकार्यार्थमविश

इति वेषो महालयं। कृष्णसर्पं समाधाय स्तुषुरे वेणुनालिके। तत्र मुक्तोंतरं कर्णोन्यविशत्तस्य दंतिनः। प्रसुप्ते मधुसंमत्ते गजपालकमंडले
१३७ स गजः कृष्णसर्पस्य फूत्कारैर्विवशोपतत्। मृते तस्मिन्नयो धीमान्मागधस्यांतिकं प्रभोः। तापसव्यंजनो मंत्री पूजां लेभे च भूभु-
137 जः। ययाचे सोथ दूतेन भद्रवाहुनृपात्मजां। द्विपं सर्पहतं ज्ञात्वा राजाभीतश्च तां ददौ। इत्येवं धीमतां बुध्या भवंत्यखिलसिद्ध-
यः। पशूनामिव मूर्खाणां धीहीनं तु बलं वृथा। मंत्रित्रिगुणाख्यायिका॥ ॥ राजसूनोरिति वचः श्रुत्वा चित्रकथोब्रवीत्। अ-
स्ति तक्षशिला नाम नगरी संपदां पदं। तस्यामिंद्राह्वनामाभून्नृपतिर्धर्मभूषणः। मनीषिणः क्रमेवासी प्रिया तस्य च लप-
भा। पुत्रकामः स नृपतिः सितपक्षे शताष्टकं। नित्यं ध्यात्वा प्रियं देवीं जुहावाग्नौ यतव्रतः। ततः कदाचिद्देकोने शते पद्म- एम०
शताष्टके। अत्यक्रमीनो हृत्पद्मं विदार्य प्रददौ निजं। अथ श्रीलत्स्य वरदा खड्गधारानिवासिनी। तुष्टादिदेश तनयं शेखरं १३७

सर्वभूभुजां। सपुष्कराक्षनामाभूत् श्रीवरान्नृपतेः सुतः। धृतः पित्रा निजपदे लक्ष्मीसंक्रांतिदर्पणः। स कदाचिन्मृगव्याय
सुष्ठेणाश्रममंतिकात्। ददर्श भोगिभिग्रसुनं भीतं कारुण्यवारिधिः। उद्धुं जघान वारीन स भुजंगाभयप्रदः। उग्ररूपं परित्य
ज्य स च व्योमवरोभवत्। सोऽब्रवीत्त्वत्प्रसादेन शापान्मुक्तः करोम्यहं। प्रियं तवोपकारस्य पुष्कराक्ष यथोचितं। आसीत्ताराव
ली नाम र पितारक्तमालिनः। विद्याधरी खेचरस्यारोहिणीवामृतत्विषः। स्वयं हृतप्रिया पित्रा शप्तात्याद्य वियोगिनी। चचा
र बाला हरिणी यूथहीनेव कातरा। प्रियेणारहिता साध्ययो सुरभिकाननं। विधाय भ्रमरीरूपं विलपंतीव गुंजितैः। त
स्याद्दयितसंकल्पाद्दीर्घं जंबुतरोः स्वयं। प्रस्कन्नं कुसुमे तेन तत्फले कन्यकाभवत्। कालेन तत्फलाहारी विजितात्सु महा
मुनिः। तां प्राप्य करुणासिंधुः पुपोष तनयामिव। ततो विनयवत्याख्या सा प्राप्य नवयौवना। मुनेस्तस्याश्रमे दृष्टा मयाल

लितलोचना।तांहन्तुमुद्यतं दर्पान्मां शशाप मुनीश्वरः। रूपमत्तो विरूपं त्वमुष्ट्रतामेष्यसीति सः। निहतः पुष्कराक्षेण राज्ञा त्वं तमु
मेष्यसि। भक्त्या विनयवत्याश्च स एव भविता नृपः। इत्यहं मुनिना शप्तो मोचितो यत्त्वया विभो। एवमुक्त्वा पुष्कराक्षं खचरो गग
नं ययौ। स्वपुरीं पुष्कराक्षोऽथ प्रविश्य स्मरतापितः। सचिवन्यस्तभूभारो ययौ प्राप्तुं मुनेः सुतां। गौरीवरात्समुत्तीर्य सोऽब्धिं सि
द्धितपोवने। विजितां तां मुनिं प्राप्य प्रणनाम स चाब्रवीत्। तथैव पूर्वं दयिता कन्या विनयवत्यसौ। रहारो मां मयादत्तां
वैजयंतीमनोभवः। ताम्रलिप्तावशिष्टांक्ष्वे धर्मसेनो वक्ष्सखः। चोरप्रहाररुग्णांगो दीर्घरोगोऽग्निमाविशत्। स हंस
मिथुनं व्योम्नि दृष्ट्वा तन्न्यस्तलोचनः। सभार्यः पंचतां प्राप्य प्रयाते राजहंसतां। पर्यंतव्यान्निसन्यासाद्वियोगोद्देहिदे राम०
हयोः। मनोनिविशते तत्र तूर्णी यान्ति तदात्मतां। सराजहंसः श्रेयस्या सहरूपच्छायाब्जशोभिषु। सरोवरेषु लहरीकेली

दोलायितोभवत्। कनकांबुजनालेन लीलाकंडूयितेन सः। विलासविलासिन्या हृतांकुटिलकंधरः। मेघवातवियोगे च पुनर्दैवाच्च संगमैः। तयोर्दीर्घतरः कालो विषामृतमयो ययौ। कदाचिज्जालवद्धं सा तं प्रियं वीक्ष्य सारसी। जहार राजपुत्रस्य कस्यचिन्मणिसूत्रिकां। नदाशयान्पिरिन्यस्य तालं याते थ लुब्धके। दूरे रत्नावली त्यक्त्वा सा तुंडेनादशत्क्षिपं। सहसान्नस्नाडितो ने ते जालं सपदिमर्छेदटः। चिच्छेद नारची त्कारो वह्निदग्ध इवोत्पलं। छिन्नपाशे महाजाले सा हंसी प्रियसंगता। पद्माकरं जगामान्यं धिया वंचितलुब्धका। लुब्धकोप्यथ तां प्राप्य रत्नमालां समागतः। दृष्टो राजसुतेनाशु कृतो विसृखलत्यदः। परिज्ञाय निजां रत्नसूत्रिकां राजसूनुना। निस्पृही तो न वा कस्ये लोभात्प्राणं विनश्यति। कदाचिदथ हंसो सौ कमलं प्रियया सह। समादाय गतो व्योम्नानिषादेनेषुणा हतः। पद्मं तद्दन्श्रष्टं गंगातीरे

महामुनेः। कुडादस्यार्चनेशंभुलिंगच्छेत्रमिवापतत्। सचहंसोनिषादेनभुक्तोहंसीचम्रलिने। नैवेद्येमुनिनातेनकल्पिताकर्मशक्तितः। हं
सस्तुभूपतिर्जातः पद्मापाताछिवार्चनो। विद्याधरीचकन्येयंजातासर्वनिवेदनात्। इत्येवंपूर्वभार्यौतेकन्याविनयवत्यसौ॥
पर्यंतभावसदृशीप्राणिनांसततंगतिः। नगर्यांमेकलव्यायामेडकमोधियोमुनिः। स्वयंभूशंमुनिलयेतस्थौजयपरायणः
वेद्दासीततोभेत्यमद्लीलाविलासिनी। चक्रेरूपवतीनामशंभोर्व्यजनवीजनं। चामरानिलविभ्रश्यदृक्मालः क्रुधामु
निः। सोभवद्भृकुटीभीमस्तत्क्षणंशाहनर्तकी। भजस्वजयमेकाग्रोमनेमाविक्रियांगमः। शुभाशुभध्यानधियाभवत्येव
मतिभ्रमः। कोत्रसूमेनधवलंमामनोम्लाननांनयः। जपयज्ञेस्थितोस्यास्मिंस्तच्चित्तस्तन्मयोभव। तथाहंवणिक्पुत्री
मुनेजन्मांतरेपुरा। ततः कदाचित्सोधस्त्थानवयौवनशालिनी। कमलाकरनामानमपश्यंतरुणंद्विजं। तदेकाग्रामनोज रा०म०
१३९

श्च शरण्ये रागीवशीकृता । नात्यजं ब्रह्मचर्यं च कसं कल्पं दृढनिश्चया । स्मरंती तं परिशीलनतोऽहं पंचतां गता । गंधर्ववत्याः परिसरे स
रितपितुराज्ञया । पुण्यतीर्थफलादस्मि सर्वज्ञा स्मरचिंतनात् । वेश्या जातेति पर्यंतचिंतनात्तु लब्धपुनर्भवः । जातिस्मरायाः श्रु
त्वेति वचनस्य महामुनिः । बभूव विस्मयस्तत्र बभूव घनडंबरः । इत्युक्त्वा पुष्कराक्षाय विजितासुः स्वयं ददौ । रंभामालिन
माह्वयततुष्टो तहरोक्तां विद्याधरीं समासाद्य रथं च व्योमगामिनं । गत्वा स्वनगरीं भेजे पुष्कराक्षो निजां श्रियं ॥ ॥ वि
नवत्याख्यायिका ॥ ॥ इत्येवं पूर्यते दैवात्तुल्यभाजामभीप्सितं । मृगांकदत्तकामं ते शर्वः सर्वं विधास्यति । इति चि
त्रकथे नोक्तं श्रुत्वा राजसुतः स्मयात् । शशांकवत्याः ख्यातेषु गणनां व्यधात् । ततः कदाचित्तांबूलगंडूषं हर्म्यशे
खरात् । मृगांकदत्तस्तत्याज स पपात च मंत्रिणि । मंत्री विनयवान्नाम विलोक्य तमशंकितः । प्रदध्यौ निविडक्रोधो राजसू

१४० नोः प्रतिक्रियां। मृगांकदत्तो व्यालोच्य सचिवैर्गमने मतिं। शशांकवत्या मे कार्यो विदधे ध्यान निश्चयः। पुरीं त्वरक्षितद्वारां मत्वा तेयु
140 प्रागोपुरं। महाव्रतिकवेषेणागंतुं चक्रुर्विनिश्चयं। ततोस्थिकेशखट्वांगकपालेन्द्रैर्विडंबरं। गुप्तमाहृत्य निदधे गृहे भीम
पराक्रमः। अत्रांतरे नरपतिं ज्ञात्वाज्ञातविसूचिकं। मंत्री विनयवान्नित्यचारज्ञः स्वैरमब्रवीत्। राजपुत्रेण ते राजन्नायु
षश्चिंत्यते हृतिः। अभिचारं करोत्येष गृहे भीमपराक्रमः। तांबूलगंडूषहृषा निगद्येति सद्वः सहं। प्रत्यक्षतां निनाय
सैमंतं कपालास्थिसंचयं। करणाच्छशांकदत्तोथ क्रोधायो निजमात्मजं। पुरान्निर्वर्तयामास दशभिः सचिवैः सह। स
दृष्टः प्रस्थितो गंतुं परित्यज्य निजां पुरीं। वयस्यान्प्राह वित्तं नः स्वयंसिद्धो मनोरथः। अभिषिक्तोक्षितातेन वालस्य राम०
वसखा मम। शक्तिरक्षितको नाम किरातेषु महीपतिः। स्वयं तस्य पुरीं गत्वा विश्रम्य कृतसंविदः। शशांकवत्याः १४०

स्तुभगंयास्यामोदक्षिणांदिशं।इत्युक्त्वाराजतनयः प्रविवेशमहाटवीं।प्रत्यग्रभिन्ननागास्रग्लिप्तकेसरिसंकुलां।अ
थास्तशिखरंयातेशशिशोणितलोचने।नभः कृष्णभुजंगस्यफणारत्नेविवस्वति।तमस्तालतमालोघैः श्यामले
व्योमकानने।निशीथमत्तवेतालायस्तालोकेदिगंतरे।मृगांकदंष्ट्रोदूराध्वश्रांतस्वल्पानिपीडितः।सचिवैःस
हितस्तस्थौकीटसुष्कतरोरधः।तत्रनिद्रामवाप्तास्तेकृष्णांमुद्रितलोचनाः।अर्द्धरात्रेप्रबुद्धाश्चददृशुर्विमलं
नभः।शर्वरीशवरीकर्णकेतकेत्वहिनत्विषि।सुस्पष्टतेनभःकालकपालतुलविभ्रमेः।स्फटिकस्तंभसंभार
डंबरेरश्मिमंडले।दिग्दंतिदंतविलग्नातेहीरेणलक्ष्मणा।तस्यशुष्कतरोःसर्वेविरूढाम्ङ्कुरश्रियं।आलोकय
न्पल्लवितःपुष्पहासंचतेशनैः।ततःफलभरेनम्रःसवभूवमहातरुः।सर्वासामररामाणांसहोपरिविकूलोद्भुतः।क्षि

ष्पं फलानि पक्वानि तस्य पेतुर्महीतले। तद्दृष्ट्वा विस्मिताः सर्वे ते चक्रुः प्राणवर्त्तनं। ततः सर्वैर्भुक्तफलो बभूव सहसा द्विजः। शुभ्र
१४१ यज्ञोपवीतांकस्कंद्धो श्रुभिरिवावृतः। कौतुकादर्थितैः पृष्टः सोब्रवीद्वृत्तमात्मनः। आर्जवं ब्रह्मसुलभं रत्नां श्रुभिरिवो
141 द्गमत्। द्रमधिर्नाम विप्रोभूद्दयो ध्यानिलयः पुरा। तस्य शांतिमती नाम भार्यासीद्धर्मचारिणी। अहं च श्रुतधिर्नाम
पुत्रस्तस्य मनीषिणः। ततः कदाचिद्दुर्भिक्षे मातामे निजभोजनं। दत्वार्थिने क्षुधार्त्ताय धन्यात त्याजजीवितं।
ततः पितामेव श्रामक्लांतः क्षुद्विकलः क्षितिं। हन्नं पुण्यवता प्राप्य केनापि फलपंचकं। स मह्यं त्रीणि संकल्प्य
फलानि द्वे तथात्मने। मम ज्ञां तर्जले स्नातुं क्षणं जपपरायणः। ततः फलानि सर्वाणि लोल्यादहमभक्षयं। त राम०
न्को पादस्मि शप्तश्च पित्रा शुष्कद्रुमो भव। शुष्कात्फलोपभोगात्त्वं स च शापोगतो द्यमे। शुष्कशाखेंद्रजालज्ञो यो १४१

ग्योहन्नृपसेवने। अधुना च प्रपन्नोहं भवत्सचिवतामिति॥ ॥कृतघ्निसंगमकथा॥ ॥कृतघ्नैवं वचनं कृत्वा कथ
यित्वा निजां कथां। तेनैव सहिताः प्रातस्ते ययुर्दक्षिणां दिशं। करिमंडितकंनाम ते प्रविश्य महद्वनं। द्विजैर्नि
मंत्रितास्तत्र त्रिफलारसपायिभिः। याता पंचशती तेषां वत्सराणां किलायुषः। आमंत्र्य वज्रसारं गास्तान्किरा
तपुरं ययुः। स्वच्छन्दाः संगतास्तत्र किरातपतिना ततः। कर्तव्यमानुकूल्यं नः कार्येष्विति तमब्रुवन्। शक्तिरक्षि
तकाख्येन सादरं तेन पूजिताः। महाटवीं प्रविश्याराद् अपश्यन्वृद्धतापसं। स तैः पृष्टोब्रवीत् सर्वं शुद्धकीर्तिर
भूद्यती। तस्यास्मि शिष्यः पृथिवीं भ्रांतः सिद्धिशतोत्सुकः। ततः पृष्टो मया कश्चिद्दिव्यो राजकुमारकः। स्व
स्ववेषं समाधाय निधिसिद्धिरसौषधीः। स सर्वमुक्त्वा मामाह दिव्यं धाटव्यान्तराग इते। नागः पारावताख्यो

१४१ स्तिमवनेहंसमूचिते। वैडूर्यकांतिनामास्मि खेचरस्तस्य महाप्रभः। सिद्धाधिपत्यं येनाशु पाणिसङ्गेन लभ्यते। इत्याकर्ण्य प्रयातो
142 हं मंत्रावेशाद्विमुच्य तां। शाप्यटवीमिमां सिद्धो सहायश्चिंतितो मया। चिरं ध्यात्वापि न यदा योग्यं पश्यामि कंचन। सविवं
श्वशसंतमस्तदाहं मन्तुमुद्यतः। मृगांकदत्तः श्रुत्वेति तमुवाच तपस्विनं। अहं सहायः सामात्यः स्थितस्ते भगवन्नि
ति। पादलेपं ततस्तेभ्यस्तपस्वी मुदितो ददौ। येन व्योमचराः सर्वे प्रापुर्विंध्याटवीं क्षणात्। तत्र नागेंद्रभवनोपांते मं
त्रविधिज्ञतः। जुहाव शिंशपामूले स तपस्वी कृताशनं। खादिरैः कीलकैर्वद्धेदिक्षु चैः प्रविधाय तान्। मृगांक
दत्तप्रमुखान्सर्वभौ दिक्पतीनिव। ततो दृश्यत मन्त्रालि लोलनीलोत्पलेक्षणा। ललनास्मरसर्वस्वं विभ्राणा न राम०
वयौवनं। सा क्षणान्मेखलादाममणिकिंकरनूपुरा। परिचर्यां चकारास्य होमोपकरणोद्धुरः। विलासवलि १४१

नातत्रव्यग्राचटुलवारिणी। अलङ्घितां सा पस्पर्शलग्ने नांगं तपस्विनः। तत्करस्पर्शसंहर्षविकासक्षुब्धचेतसः
होमभाण्डं पपाताशु तस्य कंपजुषः करात्। अत्रान्तरे समुत्तस्थौ मेघस्थगितदिङ्मुखः। विद्युन्निपातनिर्घात
घोरघोषः फणीश्वरः। मृगांकदत्तप्रमुखा वीक्ष्य नागं पुरःस्थितं। गंभीरधीरसंरंभखड्गहस्ताः समुद्ययुः
पारावताक्षः सन्नद्धान्दृष्ट्वा तानवदद्धि वः। युष्मद्दुःखविपन्नोयं वंचितो विघ्नयोगिना। यूयमेकोद्धता
येन विमुक्ता मम विप्रिये। वियोगस्तूर्णमेवास्तु विपिने भवतां मिथः। इति तद्वचसा सद्यस्तिमिरेण
निरस्तृताः। ययुः भ्रान्तमनसः सहसैव पृथक्पृथक्॥ ॥ पारावताक्षशापः॥ ॥ मृगांकदत्तः शो
कार्त्तो ययौ श्रुतधिनायुतः। आश्वास्यमानो यत्नेन ततो वक्त्रैरिवाहतः। तत्संगमाशां हृदये विधायो

जयिनीशनैः। निःसहः श्रान्ततो गन्तुं दृष्टोऽपि विमलबुद्धिना। सत्राश्रुलोचनो गाढं परिष्वज्य नृपात्मजं। उवाच दीर्घनिश्वस्य सहर्षशोककं
पितः। अथाहं तेन नागेन क्षिप्तो विन्ध्यगिरेस्तटे। अपश्यं तेजसां राशिं ब्रह्मदण्डं महामुनिं। ततोऽपश्यं ललनया वर्ण्यमानं समंत
तः। कुलालचक्रमुद्भ्रांते भ्रमैरैरभितो हृतं। तत्रस्थितौ वृषखरौ तयोः फेनं सितासितं। पीत्वा ते तत्यजुर्विष्टां भृंगाः सु
ताः सितासितां। सहसा तत्समुद्भूतास्तंतुकाराः सितासितास्त्विषः। असिताश्चासितोत्यनास्तु कुजालं सितासितं। तेन
जालेन मधुपावर्णाद्वावर्णो विभेदिनः। पशुर्विबलतामेके सिंधुवारलतां परे। ततो विषार्तोऽस्य कंडस्तत्क्षत्वाप्यविष
स्पृशः। चुक्रुशुः करुणं तच्च कश्चिन्मुनिरथाशृणोत्। तल्ललाटसमुत्थाग्निकणादग्धोऽयं वंधनाः। वंशाननेननि
र्गत्य तेजः छत्रं समाविशत्। इत्यहं कौतुकं दृष्ट्वा पुनश्चापश्यमुन्नतं। दशवाजं महासिंहं हीमनुस्तुतं। विदार्य कुंजरानमतान्सु

सालंबोदरेणसः । दृष्टमार्गः श्रियांशापकेसरी धवलद्युतिः । इत्याश्चर्यं तदालोक्य ब्रह्मदंडं महामुनिं । अपृच्छंसोपि मामाह भग
वान्ज्ञानलोचनः । संसारचक्रसंसक्ता भृंगास्ते कर्मिणो नराः । महामाया च सा योषिद्धर्मो धर्मी च गोखरौ । विषं नरकदुः
खं तत्सिंधुवारः सुरालयः । महेश्वरेण कृपया मुक्तास्ते दग्धकिल्बिषः । वंशेन ब्रह्मरंध्रेण यातास्ते तोमयं पदं । सिंहो
मृगांकदत्तस्त्वं वयस्यास्तस्य बाहवः । लंबोदरप्रसादेन सकांतां ध्रुवमाप्स्यति । इत्यहं तेन मुनिना प्रशांतेन विबोधि
तः । देवास्त्वदंतिकं प्राप्तः प्रमाणमधुना शिवः । संसारचक्रं ॥ ॥ मृगांकदत्तः श्रुत्वेति चित्रं श्रुतधिनासह । विस्मयं
परमं भेजे हृष्टधीरोववंध च । सगच्छन्नर्मदां प्राप फेनहासविलासिनीं । माघद्विहंगवालमेखलां नर्मदायिनीं । ददर्श
तत्र सलिले युवानं शवराधिपं । स्नानव्यग्रं महायामे गृहीतं कुंजरोपमैः । मृगांकदत्तस्तं दृष्ट्वा ग्राहान्छित्त्वा महा

१४४ सिनाधीरो मायावटुं नाम शवरेंद्रममोचयत्॥ ततः संजातसौहार्द्दैस्तेन नीतो निजालयं। प्रणम्य पूजितो दूराच्चंडालशवराधिपैः॥
144 तथा दुर्गपिशाचाद्यैः साक्षाद्रुद्र इवागतः। मायावटुगृहे प्रीतः कंचित्कालमुवास सः। तत्र पर्जन्यघोषेण घनघूर्णते राशि
खंडिषु। शवरेंद्रप्रतीहारश्चंडकेतुरभाषत। गृहे मम मयूरोस्ति यो लास्यं भानो गते सदा। अनपेक्षितपर्जन्यो नृपतीद्रा
वुधच्छविः। इत्युक्त्वा शवरेंद्रं चद्यूतकेलीकलापिनं। नचिरादर्शयामीति चंडकेतुरभाषत। ततः सूर्येस्तमायाते हृ
नाहतिमिरैर्घनैः। भिल्लपल्लीषु मायूरपिच्छकाच्छादनैरिव। नद्धाम्लदिक्षु सर्वोल्लुकौंजैरिव चर्मभिः। आकाशे शव
शीकेशपाशसंकाशशोचिषि। एके मृगांकदन्तोथ व्रजन्केनापि ताडितः। स्कंधे स्कंधेन तिमिरे तत्कोपाद्दिदम राम०
भ्यधात्। अरे दर्पोद्धुरः कोपं मत्कोपाग्निपतंगकः। श्रुत्वेत्याह प्रतीहारश्चंडकेतुरलक्षितः। चोरोहं नापराधो १४४

मे चंडसेनस्य व्यतिक्रमः । यदालोकं विनालोकः सनेत्रोप्यंधतां गतः । मृगांकदत्तः श्रुत्वेति चोरोहमिति वादिनं । तमवादीदहम
पि स्तेन एव परस्वहृत् ता इति भावं परिज्ञाय मिथः सौहार्दमाश्रितौ । स तस्थतुः पथि तौ श्यामा तमः संवीतविग्रहौ । माया
वटोः प्रतीहारः स हि प्रच्छन्नकामुकः । स दा तन्महिषीं राज्ञो भजते गूढचारिणीं । ततो मृगांकदत्तेन छन्नेनानुगतः
क्षणात् । स चंडकेतुरविशद्बिलेनांतःपुरोदरं । मायावटुप्रियां तत्र स मंजुमतिकाभिधां । प्राप्य लेभे स्मररसादना
लिंगननिर्वृतिं । अलक्षितो विलक्षितः न्यस्तनेत्रो ददर्श तं । मृगांकदत्तो दुःशीलां तां च मायावटोर्वधूं । ईर्ष्यावि
वादे सततया प्रतीहारो विरोधितः । चकर्ष शास्त्रं रागो हि खलानां कलहोदयः । रतोत्सवे प्रस्तुतेपि शस्त्र — — —
संभ्रमे ।। छिन्नानि वारणे तत्र दास्याः करजलांगुलिः । ततः क्रुद्धः स निर्गत्य निजवेश्म व्रजन्निशि । मृगांकदत्त

१४५
145

मज्ञात्वा चंडकेतुरभाषत । तूर्णमेह्येहि गच्छावः खिन्नो दीर्घप्रजागरात् । निद्रां प्राप्नुं निजगृहं विस्रब्धो ह्यसि मे सुहृत् । इत्युक्त्वा तेन नीतोसौ स्व
गृहं द्रोहचेतसा । दृष्टमज्ज्वरितो वध्यो ममायमिति निश्चयात् । मृगांकदत्तस्तद्गेहं प्रविश्यालक्षितो निशि । प्रदिष्टं तेन निद्रार्थे शून्यं
मंदिरमाविशत् । मृगांकदत्तस्तद्गेहं प्रविश्यालक्षितो निशि । प्रदिष्टे प्रतिहारगृहे तत्र स्थितो दीपांशुमालिने । केलीशिखंडिनं
दूराद्ददर्श हृच्चिरवृद्धिं । सुस्निग्धालोकिनस्तस्य वंधोरिव गलस्थितं । समागदवं धनं सूत्रं कपयेव न्यवारयत् । कंठसूत्रे व्यप
गते सोभूद्भीमपराक्रमः । मृगांकदत्तस्तं दृष्ट्वा हृष्टः पप्रच्छ विस्मयात् । सखे हर्षसुधासिंधुसंगमः किमिदं कुतः । वृत्तं वाक
थ्यतां सर्वं सुहृदे वासि मे स्फुटं । श्रुत्वेति तं परिष्वज्य प्राह भीमपराक्रमः । अप्यहं नागशापेन प्रविष्टो विकटाटवीं । दर्भसू राम०
चीचितां घोरां दावाग्निप्लुष्टपादपां । उच्छूनतन्नसिकतां संज्ञातमृगतृष्णिकां । खिद्यद्दाहमहिषाताम्यन्नप्रभुजंगमां १४५

वृद्धपथिकोवदत्। परिम्लानमुखच्छायोमद्रकिंपरितप्यसे। संसारदुःखमरणैर्वैक्लव्येननलंघ्यते। इत्युक्त्वामत्कथांश्रुत्वापुन
एहमहामतिः। वृद्धपांथोनशोकेनधीराणांस्पृश्यतेमनः। अवश्यंहिभवत्येकजीवतांसंगमःपुनः। धैर्यमाश्रयविपत्स्फारज
लधौसेतुरेवतत्। कोशलायामभूद्भूयोविभूतेः प्रथमाकरः। नारपतिकराकारचरितोविमलाकरः। कमलाकरनामा
भूत्कमलाकमलाकरः। तनयस्तस्यराजश्रीविलासमणिदर्पणः। सांगोपायनपुत्रिका विवेशस
त्वसंपन्नासूत्राभिनयशालिनी। ततोहंसावलीहेलाविकीर्णकुसुमांजलिः। मूर्त्तेवकैशिकीदृत्तिर्नाट्यस्येवाधिदेवता
। सामात्यस्यापितुस्तत्रचक्रेकमपिविस्मयं। विलासललितंतस्याविवभौवदनांबुजं। नांदीश्रवणसंतोषाच्चंद्रः
साक्षाद्दिवागतः। सावालानिजलावण्यविश्रालाकल्पवल्लरी। शृंगाररसरसालोकेनेत्रामृतफलंददौ। वालसू

१४६ 146

तांकुराह्लाद्कलकोकिलनिस्वना। सापपाठविपंचीवपंच मानुगतस्वरा। जयति सन्नाभिसरोरुहमधुकरपटलैरिवासिताकारः। शौ
रिः श्रीमुखचंद्रेयत्कांतिर्लोछितच्छाया। इति भुवाराणावकाञ्जसौरभाहूतषट्पदैः। साभवोच्चावकोद्भूतैः साधुवादाद्रैरिव
ततोदिनांते तनयानाद्यदर्शननिर्वृते। अंतःपुरं गते एक्षिष्टने सामाजिकोत्सवे। अचिंतयमहं देवकन्येयं मृगलोचना। क
मलाकरदेवस्य योग्येवेति मुहुर्मुहुः। ततश्चित्रकदेवेषु णाविशं राजनिकेतनं। कन्यांतःपुरचित्रेत्र तुल्याकारमलौकि
कं। विहितोन्मादवेषोथ वयस्योममदद्रुरः। चित्रस्थं प्रकटीकर्तुं त्वां दृष्ट्वाव मुहुर्मुहुः। नाममभिजनमाकर्ण्य त्वदी
यं तेन वर्णितं। त्वदाकारैकविन्यस्तलोचना साभवच्चिरं। ततोनवावतारेण स्मरेणासुचिरद्युतिः। साबभूव वसं एम॰
तेन लतेवोत्कलिकाकुला। प्रतिपच्चंद्रलेखेव ततः साचारुहासिनी। मनोभवानलज्वालाकालतातनुतां य १४६

यो।च्छन्नाज्वरापदेशेन विभ्रती स्मरविक्रियां। द्रष्टुं पित्राप्यनुज्ञाता श्रेयसे श्रीपतिं ययौ। ततो दूईरकेशाहं सहितो ज्ञाततत्कथः। कृतप्र
वेशस्तेनैव युक्त्यातं देशमागतः। ततो हंसावली दृष्टा मया विरहनिःसह। हंसावली वनलिनीदलशय्याकृतस्थितिः। दृष्ट्वा
तं विष्णुनिलये राजपुत्री स्मरातुरं। अपठं स्तुतिमभ्येत्य शौरेस्तन्न्यस्तलोचना। जयकमलाकरलालितचरणसमाक्रां
त विश्वविश्वात्मन्। प्रकटस्तु दर्शनकांते पुरुषोत्तमपुंडरीकाक्ष। इति प्रियतमश्लिष्टां साश्रुत्वा भगवत्स्तुतिं। पुनः पु
नः पठेत्याह मां हर्षकोशलोचना। प्रत्यभिज्ञाय सा मह्यं ददौ चीनांशुकहृदयं। यत्पल्लवे तयान्यस्ता गाथेषा रक्तचंद
नैः। सा चेयं तत्करन्यस्ता दृश्यते शुकपल्लवे। गाथा पुष्पशरस्येव दीक्षामंत्राणि मालिका। श्रुत्वेति राजतनयः स
हंसा मनसा ययौ। तामेव मन्मथाक्रांतो दिव्यं हि नयनं मनः। यत्तुरंगखुरोद्धूतसांद्रधूलीकदंबकैः। दिग्वारणाः

१५७ ह्रणांपेतुलटाघाते ससमुत्सुकाः।स राजतनयां ध्यायन्द्वयो विजयेन्मुखः।संस्मरन्राजकदलीमीलितां हृद इव द्विपः।अंग
157 राजं रणे जित्वा कुलभूतिं महाबलं।जीवग्राहं गृहीत्वा सो शाहिणोन्नगरीं पितुः।भग्नाहतशत्रुसेनाहतसमरे ब्र
तिविंवितं।षड्ङ्गां तर्निजमेवैकं सो पश्यन्नृमुखं मुखं।हिस्राय शीद्रिमं ते षु सह भिन्नेभमौक्तिकैः।कपोलपत्ररहि
ताः स चक्रे शत्रुयोषिताः।विदिशां शानकैः प्राप्य तस्थौ वेत्रवती तटे।नर्नेय नाजगर्जोभिरुद्यानशिखिमंडली।तत्र दूतेन भूपा
लयया चेमेघमालिनं।हंसावलीस्मरावास निजमान सवासिनी।ततः स्वयं समभ्येत्य मेघमा मीत्रणाम्य तां।उवाच हृत
क्त्यो हं त्वदाशायह रणादिभिः।निर्दिष्टा विष्णुनैवैषा मत्सुता तव वल्लभा।यत्कारस्पर्शशिरसां देहिनां नश्यति ज्वरः॥ राम०
वितीर्णा तनया तुभ्यं वंशमुक्तावली मया।प्रातः रूपयां भविता युष्मत्परिणयोत्सवः।इत्युक्त्वा विदिशाधीशः १५७

प्रविश्यांतः पुरं निजं । चक्रे विदितवृत्तांतां तातनयां वल्लभां तथा । हंसावली चित्रगतं ध्यायंती कमलाकरं । स एवान्योऽथ वा कश्चिदि
ति दोलाकुला भवत् । सा दिदेश सखीं स्वैरं कां तां कनकमंजरीं । दृष्टा राजसुतं तूर्णमेहि त्याहितसंशया । कृत्वा कूटजटाजूटा
ततः कनकमंजरी । कृष्णाजिनोत्तरासंगपीडितोच्चकुचस्थली । राङ्यस्तस्यामृतां शौरीव प्रव्रजितद्युतिः । इद्धुं तपस्वि
नीवेषा प्रययौ कमलाकरं । रत्नोपायनहस्ता सा कांतं दृष्ट्वा नृपात्मजं । बभूव मन्मथाविष्टा तेन संभाविताक्ष्णात् ।
सा विस्मृतसखीस्नेहा तं निर्वर्ण्य स्मरोपमं । तस्थौ तद्गतहृत्काकस्पास्ति·हृये स्वैरिणी सखी । ततो हंसावली मत्य सा
ध्रीन्मन्मथाहता । उन्मत्तोसौ नृपसुतो दृष्टो मंत्रिदृष्टो मया । भूतच्छायाभिभूतेन नेचितसौन ते सखि । चूतवल्ला
इवासंगः क्रोडस्थुष्केण शाखिना । इति राजसुतां क्ष्मृत्वा न सोऽयमिति चेतसा ॥ निश्चित्योद्वाहविमुखी बभूव भृ

१५८ शङ्कुःखिता। सखि त्वं मम वेषेण पाणिग्रहमहोत्सवे। भजेमं न हि मे चित्तमन्यत्र कमलाकरात्। इति हंसावलीवाक्यं श्रुत्वा कनक
मंजरी। उवाच त्वद्दशास्मीति सानंदं कृतसंहतिः। स्थातव्यं नगरोपांते कूटशाल्मलिकोटरे। त्वया हृतविवाहं त्वां समे
ष्याम्यलक्षिता। हंसावलीमिति स्वैरमुक्त्वा कनकमंजरी। तदा वरणवासोभिस्तद्वेषा विदधे तनुं। कृत्वा विदित
वृत्तां तां सखीं ह्रीहेनिजाकृतिं। साप्यशोककरी नाम विवाहवह्वधा ययौ। ततो महोत्सवव्यग्रसमग्रजनमंडले
हंसावली गूढवेषाश्रयाता शुष्कशाल्मलीं। तत्कोठरं समालोक्य भीषणं मूढमानसा। लताजालांतरे तस्थौ वा
लाचकुलशाखिनः। ततः कोलाहलोन्नालव्यालोलजनसंकुले। तां कूटकन्यकां प्राप्य प्रययौ कमलाकरः। एम०
सव्रजन्निजयी तत्रयात्रायातइवस्मरः। शाल्मलेः संनिधिं प्राप गजेन्द्रघटाकुलः। सहसा तत्र हस्ततकोद्दामझा १५८

साकुलेक्षणा। जायस्वेत्याह तं कंपलोलाकनकमंजरी। किमेतदिति तेनोक्ता सावदद्देव शाल्मलेः। अस्यां
तरोस्थिते स्वप्ने मया दृष्टा निशाचरी। तया दिव्याहितः कोपि ब्राह्मणो माम भाषत। नादग्ध्वा शाल्मलीवृक्षं श्रे
योस्तीति कृपाकुलं। आर्यपुत्रोधुना सर्वं जानातीति तयेरितः। शाल्मलीसेवकैस्तूर्णं राजसूनुरदापयत्। दह्य
मानं तमालोकज्वालालीढनभस्तलं। हा सखा वंचितोस्मीति प्राह हंसावलीमुखः। अहो नु रूपलोभेन सखी मां मु
ग्धमानसां। दग्धुमभ्युद्यता पापा निःसंगसुखकांक्षिणी। अयं रतिपतेस्तुल्यः प्रत्यक्षपुरुषोत्तमः। नाधन्यया
मया शक्यो दैवं वा केन लंघ्यते। अहो कांतिरहो लक्ष्मीरहो यौवनसंपदः। अहो नु राजपुत्रस्य नेत्रसंचरणं व
पुः। अयं स चित्रलिखितः श्रीमान्मदलेक्षणाः। सन्मानसत्कृतावासो विलासरससारसः। विप्रलब्धास्मि

१४९ दैवेन प्रविशामि हुताशनं। प्रियाप्राप्तिनिरासेन किं शरीरेण शोषिता। इति संचिन्त्य शनकैः कृत्वा भगवतो वचः। प्रतीकाराय सख्याश्च नात्यज
न्सा तनुं तनुं। कोशलामध्य संप्राप्य प्रहृष्टः कमलाकरः। अंतःपुरं नृपो गत्वा मेजे वल्लभया सह। तां मनोरथसिद्धिं च ददत्ता कनकमं
जरी। हा वंचितो राजपुत्रश्चिंतयित्वेत्यगाद्गृहं। तत्र चिंतापरो वंदी तदत्ते स्तुं समुद्यतः। माता निवारितो राजरहस्यं निर्दहे त्वति।
ततो हंसावली लोकदर्शनाशंकिनी शनैः। विवेश निशि निःशेषशोकशालामिवाटवी। चिंतामिव सनिर्वेदां खलमैत्रीमि
वाफलं। जरतीमिव विच्छायां उद्देशामिव तापिनीं। वेश्यामिव महात्रस्तां चितामिव भयंकरीं। यां वामिव न्यस्तमानां
डाकिनीमिव दुःसहां। राक्षसीभिः शतघ्नीभिर्निस्त्रिंशैः पिशिताशिभिः। शरनालैश्च निचितां युद्धभूमिमिवोत्क राम०
टां। घोरां प्रविश्य तां तन्वी वित्रासतरलेक्षणा। हा तातेत्यश्रुलुलितं विलपंती मुमोह सा। ततः शनैः समाश्वास्य १४९

पवनाकुलितालका। ददर्श शर्वरी क्षीणां विरहान्तामिवांगनां। अथोदिते भगवति व्योमश्रीपतिकौस्तुभे। भास्क
रे चंद्रविरहक्लांते कुमुदिनीगणे। शनैर्व्रजंती शोकार्त्ता सा बाला तरुसुंदरं। द्वितीयं काननं भेजे मंजुकूजद्वि
हंगमं। अत्रांतरे वसंतस्याविशदाः कुसुमश्रियः। विदग्धाः प्रोषितस्त्रीणां वनांतेषु चकाशिरे। व्याकोशकिंशुकाशो
कपलाशैर्विवशुर्दिशः। स्मरलाशषरुषास्फुर्ज्जज्ज्वालाजालैरिवोद्गतैः। वधूर्विरहिणी शोकतप्तनिश्वासतो दराः। चूतचंपककिं
जल्कपिंजरा दक्षिणानिलाः। ततो हंसावली तत्र फुल्लपंकजिनीतटे। बाला तीरलतापुष्पैर्नारायणमपूजयत्। अत्रांतरे ज्वरा
र्त्तोभूत्त्वत्पुरे कमलाकरः। तद्दृष्ट्वा चिंतयत्येवं रविन्नाकनकमंजरी। अहो परीक्षाकालोयं प्राप्तो मे कूटयोषितः। हंसाव
ली ज्वरहरेत्येष वादो हि विश्रुतः। आहूता किं विधास्यामि भर्तुर्ज्वरनिहृत्तये। वध्याशोककरी तावत्कदाचिद्देदिनीभ

१५० 150 वेत्। सख्योद्वोहरन्ताः सर्वा भवं त्येवयथाह्यहं। पुराभद्रशिवानामयोगिन्युपदिदेश मां। शून्यलिंगालये कृष्णछागास्तकृपिशि
तार्चनैः। क्षीरेन छो पहारेण भवति ज्वरहा नरः। तस्मान्न देवकृत्वाद्य हत्वाशोककरीं सखीं। ज्वरं च मे दर्शं कां च तुल्यमुन्मूल
याम्यहं। इति निश्चित्य मनसा कृत्वाशोककरीरहः। कार्यं विदितवृत्तांतामुपहारकथां विना। द्वारपालान्समाभाष्य राज्ञो
रक्षावलिकर्मे। यांति चायांति या नार्यो राज्ञोवार्या न ता इति। गत्वा सखीं समाराद्य शून्यलिंगनिकेतने। कृत्वा यथोदि
तं सर्वे खड्गाग्रेण जघान तां। अभ्याहता तथा तारं त्रायस्वेति कृतारवा। जवादागाम शरणं सा राजद्वाररक्षिणः।
मुक्तकेशी खड्गहस्तां तस्याः पश्चात्समागतां। राक्षसीति निजघ्नुस्ते ततः कनकमंजरी। अथाशोककरी तेभ्यः स राम० १५०
हृत्तांतं न्यवेदयत्। विप्रलब्धं परित्राये प्राग्यथा कमलाकरं। राजपुत्रोथ विज्ञाय तस्याः कपटचेष्टितं। गृहा

हृदिनमानाप्यमुंशोचमुषितोयथा।क्वहंसावलीयातामममापुराणयघनोदयैः।अहोविधातुरैश्वर्यममीनिःफलतांगतः

अहोनुदग्धांतांबालांवह्निःकुसुमकोमलां।मन्येसंतापमतुलंनत्यंक्षतिमुगेरपि।हाहंसावलिलावण्यचंद्रि

केक्वासिदेहिमे।वाचमित्यस्फलितंविललापनृपात्मजः।ततस्तमवदद्धंद्दीदेवमाविक्लवोभव।अवश्यंवि

स्तुनादृष्टांतांशास्यासिस्तुलोचनां।अविषादेनमोहस्यधैर्यणाव्यसनस्यच।नयेनचप्रमादस्यमूलादुन्मूलनक्षमं।

धीमतांसत्वशीलानांक्षतिनांव्यवसायिनां।पुनःप्ररोहमायातित्रुटितोपिमनोरथः।अक्रत्वेतुचितमाख्यानंसमनोर

थसिद्धिना।सूचितांपुंडरीकाक्षप्रजापरिकरोद्यतां।लावण्यपुण्यतटिनींसिद्धिंरतिपतेरिव।पक्ष्मक्षयायचंद्रस्य

सद्मनामिवरोहिणीं।अलिकालिकुलांलीलावल्लरीपाणिपल्लवां।पेशलामचिराबाप्तविप्रयोगविपल्लवां।तांवी

१५१ 151

स्य हर्षपीयूषवर्षिणी निर्वृतो भवत्। चिरान्मनोरथाप्राप्तः कस्य लाभो हि नोत्सवः। सापि तन्मन्मथाशंकाचकि
तायतलोचना। दृष्ट्वैवं दिग्गिरा ज्ञात्वा प्रियं लज्जानताभवत्। ततो निवेद्य संहृष्टौ विप्रलंभकथां मिथः। तौ वं दिना
सहद्विपं जग्मतुः कोशलां पुरीं। मेघमालिनमाहूय विदिशाधिपतिं ततः। कृत्वा पौरेणायं भेजे तां कन्यां कमला
करः। इत्येवं जीवतां तात नभवंति शुभसंपदः। अवाश्यस्य चिरादेव वयस्यं माकृशो भव॥ ॥हंसावलीसमाग
मः॥ ॥इति पांथवचः श्रुत्वा सप्राप्योज्जयिनीं शनैः। प्रतिश्रयार्थी वृद्धायाः प्रविष्टो हं निवेशनं। रूपकत्र
यमादाय सामे भोजनसिद्धये। दिदेश खद्वांस्थां तस्या याचिता प्रश्रयान्मम। ततस्तु जीर्णशालेन तयोप्तांजवुसु एम०
ष्टिकां। अपश्यं तां च संजातां सहसा फलितामपि। तैर्यैवैर्विहितान्सन्न्मदर्थमुपकल्प्य सा। पुराणानात्म १५१

नष्टाश्चान्योन्यतस्तस्मात्तु नदीतटं । तस्यां गतायामुत्थाय कांस्यपात्री ह्यस्थिताशा । हत्वा विनिर्मथ्य येनाहं तां तत्रैव वसु
न स्थितः । साहमप्येत्य दत्त्वा मे स्वयं भुक्त्वा विपर्ययात् । अभूच्च गलिकाक्षिप्रं क्रमः क्रुद्धो हि योषितां । नि
ज व्याजनिबद्धां तां छागीमादाय सैनिकं । गतो विक्रमकामोहं दृष्टः सौनिकयोषिता । सा ज्ञाह मामहोपा
पसखी मे वंचिता त्वया । इत्युक्त्वा ह्युद्भवक्रोधकंपमानकराधरा । ततो दिनांते सुप्तोहं वृक्षमूले शनैस्त
या । कंठे बद्धेन सूत्रेण क्षिप्रं नीतो मयूरतां । काले नधीवैर्वेध्याविक्रीतोहं विचिचरन्क्व । अस्मिन्प्रतीहारगृहे स्त्रीणां केलि
पदे स्थितः । अथाहं त्वत्प्रसादेन मुक्तस्त्र्यैस्तिर्यक्त्ववंधनात् । भवत्तेवातस्तवं प्राप्तः प्रमाणमधुना भवान् । त्वामवश्यं प्रतीहारो रहस्ये
भेदशंकितः । हंता प्रातः प्रतिनिशंको नाम न हतोमुना । इत्थं मंगलितकां ग्रहं सुभटरक्षितं । प्रभाते संशयस्थ्वासो न जाने किं भवि

१५१ 152

ष्यति। अथवाऽनेन सूत्रेण मुद्रं त्वं विहि रूपिणो। निर्गच्छावो गवाक्षेणेत्युक्त्वा तौ चक्रतुस्तथा॥ ॥भीमपराक्रमसमागमः॥ ॥तथाश्रुतधिनाआनत
ष्या विमलबुद्धिना। समेत्य तां कथां सर्वे राजपुत्रः समभ्यधात्। सभां मायावटोः प्राप्य तेऽप्रभाते महासनां। वटूब्रुवन्त्य मनसोद्भूतकेलिकला
विधौ। अथोचैः श्रुतधीः प्राह नीलकंठोद्य नृत्यतु। अलं चूतेन नः सत्यं प्रतीहारेण वर्णितः। इति श्रुतधिवाक्येन स मायावटुर्भ्रू
भुजा। प्रतीहारेऽभ्यनुज्ञातस्तमाहं स्वगृहं ययौ। स चोरेण मयाद्यापि हतः किं मंदबुद्धिना। इति ध्यात्वा गृहे पश्यन्न चोरं न च वर्हिणं॥
गृहाद्धतिनिहत्यासौ प्राह मायावटोः पुरः। गतो वर्हीति तच्छ्रुत्वा जहास श्रुतधीर्भृशं। वर्ही चोरेण वानीतश्चोरो वा वर्हिणा हृतः
अहो त्वया न विज्ञातं चोरवर्हिविचेष्टितं। इत्युक्त्वा श्रुतधिः सर्वां तत्कथां कौतुकस्पृशे। निवेद्य शर्वरीड्रायद्दासी हस्तांगुलीचतां। नमः एम० १५१
स्त्रीभ्य इति प्राह निदर्नं जुमती मुक्तः। तच्च मायावटुः श्रुत्वा प्रतीहारं जघान तं। वधान्मृगांकदत्तेन न स्त्रीवधोऽतिरक्षितां। ययौ

मंजुमतीक्षापिद्रोहः स त्वं विपत्फलः । कदाचिदथ यातेषु वासरेषु व्रजिन्नपत्र । शवराः शवराधीशं वीरः प्राप्तो महानिति । दु
र्गायागोपहाराय हृतोस्माभिः ससत्त्ववान् । शतानि पंच वीराणां जघानघनविक्रमः । इति तेषां वचः श्रुत्वा मायावाडरसं
भ्रमः । मृगांकदत्तानुमते तूर्णमेवानिनायतं । तमागतं समालोक्य संग्रामक्षतविग्रहं । गुणाकरोयमित्यूचुस्ते परिज्ञा
यविस्मिताः । ततः शनैस्तमाश्वस्तं निबद्धव्रणपट्टकं । मृगांकदत्तः पप्रच्छ किमेतदिति सानुगः । गुणाकरसमागमः ॥
सोब्रवीन्नागशापेन तदाहं देव मूर्छितः । विंध्याटव्यां परिभ्रांतः संप्राप्तो विंध्यवासिनीं । यत्रोत्कृत्तशिरःस्तोममयकृत्म
हिषसंकुलं । द्वारालंबिमहावीरं मुंडत्कमंडितं । आक्रीडमिवकालस्य कंकगृध्रवटाकुलं । हृयसंध्यांबुदमिव प्रत्य
ग्ररुधिरारुणं । वद्धांधकारं मायूरशरीरैः शवराहतैः । उत्पन्नैर्भिः कालरात्र्या भूमंगैरिव भीषणैः । सु आस्त्रिकूट

१५३
153

संघट्टैः स्पष्टीकृतदिगष्टकं । नारीघटासमुत्सृष्टैरट्टहासैरिवाहतं ॥ दुर्गायतनमासाद्य स्वशिरश्छेत्तुमुद्यतं । ददर्श मामुचा
क्रांतं दृष्ट्वा कापि तपस्विनी । विराजिता भस्मशुभ्रकंठे स्फाटिकमालया । स्वधयेवाकृता साक्षान्नक्षीरा रागकलं
कया । सा मां निवार्य कृपया आकृत्वा दीर्घां च मत्कथां । उवाच मा स्म च पुत्र कृथा वत्स मम वाच्यसि । प्रथमो यं श्रियः
पंथा यदायत्त्व विषादिता । धैर्यस्य साधवो नाम कृत्ये नीचाइवाध्वते: । न विद्या न कुलं श्री न श्री धैर्यहीन
स्य शोभते । क्षीरोदरणभग्नस्य मंदाकइव डिंडिमः । भ्रमराणामिवाद्भे भ्रमतां भवकानने । शरीरिणामवश्यं
हि भवत्येव समागमः । अभूदुदयतुंगाख्य पंचालेषु महीपतिः । यशश्चंद्र इवलाघस्य यातमेकाचपत्रतां । तस्याभ रम०
वत्त्व तीहारः श्रीरक्षापरिखाचलः । कमलाख्यो मतिमतां धुर्यः सनयविश्रुतः । विनीतमतिरित्यासीत्तत्तनलस्य गुणो १५३

स्थितः।वंशस्तुन्कामरोर्यस्यकांतिःकांताविभूषणं।सकदाचिन्निजयशःशुभ्रचंद्रकरोज्वले।शुश्राववविवरस्थधन्वीनिशी
थेकरुणंध्वनिं।गत्वापश्यन्नरुतलेकन्यांकमललोचनां।विषण्णांकुंजरस्तोभाम्नलिनीनामिवश्रियं।सादुःखकारणं
पृष्टातेनप्राहस्तमध्यमा।दंतःप्रतिमितज्योत्स्नारविताने कचंद्रिका।पितामेगंधमालीतिनागःशापेनवाहुकेः।
कालजिह्वाख्यपक्षस्यपुष्पभारिकतांगतः।भ्राताततस्यमहावीर्योविद्युज्जिह्वःप्रियासखः।यक्षोयक्षपतेःशापा
त्प्रयातश्चक्रवाकतां।स्नेहाद्भ्रातुःसरोमध्यस्थितस्यविहगाकृतेः।समीपेवसतिंचक्रेकालजिह्वोमदोत्कटः।त
त्रस्थितस्यपुष्पाणिसदाशापनियंत्रितः।समर्पितागंधमालीभारवाहीप्रयच्छति।तदुःखाद्गिरिजादेवीनियतं
सेवितामया।यक्षेविनीतमतिनाजितेशापांतमभ्यधात्।मदर्थेखड्गरत्नंमेवराश्वंचददौसती।तत्प्राप्यत्वंमयाहू

तः कस्तम्भकंदनादिह। तत्स्वरूपाणं गृहाणेमकुहस्वचययोदितं। श्रुत्वेति च तदादाय खड्गरत्नं सवाजिकं। तदादिष्टेन मार्गेण तं य
सं सोऽजयद्रणे। यक्षो विनीतमतिनाऽवध्ययोग्योऽथ दीनवत्। रत्नांगुलीयकं तस्मै दत्त्वावीतिनिवर्हणं। ततो विमुक्तशापेन दत्
तां नागेन कन्यकां। लब्ध्वा विजयवत्याख्यां स ययौ निजमंदिरं। प्रातः कृतविवाहोऽथ एतां पित्रा च सत्स्वयं। नागकन्या
सखो भेजे विनीतमतिरुत्सुकः। अत्रांतरे राजनरपतेः सुता विद्यासु कोविदा। दर्पादुदयवत्याख्या विजिग्ये वादिनां
गणं। जयेद्यो मां विवादेन स मे पाणिं ग्रहीष्यति। इति कृत्वा प्रतिज्ञां सा वादिवृंदं सदाजयत्। ततः पित्रा समादिष्टो
विनीतमतिरेत्य तां। जित्वा दीर्घेण वादेन प्राप दत्तां महीभुजा। स तां बालमृगीलोलनलिनायतलोचनां। प्राप्य स्म राम० १५४
रन्नेंद्रस्य यौवराज्यविवाहवासरं। कदाचिदथ तं द्यूतविनोदव्यग्रमानसं। ययाचे भोजनं विप्रः स च दासं तदादिश

त्रा दासोपि सिकतापात्रं तस्मै वस्त्राहृतं ददौ । अमंदनर्मकटुकादुष्टाहि नृपचेटकाः । अथ कालेन तं राजा दृष्ट्वा रा
ज्ये हृतापतिं । ऋज्वाल्पगुणलुंमूर्द्धि हृष्टो हृष्टदर्शाययो । विनीतमतिरासाद्य प्राज्यं राज्यं प्रजाप्रियः । विदधे ध
र्मविधिनाविवुधाराधनव्रतं । अत्रांतरे समभ्यायाद्वादिद्विरदकेसरी । रत्नचंद्रमतिर्नाम भिक्षुरक्षुणवोद्धधीः ।
अष्टाभिर्दिवसैर्लेन गदिना सजितो नृपः । जग्राह तत्पणे वद्धं सर्वोद्धं धर्मशासनं । स विहारं प्रविदधे हारं पुण्यफलश्रियः
लोकनाथो महासत्त्वं भिक्षुसंघशताचितं । ततः परोपदेशार्थी रत्नचंद्रमतेर्गिरा । स चकार धराधीशो विधिनास्त्वप्रसा
धनं । ज्वलितं सैकताक्रुटं सोपश्यत्वेन भूमिगः । भुंक्ष्वेत्यहितः स्वप्ने विकटैर्दंडपाणिभिः । दत्तं प्राक्सिकतापात्रं हृतके
लिजुषा त्वया । ब्राह्मणाय क्षुधार्त्ताय तस्यायं फलसंचयः । दशकोटीः सुवर्णस्य दत्वा निःक्रांतिमाप्स्यसि । इति श्रुत्वा प्रबुद्धः स

१५५ गुरवे संन्यवेदयत्। तद्वाक्यात्कांचनं दत्त्वा पुनः स्वप्नविधिं व्यधात्॥ भूयस्तद्देव च स्वप्ने ददर्शोत्कंपिताशयः। हृते विप्रस्य हेमांशे चौ
155 रैस्तद्फलं गतं। दशकोटीः पुनर्दत्वा हेम्नो भूमिनकल्मषः। ततो बुद्धकथाजातं भिक्षुः स्थविरं तमभ्यधात्। नरेंद्र दानवीराणा
मुत्साहः सिद्धये सतां। पुरा वराहरूपस्थो बोधिसत्त्वः कृपानिधिः। धर्माय सिंहरूपाय स्वं वपुर्भोजनं ददौ। हे लोलालानि
लालोलजलकल्लोलचंचलैः। प्राणैः पुण्यवतामेव प्राणयि प्राणधारणं। इत्यादिवोधिसंबद्धां कथामाकर्ण्य भूपतिः
सर्वभूवार्थिसार्थानां जंगमः कल्पपादपः। अथाभ्येत्य ययाचे तं विप्रः कोप्यंगुलीयकं। रत्नाभिरत्नसाविष्टं पुत्रमि
त्यनिवारितः। रत्नांगुलीयं तद्दत्तं तस्मै स सत्वधीः। पुण्यं रत्नार्थिनां नाम नृणां चिंतामणिः स्वयं। राजपुत्रस्त एम०
तोभ्येत्य तमिंदुकलशाभिधः। स गोत्रशात्रवात्र्जेतुं खड्गं शास्त्रमयाचत। तद्दत्ते नाथ खड्गेन राज्यं शत्रोर्जहार सः १५५

हृतराज्यः परोभ्येत्य विनीतमतिमभ्यधात्। राजञ्छत्रुष्वकृपालो न हृता श्रीः शत्रुणा मम। ज्ञात्वेति करुणाहिं धुस
स्मै राज्यं निजं ददौ। त्यक्तराज्यः प्रविश्याथ सभार्यो विकटाटवीं। स तपःपुण्यपीयूषैः स्वके नंदनसन्निभां। सो मसूराभिधं तत्र
पुरुषमद्भुमुद्यतं। निवार्य दुःखात्सोऽपृच्छत्स च दृष्टस्समभ्यधात्। पिता मे नागसूरारव्यो जाते मयि पुराम्रणोत्। चोरस्तेन
नयो भावी न चिरादिति योगिनः। ततो विद्याविदं चक्रे समायत्ने न वत्सलः। विद्या ह्यक्षतिमोदीपः संमोहतिमिरे नृप। ततो
हमभवं चोरस्तद्विदां पतितो वशे। ललाटपट्टके केन लिखितं कोऽतिवर्तते। ज्ञातः कालेन राज्ञाहि निविद्धोहं च तस्करा
त्रा दैवाद्विश्वदृष्टनागेंद्रकोलाहलविमोचितः। मज्जकोलाहलव्यग्रं तीर्णोहं जनमंडलं। श्रुश्रोषमेत्य पितरौ मच्छोका
त्यक्तजीवितौ। ततोहमपि दुःखार्तः प्राप्तो महत्तुमिदं वनं। दृष्टकाहरणयसंस्पर्शी क्षियादेव्याव न प्रिया। विनीतमतिसं

१५६
156

स्थानपुण्येस्मिन्पुत्रकानने। छीरां ते पातकं गच्छ तस्मात्त्वा रमितां स्मरण। इति तद्वचनं श्रुत्वा मया दृष्टो भवान्गुरुः। भगवन्ब्रूहि मे पु
ण्यं सम्यक्पारमितां कथां। इत्याकर्ण्य कृपासिंधुर्विनीतमतिराश्रमं। नीत्वा तं भवद्ज्ञानलोचनालोकिताखिलः। विचार एव जं
तूनां सदा सन्मार्गदर्शकः। स च स्फुरति नत्वेन नहि नामाकृतात्मनां। पंचालेषु भवद्द्विजो देवभूतिरिति श्रुतः। भोगदत्ताभिधा
नस्य भार्याभूद्धर्मचारिणी। पत्यौ स्नानाय निर्याते शाकावचयनिर्गता। सापश्यत्खरमारामे रजकेन निवेशितं। स तपावारि
तो यष्ट्याभीतः श्वभ्रे न्यपतत्। पतनस्फुटिता तस्य सशब्दा जानुनालिका। धावकोपि तमालोक्य खरं खंजीकृतं तया
तां मुष्टिभिर्जघानाशु लगुडैश्चरणेन वा। चुकोप गाढप्रहारेण गर्भस्तस्याः सशोणितः। द्विजोप्यागत्य तद्दृष्ट्वा नराधिपप राम०
तिं ययौ। बलाहकाभिधानोसौ श्रुत्वा धावकविप्रयोः। न्यायं विचार्य सुचिरं ततो वक्तुं प्रचक्रमे। उभयोरपमन्यायोत्रा १५६

रायारजकस्य च। खरेण याञ्चाहितो यद्गर्भोऽस्याः पातितोऽमुना। वहन्भारं वर्षीत्वेषा खरः स्वस्थो भवेद्द्विजः। अथ तां रज
कोगर्भब्राह्मण्यां यत्नमास्थितः। इति न्यायविरोवाक्यं स्मृत्वा पुरपतेर्द्विजः। सभार्यो विषपानेन बभूव सहसा व्यसुः
राज्ञा पुरपतिः सोऽथ निगृहीतो विनष्टधीः। इत्येवं दुर्विचाराणां क्व नु यानं समे पथि। तस्माद्विचारमास्थाय स्पृष्टएव पा
रमिता क्रिया। यया भवत्यमलधीः क्लिष्टसंसारवासनः। पुरामत्कयनामाभूत्कुरुक्षेत्रे महीपतिः। अवनीन्द्रप्रभो नाम त्यागरत्नाक
रः स्मृतः। स कदाचिज्जनपदं दुर्भिक्षेण निपीडितं। सतयोभ्यासस त्वाभ्यां ब्रतैः सक्रमतोषयत्। तद्दारत्कल्पवृक्षो भूत्सर्वाशापू
रणस्तदा। दिवं तदाज्ञया सर्वे कुरुक्षेत्रनिवासिनः। सशरीरा ययुः सत्यसिद्धये स हि पादपः। इत्येवं दानशीलस्य चिरं क
ल्पतरुस्थितेः। तस्य कीर्तिपताकेव विभात्येषा त्रिमार्गगा। नापपीयूषजलदस्तिमिरध्वंसभास्करः। दानं हि नाम संसारे

१५७ 157 निदानंशुभसंपदां॥ ॥दानपारमिता॥ ॥विंध्ये शुकसहस्रेंद्रः शुकोहेमप्रभोभवत्।तस्यचानुमातस्यचानुमतिर्नामप्रतीहारोभवत्सख
कः।कदाचित्तस्यनिहताजालकैर्वल्लभासखी।सतद्वियोगसंतप्तः प्रतीहारःकृशोभवत्।तंवीक्ष्यविरहोन्मत्तंशीलवांशु
कनृपतिः।तस्यामलंसरोगत्वाप्रतिबिंबमदर्शयत्।आत्मनःप्रतिबिंबंचतस्यावांतजलेस्थितं।निर्दिश्योवाचतंपश्य
प्रियापश्येनसंगता।एतत्सुदृष्टिरागिन्यः क्रूराःसंध्याइवस्त्रियः।दर्शयंतितमःपश्चाल्लयावन्नेभीषणां।अथोत्तुसर
लः पंथाकोप्ययंजडवेतसं।यत्कृतोननगच्छंतिमत्स्यापुच्छयहास्त्रियः।योषिद्भिर्विप्रलब्धानोसरलंशोचतांजनसंसदि।शीलपुंजमयेनैवहर
त्यायायतात्मनां।सर्वैकंकणकेयूरकुंडलप्रतिमागुणाः।शीलंत्वकृत्रिमंलोकेलावण्यमिवभूषणां।इत्येवंशुकराज्ञेनशशीलेवि रा म०
निवेशितः।बभूवमनसाध्यात्वारक्तमन्मथविक्रियः॥ ॥शीलपारमिता॥ ॥अभूत्सुमनवोभाममुनिःकेदारकंदरे।चोरास्तदा १५७

श्रमोपार्ज्जितेनालमघ्नं तद्धनं । दांभिकोयं दृष्ट्वा मौनी चौराणामपि चौर्यकृत् । मुञ्चेति च हृतस्तंश्चौरः सेकायां तं हीनवर्ण
कृपणं । दस्युभिर्निगृहीतं तं नृपतिः क्रोधरक्षतिः । शिष्यः शापप्रमाणाय दर्शयति तं क्षितौ । वारचहुस्तनश्चौरहन्ता ना
सायास भूपतिः । दिदेश तद्वधः क्रुद्धस्तथामन्यात नत्रोस्तु नि । यत्नात्कुमावतानेन रक्षिता राजशासनात् । चौराययुः
सच शायमुनिः सिद्धिमनुत्तमं । पुण्यतीर्थमनायासं कतुषु द्रव्यडंबरः । सशोभणं शरीरस्य कृमानाम परं तपः । क्लें
शंसएव पुण्यस्य भाजनं सशसां च ने । प्ररूढा हृदये येषां क्षांतिवल्ली महाफला ॥ ॥क्षांतिपारमिता । शिष्यमा
लाधरो नाम ब्राह्मणो दक्षिणापथे । ददर्शनभसा यांतं जगद्वंद्यकुमारकं । तं दृष्ट्वा तालयकृभ्याकृतात्मनं परिस्कृ
तं । आकाशगमनाभ्यासं स - - - ह निर्भरः । ततो यदृच्छयायातो भगवान्नारदो गुरुः । तं दृष्ट्वा बालरूपया चका

१५८ 158 रव्योमगामिनां इति सोत्साहवीर्याणां स्वयं सिद्धिः प्रजायते । उत्साहो धर्मवीर्याणां मूलं सत्त्वमहातरोः । निर्ययारमिता ॥ ॥ अभून्मल
यमालीति वणिक्कर्णाटदेशजः । स तां कदाचित्सोपश्यद्दिंद्रकशरभूपतेः । अमंदामंदनिष्यंदसुंदरेंदुनिभाननां । स तामिंदुव
दनां मदक्ष्वाभूत्स्मरपीडितः । दुर्लभेयमिति ज्ञात्वा चित्रकारेण सुंदरः । कृत्वा हलहकेहल्यां स तां नित्यमपूजयत् ।
स तद्ध्यानपरः सर्वं हन्तिनिर्वीणनिश्चलः । अवासः काममपि सुवं तस्थौ रागपरायणः । तां ततो भावनातो वासनालि
खितां पुनः । अपश्यत्पारिसर्पे नीलतां बाणक्रूलामिव । चंद्रादयेन वोद्याने तां निधाय जगाम सः । दृष्ट्वा पुष्पमासहृद्धे
मलकोत्तंसभूषणां । ततो यदृच्छया यातः स गतो विनयक्षितेः । अहृष्णो वीक्ष्य तं मूढं सप्रेमभयदेलिखत् । स राम॰
चतुष्याणपथाद्दायदष्टासर्पप्रियांतिके । ततोभुक्ता प्रदध्यौ तां पुरोलिलाभिसारिणीं । निहतामथ सर्पेणाय १५८

तितावयवा भुवि । विलोक्य निश्चलध्यानः सस्प्रुशोचल्लुलोचनां । हाप्रियेहा मनःसिंधुचंद्रिके — — — समे । विलप्ये
तिसहस्रायादुत्तसस्रज्ञे निजां तनुं । रक्षितोवोधिसत्वेन तेनैव चक्रवाधितः । असत्यभावनाश्चात्रमूढोस्मीतिविवेदसः
यदेवानन्यमनसां संध्यां मुग्धानलांवुजे । तत्त्वधाम्नियदिस्यां तद्भवेस्मिन्कः पुनर्भवः । ततः सशासनं पुण्यमहेतां
दर्शनेस्थितः । विरतेछा भवद्वेषो भेजे संसारशातनं । सकाराचिन्नरपतेस्तामेवंडुयशःस्तुतां । दृष्ट्वाविरक्तस्तनयाया
हत्वासंमुखोभवत । ततः पृष्टोनरेंद्रेण । तस्मैसर्वोन्यवेदयत । ध्यानपारमिता ॥ ॥ सिंहलद्वीपवसतिः श्चौरो
धूर्तसिंहविक्रमः । सकालेडुंर्वेधं प्रापदर्ध्योपातकं निशि । नशब्दं विघ्नुशङ्काणांयद्भोक्तृगणानास्पदं । वि
चिंत्येति यथा धीमान्चित्रगुप्तमपूजयन् । हतकमलसंचारतारचीत्कारमुग्धया । जगतियेभिवंनेते काले

१५९ नाह्लानाम त्यमः। विज्ञाय दृढभक्तं तं पुनर्ज्ञात्वा तदाशयं। तद्गृहं ब्राह्मणो भूत्वा चित्रगुप्तः समाविशत्। स तत्र भोजित
159 स्तेन प्रीतः स्वस्त्ययनोन्मुखः। प्रार्थितो विप्र तुष्टोऽस्मि वितराचलसंस्थितिं। ततः परीक्ष्य वज्रशोभाय यथार्
थविक्रियं। तमाहसुः काममनं मं चित्रगुप्तः स्वरूपधृक्। तपोवने तरंगिण्यां समृत्फने च वाधते। नादृहि
वत्सनं देशमित्युक्त्वा तं नाययमः। ततश्च स्थितो सौ कालस्यपडल्ले दोमनसा व्यभूत्। याते वर्षसहस्रे घस्ते तां
नोयत्र मास्थितः। विधायललनारूपं विकर्षतमुत्सुकं। तरंगिण्याः परं पारं प्राप्तं तं काममोहितं। आकृष्य
कालः पाशेन निनाय यममंदिरं। दृष्ट्वो वदच्चित्रगुप्तो धर्मराजेनतमन्ति। भक्तो ममायमित्युक्तः। कलयन्ले एम०
खिनीं करे। नरके नास्ति धर्मोस्य दिनमेकं द्विजार्च्चनात्। स्वर्गे वा महत्तत्सर्वं स्वर्गे यान्वेषुर्म्मतिः। इति त १५९

द्धचसानाकंश्रेयातस्तेनशिक्षितः । तद्वलिंगाच्चेनपरस्त्रक्षोकृपितकल्मषः । दग्धेशिवाच्चेनान्नम्प्ययात
केश्चिद्विवक्षितः । परज्ञानममानाधानाद्भावोविभवोभवत् । इतिप्रज्ञावतातेनवीरेणाचिदिवक्षि
तिः । शाज्ञाप्रज्ञासमः पुंसांबंधुरन्योनविद्यते । प्रज्ञापारमिता ॥ ॥ इतिपारमिताः श्रुत्वाविनीतम
तिनामस्वयं । कथिताः सोमसूरेभूतत्तस्मिंस्तपोवने । आश्रांतरे समत्यायाद्विजितोभूमिपाद्वि
जः । तानेंदुकलशाख्येनविनीतमतिकाननं । सतनवद्कुत्पारिश्रांतः सामात्योनिः सहोभवत् । वनंचनिष्फ
लंचापंतदक्षुद्रिंदुमायया । ततः स्वभ्रेनिपतितंकृत्वात्मानंमहामृगं । विनीतमतिरर्थेत्यासत्योभोजननामगात् । राजपुत्रे
णभक्तेघमृगेतस्मिन्नशंकितं । वह्नौनिपेततत्तस्थंपांविनीतमतिवल्लभे । तज्ज्ञात्वाराजपुत्रोऽपिसामात्योग्निंसमाविशत् । मा

१६०
160

मध्यरात्रस्तुयोगेनतत्तुसुप्तस्पृष्टुंसुप्तयोः। ततोमायाकृतंसर्वमित्यक्त्वापाकशासनः। पीयूषेणाभिषिञ्चांस्तांस्सर्वोत्तममजीवय
त्। विनीतमतिरासाद्यजीवंबोधमयोर्ययौ। दिव्यंतपोवनंश्रीमान्सर्वसत्त्वहितोद्यतः। इत्येवंसंगताःपूर्वंयत्त्वमेवविने
गताः। किंचित्त्वंभविताव्यक्तंजीवद्भिस्तैःसमागमः। विनीतमत्याख्यायिका॥ ॥मरत्पुलिंदनायस्यास्कृत्वोत्यहमवाप्त
धीः। नागशापकृतांमूढशिनिः। किंचिदवाप्यजं। ततोदुर्गोप्रणम्याहंप्रस्थितोदक्षिणांदिशं। संप्राप्तःशबरैरेतैःस
मरेसंप्रहारिभिः। कृतोननिहताबीभंजीवद्भिस्तैःसमागमः। विनेकपुलिंदहृतविग्रहः। त्वत्पादमूलमानीतस्तेर
हंलुकृतेरिवं। मृगांकदत्तःकृत्वेतिहृष्टःसचिवसंगमात्। गंतुमुज्जयिनींवक्रेप्रस्थानाभिमुखंमनः। त्वयादुर्ग राम०
पिशाचोमेदानव्योस्तिममीहिते। चंडालराजसाहाय्येममामंत्र्येतितत्क्षणं। मायावटुंसहामात्यंययावुज्जयि १६०

नींप्रति। चतुर्भिः सचिवैः सार्द्धं सशशांकवती स्मरन्। विंध्याटवीं समासाद्य दीर्घां वेणीमिवावनेः। तमालतालहिंतालविशा
लसरलाकुलां। पथि श्रमोत्खिन्नाः प्राप्तदैवदत्तास्ते जटाहतं। श्यानमेकं पथि कं दीर्घाध्वश्रमपीडितं। इषदंशुकसंछन्नांघतं
विचित्रं कर्यं ततः। अपश्यन्मृतात्स्वादान्नत्समागमनिर्हेताः। निविद्य निजवृत्तांतमष्टष्टस्तेन वाचता। अमयहं
नागशापेन जवात्क्वापि निपातितः। ततो पश्यं पुरवरे मणिकांचनमंदिरे। वधूभ्यां सहितं दिव्यं पुरुषं रत्नभू
षितं। उल्लेभो विजाने तत्रैतेनाहं पृच्छितो भृशं। मद्वृत्तांतं समाकर्ण्य सांत्वितः स्नाततोजनैः। तद्वक्षू वचमा
ज्ञात्वा तमहं यद्भुनायकं। अपृष्टं पाङ्गनयनो वियोगव्याधिभेषजं। स मामुवाच वाष्कूलमूलावन्ने विवर्न्नि
नां। द्वणां भावेभवं त्वेवदृष्टनष्टाः समागमाः। अथ मा देहपर्यंतः कोपि व्याधिरभेषजं। वियोगसारे संसारे

१६१ 161 प्रेमप्रियजनेषु यत्। अस्मिन्नश्वरांगनाभंगिरंगांगलंगभंगुरे लोकः संयोगवियोगाभ्यां। नोन्मज्जति निमज्जति। यन्हे रागा
पिमया पूर्ववत्तस्मान्तु षजन्मनि। सुखदुःखपराहन्ति रनुभूता सुदुःसह। पवित्रक्षन नामाभूद्विगर्त्तेविषयेद्वि
जः। स निद्धीनावनं गत्वा भेजमंत्रेणाकृष्टिणी। स संगतो मृगदृशा सौदामिन्याख्यया तया। लेभे श्रियं सुविपुलां
रतिं चैति लालसः। सतीकदाचिद्वदन्तु त्वत्प्रसादात् मम प्रिये। संभोगसुभगः कोपि हर्षः प्रीणाति मानसं। संपूर्णाः सर्वे
संकल्पस्त्वत्तः पुत्रं सुलोचने। श्रोतुमिच्छामि पुराणानां संतोषं सकलं फलं। इति भर्तुर्वचः श्रुत्वा सौवदन्नं सुवा
दिनी। रागं मूर्त्तमिवाधाय दिंवाधरह चापुरः। अहं पुरा दर्शिकाख्यस्य तमालवनवासितः। सुतासौदामिनी ना राम०
मयक्षेंद्रस्य घनप्रियः। अट्टहासाभिधानस्त्वं कांतो यक्षकुमारकः। स्तुतः पुरा मया हर्षनिः कांतं पितुराज्ञ १६१

याश्च शंतरेषनं पतन्निर्धायसदृशं वपुः । श्राज्ञादीप्तमुखाख्येन नलकूबररूपिणी । लीलया रममाणां त्वामपश्य
न्नलकूबरः । स पितुः सदृशं कोपान्मां शशाप ततः स्थितः । मर्त्यो भविष्यसीत्यस्मात् पार्थिवस्त्वान्यथा तद्भुवः । दु
र्हैनोम मद्रूपेणदष्यै मूढो विवर्णजः । स्मेदाभिन्यां यथा तत्त्वं भ्रातरं जनयिष्यसि । गर्भेदीप्तशिखाभैरव्यांस्व
